ग्र. ७८

आलवन्दारस्तोत्रभाष्य

वेंकटनाथ रचित

पत्र सं. १-५१

1

आलवंदारस्तोत्रभाष्यमिदम्

[illegible]॥

॥श्रीमते रामानुजाय नमः॥ श्रीनिवासगुरवे नमः॥ श्रीमान्वेंकटनाथार्यः कवितार्किककेसरी वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा
हृदि॥१॥ श्रीमद्यामुनमुनिना नाथसहायेन नाथवानस्मि। यद्दत्तनचंद्रजनितास्तोत्रसुधा भवति सुमनसां भोग्या॥२॥ प्राप्यप्रापक
भूते भगवति यामुनमुनेरयं प्रसूतः। दुरितानि हरति जगतां ध्यानुसंधानसिंधुपरिवाहः॥३॥ विमलममृतोल्वणरसं विवि
गाहनि विशति वेंकटेशकविः। यदुपतिचरणार्हमिदं यमुनातीर्थमिव यामुनस्तोत्रम्॥४॥ यद्यप्यत्र न सद्दृशां पदार्थप्रतिपाद
नं तथापि ताद्दृप्यत्वं परसंकल्पनास्थितं॥५॥ स्तोत्ररत्नमिदं न्यस्तमाचार्योक्तिसंपुटे। निधानमिव निस्सीमं निर्विशंतु वि
पश्चितः॥६॥ मंगलाचरणत्वेन व्याता गुरुनमस्कृतिः समत्याचारानुसारेण स्तोत्रारंभे विधीयते॥७॥ नमस्कारोऽत्र विज्ञेयः प्रणि
पातपुरःसरः। आचार्यादन्यतो ह्येषा याकेवलनमस्क्रिया॥८॥ प्रमाणमिह विज्ञेयं मैत्रेयाचरणं सताम्। मैत्रेयः परिपप्रच्छ प्र
णिपत्याभिवाद्य चेति॥९॥ प्रणिपातश्च साष्टांगप्रणामः प्रणामलक्षणप्रमाणं च भाष्यकारैरेव नित्यानुष्ठानसंग्रहे प्रदर्शित
म्॥ मनोबुद्ध्यभिमानेन सह न्यस्य धरातले। कूर्मवच्चतुरः पादान् शिरस्तत्रैव पंचममिति॥ नित्यानुष्ठानाधिकारिणः पर
मैकांतिनो भगवत्कैंकर्यरतित्वात्तस्य पन्ना एव तु पासकानामुपायभक्त्या वक्षे तदनुष्ठानमुपयुज्यत इति विभागः तत्रेदमा
गतं स्वस्य सदाचार्यकृत्यादिकं यत्संबंधादमुं नाथमुनिं प्रणमति नमिति॥ उक्तं चाचार्येणाचार्यसन्निपाते ह्याचार्यपरि
चर्योपसंगृह्योपसंजिघृक्षेदाचार्यः प्रतिषेधेदितरथा नुपाते प्रजाचास्य प्रकाशा इति आचार्यवंदनप्राधान्यं॥ अत्र
पुनः आचार्यवंदनप्रसंगसन्निधौ स्वाचार्येनिषेधादेव स्वाचार्यवंदनश्लोकनिर्माणाभाव इति सुसंगतमेतत्॥ भग
वद्भक्तिमत्स्वैर्हो लोकानुग्रहस्तमी आधाने नैव प्रकाश्यंते तत्स्वभावात्स्विषु क्रमात् वैराग्यपरभक्त्यादेस्तत्त्वज्ञानं प्रसा
धकं इति ज्ञापयितुं तस्य त्रिषु पद्येषु संग्रहः॥ तत्रापि पर्वभेदेन ज्ञानभक्त्योः परस्परं हेतुकार्यत्वयोर्ज्ञसौ दि धात्र २

स्तो॰भा॰ २ नमोऽचिंत्येति। अथ स्वगुरुपंक्तिः स्वयमभिवंद्य तेन तथाविधं परंपरानिबोधनार्थं पूर्वं स्वमुखेनोपकर्तृमेवात्र ग्रंथे निवेशः। अत्र नमः शब्दः प्रह्वी-
भावपरः आत्मनिवेदनपरो वा सतु प्रणिपातपूर्वक इत्युक्तं। दंडवत्प्रणमेद्भूमाविति। ऋजो गुरुसन्निधौ शरीरमर्थं प्राणं च सद्गुरुभ्यो निवेदयेत्
स इति विधानात्। नमःशब्दस्यात्मनिवेदनपरत्वमीश्वरसंहितायां मंत्रराजपदस्तोत्रे प्रोक्तं। नमस्कारात्मकं यस्मै विधायात्मनिवेदनमिति। गुणोदरीस
वेति मुपागतोऽहमिति वाभिप्रायेणाचार्यगुरोर्ज्ञानादिगुणगणोक्तिः। ज्ञानमिद्धस्य विद्याया विमुक्तये संज्ञायते येन तदस्तदोषमिथ्यादिष्टकर्मयोगपर्युत्त-
परस्वरूपादिज्ञानानंददैहिकज्ञानवानेव हि गुरुराश्रयणीयः। भिन्ननावं श्रितस्तद्वो यथा पारं न गच्छति। ज्ञानहीनं गुरुं प्राप्य कुतो मोक्ष- प
मवाप्नुयात्। इति व्यतिरेकनिदर्शनात्। वैराग्यं अन्यास्थिरत्वादिदोषदूषितेषु स्वर्गराज्यादिषु स्वात्मानुभवमात्रेण निःस्पृहत्वं। अचिंत्यत्वादि-
त्रिकं द्वंद्वात्सर्वत्वात्प्रत्येकमन्वेति। अस्मदादिभिः स्वरूपतः कारणतश्च विशेषतश्चापरिच्छेद्यमिहाशक्यत्वमेवाचिंत्यत्वं कुतर्कैरपकोत्तम-
२ शंकाया अद्भुतत्वमवगतो शास्त्रापिको जैत्वरत्याश्चर्यत्वम। अक्लिष्टत्वं स्वयमागतविज्ञानाः नित्यनिर्धर्मास्थितादिति वत्स्वाचीनसुरु-

नमोऽचिंत्याद्भुताक्लिष्टज्ञानवैराग्यराशये। नाथाय मुनयेऽगाधभगवद्भक्तिसिंधवे॥ १॥

नविशेषज्ञेन तपरावरगुरुप्रसादेनायत्नलब्धत्वं विरुद्धधर्मरहितत्वं वा ज्ञानादेरक्लिष्टत्वं जगदर्थतदाश्रये राशिशब्दः। अचिंत्यत्वादिविशि-
ष्टे ज्ञानवैराग्यराशी यस्येति बहुव्रीहिर्वीतदातु ज्ञानवैराग्ययोः प्रत्येकं विषयानंत्यमभेदमनुसंधाय राशित्वरूपणं। नाथशब्देन नाममोक्षावद्धो-
क्तिः पूर्णोक्तेः कार्यकारीति न्यायेन श्रीरंगनाथ इति नामधेयं स्वापेक्षितास्तिद्धेयाचनीयत्वं चाभिवक्षितेस्वामी भवेकं भगवदनन्यार्हशेष-
त्वं तदिष्टविनियोगसिद्धस्याचार्यशेषत्वस्य न विरुद्धं पाप्रकृतमेव चानन्यशेषत्वं [illegible] परिहार्यं नाथाय नाथमुनये
इति वक्तव्ये मानेप्येवं विवक्षायाह्या मुनये भक्तिप्रेरिततया प्रकृष्टमनननशीलाय तु अत्र यत्लिंगत्व वाचिना भगवच्छब्देन सर्वशेषिणः परभक्ति-
योग्यत्वं व्यज्यते महनीयविषये प्रीतिर्भक्तिरेतदुक्तेः सनकादिभिरशक्यतलस्पर्शत्वमगाधत्वं द्रोणादिभिर्दोभ्यत्वं च भक्तेरपारत्वा-
शोष्यत्वादिराप्यायनायतदाश्रयत्वे सिंधुत्वोक्तिः। च भक्तिं वा सिंधुत्वेन रूपयित्वा बहुव्रीहिः। अत्र सूक्ष्मगुणं चित्र परिष्कारभूतेषु वक्ष्यगुणे

स्थापितः क्रमः गुरोर्ज्ञानादिसंपत्तिस्तस्याः सर्वाभिराशिषा। लोकोपकारिता शुक्ले सतोऽप्यपुनरुक्तता। करणत्रयसंबंधप्रतिबंधप्रशांत
ये। त्रिवारमंगलाचार इति केचित्प्रचक्षते। अन्ये मंगलभूयस्त्वसिद्ध्यै मंगलकर्मणः। क्रियासमभिहारोयमिति सा कृत्यमस्य धुः इत्थमे
व विभागेन तत्त्रयं तद्विद्ध्ये। पराशरनमस्कारो वक्तृत्वश्च रणनतिः। सर्वानेतान् निभागवतवंदनानिरूपकतयानुष्ठीयंते
कृत्स्नस्यापि प्रबंधनिर्माणस्य भगवद्गुणवंदनरूपत्वादिति। भगवद्वंदनं साद्यं गुरुवंदनपूर्वकं श्रीरंगार्करव्याख्युक्तं स्वदत्तेहि
विशेषतः इहलावदाचार्यदेवेति तैत्तिरीयाः। आचार्यवान् पुरुषो वेदेति छांदोग्याः। यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ इति का
गः इहसाम्नायेतु यथा भगवत्येवं वक्तरि हि तिस्मृतिरिति। अमानित्वदीनू समकज्ञानहेतुत्वप्रक्रमगीयते च। आचार्योपासनं शौचं
स्थैर्यमात्मविनिग्रह इति। आचार्यप्रसादस्य च सर्वसिद्धिहेतुत्वं बोधायनीये पुराणसमुच्चये प्रोक्तं। देववत्तायां गुरोर्ध्येवमंत्र-
स्यापि प्रकीर्तनात्। ऐहिक्यामुष्मिकी सिद्धिर्द्विजस्यास्ति न संशय इति। सिद्धिरिह ज्ञानादिसमस्तापेक्षितलाभः उक्तं च जयाख्य
संहितायां। यस्माद्देवो जगन्नाथः कृत्वा मर्त्यमयीं तनुं। मग्नानुद्धरते लोकान् कारुण्याच्छास्त्रपाणिना। तस्माद्भक्तिर्गुरौ का-
र्या संसारभयभीरुणेति। देवमिवाचार्यमुपासीत नमश्शाचार्येभ्यः नमः आचार्येभ्यः आचार्यः ज्ञापिताततस्य ज्ञानं जवह-
होच्यते। मंत्रे तद्देवतायां च तथा मंत्रप्रदे गुरौ त्रिषु भक्तिः सदा कार्या सा हि प्रथमसाधनं। मंत्रनाथं गुरुं मंत्रं समत्वेनाभि-
पूजयेत्। चतुर्गेयं गुरुं त्यक्त्वा शास्त्रगमं तु यः स्मरेत्। हस्तस्थमुदकं त्यक्त्वा घनस्थं सोभिवांछति। सुजयं तु गुरुं त्यक्त्वा
दुर्जयं य उपासते। बद्धं त्यक्त्वा धनं मूढो गुप्तमन्वेषति क्षितौ। इत्यादिवचनजातमिह द्रष्टव्यं। स चाचार्यवंशो ज्ञेयो भवति
आचार्याणामसावसावित्याभगवत्तः इत्याम्नातात्। आचार्यजननमपि कर्तव्यं तत्राचार्यस्याप्यधिकं प्रीयतां। अतो गुरो-
रपि गुरुं नाथमुनिं प्रणमति॥

स्तो॰भा॰
३

पुनरपि तमेव स्वनिष्ठाप्रज्ञानजन्मपरमोदारवैशिष्ट्यं भावयन् पुनश्च भूयोपि नमो नमस्ते नम इति न्यायेन प्रणमति भूय इति तव प्रियस्य भ
य गवतः स्वविवक्षितो यो जयितुमिच्छतः स्तोत्रं तावदास्तां तस्मादप्यसाधारणेनोपकारकतमो नाथमुनिरेव नंतव्य इति भावः आश्रितसंरक्षणव्र
तान्नच्युत इत्यच्युतः तदभिप्रायेणैव हि स्वयमुक्तं भगवता सत्वानच्युत पूर्वोहं सत्वं वेत्थ द्विमत्कृतमिति। सत्वमिह भवसागरः दुःखेषु भवसायेषु।
सत्वमस्तीतु जंतुष्विति नानार्थपावात्। न कर्मणा वर्द्धते नो कनीयान् न साधुना भूयान्नो असाधुना नो कनीयानित्यादिश्रुतेः। ज्ञानबलैश्वर्या
देरच्युतत्वं वा विवक्षितं यस्मात्स्वाश्रितान् अवने अवते सोऽच्युत इत्यपि निरुक्तत इति व कृत्वीहि। भक्तिश्च तत्त्वज्ञानं चेति द्वंद्वः। तत्त्वज्ञानं मनोरोपि
ताकारेण बुद्धिः भक्त्यादियोगाद्रस्यावबसाविश्रंभनीयत्वं सूचितं। अपरिमितत्वमिह भक्तिज्ञानयोर्विशेषणं तयोरमृताब्धित्वरूपणं संजीवन
त्वस्वयंप्रयोजनत्वमहत्त्वादिकं जनार्थम्। परिवाहः तटाकादिसंरक्षणार्थमधिकजलापगमनं प्रवाहः तद्धेतुभिः प्रसन्नमधुरशीतलत्वादिस्व
४ भावैरित्यर्थः अत्रानुरक्ताख्यातुमशक्यत्वं प्रकारांतरप्रयोजनांतरनैरपेक्ष्यं च दृष्टांतेन व्यज्यते। वचोभिः परतत्त्वपरमहितपुरुषार्थविषयैः

भूयो नमोऽपरिमिताच्युतभक्तितत्त्वज्ञानामृताब्धिपरिवाहशुभैर्वचोभिः। लोकेऽवतीर्णपरमार्थसमग्रभक्तियोगाय नाथमुनये यमिनां वराय ॥३

3 स्वरूपोपायप्राप्यविषयैर्वा न्यायतत्त्वादिप्रबंधनिवेशितैरमीभिर्वाक्यैः संस्मराम्यस्य वाक्यानि संस्कारक्रमसंपन्नानीत्यादिप्रकारेणानुसंधेयः
लोके सात्विकजने यद्वा भगवद्विमुखैर्धिष्ठिते भुवनेऽस्मिन्नहं तं हेतदिति भावः। यथा परमपदान्निजयो भगवानवतरति तथा नाथमुनेरस्थितो भ
क्तियोगस्तदाश्रितेषु मत्स्यते प्रिप्रायेणावतरणत्वोक्तिः सर्वं डुरारोहसीमावस्थितत्वं च सूचितं परमार्थशब्दः स्वयंप्रयोजनत्वमकैत
वत्वं वाभ्यनक्ति भक्तेः फलं प्रत्यव्यवहितत्वसाधनत्वज्ञापनाय समग्रत्वोक्तिः भक्तिश्चासौ योगश्चेति भक्तियोगः प्रीतिरूपापन्नध्यानमुपा
योवा योगसंनहनोपायध्यानसंगतियुक्तिर्विनिश्चिता इति नैर्धर्तुका। भक्तिशब्द इह वचनपरिवाहमूलतया पूर्वोक्तं तत्त्वज्ञानमुपलक्षयति भक्तियो
गस्यापि तत्त्वज्ञानात्मकत्वसूचनार्थं वा पृथगनुक्तिः नाथमुनिशब्दस्य निबंधनात् गुरुपादांबुजं ध्यायेद्गुरुनाम जपेत्सदा। गुरुवार्त्तांक
थां चैव गुरोरन्यं न भावयेत्। इत्यादिकमनुसंधीयते यमिनां भगवदेकनियतकरणत्रयवर्तिनां वराय सेव्यश्रेष्ठाय वा। एतत्तु भगवद्वि ३
षययोगारूढत्वाद्यास्यं यत्नीयते। योगिनामपि सर्वेषां मद्गतेनांतरात्मना। श्रद्धावान्भजते यो मां स मे युक्ततमो मत इति ॥३॥ ॥

ल

एवंभगवत्परत्वानुभवजनितभक्तिहर्षप्रणम्यतमेवावतारसौलभ्यहेतुभूतगुणविशेषानुभवजनितस्नेहप्रसर्पणंनमस्तस्मैनमस्सौनमस्तेस्तुसहस्रकृत्व

तस्मैनमप्रति इतिवदादरातिशयात्पुनर्नमस्यति । तस्मैस्वयोगमहिम्नाप्रत्यक्षित तत्त्वत्रयइतिसुप्रसिद्धायमधुजितःशाङ्गर्वविशेषकृतदुष्कृद्विनाशनंहिरण्य

गर्भादीनांपरित्राणंतद्रूपस्यादित्यपिरजस्तमःप्रभृतिसर्वदोषनिरासार्हत्वंवेदाहरणहेतुत्वेनधर्मसंस्थापनंचसूचयति । अंघ्रिशब्देनशुभाश्र

यविग्रहवत्तानुरागातिशयहेतुत्वंतत् अपिशेषभूतस्योद्देश्यत्वमांघ्रीश्चोपदृश्यते सरोजत्वरूपेणमंगलत्वंभोग्यत्वंचव्यंजितं । मधुजितःअयंतुतत्त्व भगवदंघ्रिवले न ४

ज्ञोप्यतातिशयेनजितइतिभावः तद्विषयेतत्त्वज्ञानंतत्स्वरूपमेवमुमुक्षूणांसिद्धोपायःप्राप्यंचेतियाथार्थ्यबुद्धिःअजायमानोनवकुंठाधिकायतेत

स्यधीराःपरिजानंतियोनिंअजोपिसन्नव्ययात्माजन्मकर्मचमेदिव्यमित्यादिवृक्तमवतारहस्यज्ञानंवाअनुरागइहावतारप्रकाशितगुणविशे

षकृतःसुहृन्मित्रादिष्विवस्नेहःसेवकस्यस्नेहश्चभक्तीच । स्नेहोमेपरमोराजन्त्वयिनित्यंप्रतिष्ठितः भक्तिश्चनियताचीरभावोनान्यत्रगच्छति

तत्रसंबुद्धिद्वयसूचितस्नेहगुणभेदनिबंधनतयाविभज्यते । ज्ञानानुरागयोर्महिमामहत्त्वंतत्सातिशयःप्रकर्षःतस्यान्तसीम्नेपरमावध

॥तस्मैनमोमधुजिदंघ्रिसरोजतत्त्वज्ञानानुरागमहिमातिशयान्तसीम्ने । नाथायनाथमुनयेत्रपरत्रचापिनित्यंयदीयचरणौशरणंमदीयं २

धिभूतायअन्येयोगिनएतदपेक्षयाऽर्वाचीनास्तेषांज्ञानादिकंसमुद्रगोष्पदमस्तीतिवदेतस्यज्ञानादावंतर्गतंभवतीतिभावः भगवदनुरागा

तिशयोयस्मात्दर्शितरवैराग्यातिशयोप्यर्थसिद्धः । अत्रयुक्तेःपूर्वावस्थायांज्ञानभक्त्याद्युत्पादनमुखेनशरणत्वंपरत्रतुमुक्तिदशायांस्वरिवच्छे ।

षित्वेनविशिष्टप्राप्यत्वमनेनवातत्रापिप्राचीनमहोपकारस्यसाक्षात्कारेणविशेषप्रतिपत्तिविषयतयेत्याशयः । अपिचेतिवद्यापीसंप्रयमनन्तनिरिक्ता । पति

प्र र्थं । यद्वाप्रत्रशरणत्वासंभवादितिहेपार्श्वीयमपिशाघ्रःनित्यभावदात्मभावि यदीयचरणेयस्यचरणाविततर्थः । शरणमिति । यथामंगलमुपाय

त्वप्राप्यत्वरक्षितत्वादीनांतत्रेणोपादानमत्रपरत्रेसुमाभाप्तन्वयात् । उक्तंचगुरोरपिप्राप्यप्रापकभावेनसंबन्धयतीयत्वंसाक्षात्तत्रेगुरु । २

रेवपरंब्रह्मगुरुरेवपरागतिः । गुरुरेवपराविद्यागुरुरेवपरंधनं । गुरुरेवपरःकामोगुरुरेवपरायणं । यस्मात्तदुपदेष्टासौतस्माद्गुरुतरो ल

गुरुःअर्चनीयश्चवंद्यश्चकीर्तनीयश्चसर्वदाऽध्यायेज्जपेन्नमेद्भक्त्याभजेदभ्यर्चयेन्मुदा । उपायोपेयभावेनतथैवशरणंत ठ

ज्यो त्स्ना मल प्रकाश नान्मशोः दोषप्रहरस्वगइ् ज्ञानं नात्मनःक्के यतेतथा २

तात्पर्यान्तत्रतत्सप्रयोगः आत्मभावानुभवसकलसतदुपायानुष्ठायिनः कातिरितिचेत् ब्रह्मविद्यानुप्रवेशेनअपवर्गविश्रां
तोतदभावेचतदनुगुणेतिभाष्यादि पुरुषार्थमैश्वर्योर्थिनांतत्त्वदर्शनमोक्षार्थमेववा। अपवर्गः सर्वकर्मातंतोछेदेननिःश्रेयप
विद्यानिवृत्तिलक्षणापरिपूर्णब्रह्मानुभवः। सचाकर्माधीमस्वाम्यनिमतस्वछंदशेषवृत्तिपर्यंतः। ईश्वरशेष्यरानुभवः यथानक्रियते
यथोदपानकरणाक्रियतेनजलांतरं। सदेवनीयतेव्यक्तिमसतः संभवः कुतः। तथाहेयगुणध्वंसादवबोधादयोगुणाः
प्रकाश्यंतेनजन्यंतेनित्याएवात्मनोहित इत्यादिकमनुसंधेयं। तदुपायास्तदधिकारिसाध्याःप्रवृत्तिलक्षणंधर्मंप्रजापति
[illegible]रथाब्रवीदिति। निवृत्तिलक्षणंधर्ममृषिर्नारायणोब्रवीदितिविभज्योक्ताः। सिद्धरूपाश्चदेवतादयः सर्वसाधार
णाःप्रधानेनसिद्धेनयस्तुयथाविधकर्मद्वयवशीकरणीयतयानित्यसिद्धः पुरुषोत्तमएवगतावपितछन्दोग्येतितत्संवा
धिनीगतिरर्चिरादिकाधूमादिकाचयथासात्विकराजसतामसभेदभिन्नातथाचगीयते। ऊर्ध्वंगच्छंतिसत्वस्थाइत्यादिग
तिपर्यंतानांसमानामिहद्वंद्वउचितःगतयःसमानांप्रकाराइतिकेचित्। उक्तैरेवानुक्तंविरोध्यादिकमप्यत्रोपलक्षतउदा
रः। मैत्रेयादीनामस्मदादीनांचेप्रत्युपकारादिकमनपेक्ष्यतत्त्वज्ञानमहानिधिप्रदातायेनचैवमाशास्यते। पुराणंतेप्रदि
शतुभवज्ञानशेषपुंसांहरिरपिजन्मजरादिकांसमृद्धिं। अज्ञानाययेज्ञानंदद्याद्धर्मोपदेशनं। कृत्स्नांवापृथिवींदद्या
त्तेनतुल्यंनतत्फलं ब्रह्मविद्याप्रदास्यदेवैरपिनशक्यते। प्रतिप्रदानमथवादद्याद्भक्तितआदरात्। विद्यादानंतपोधि
कमित्यादिकमनुसंधेयं॥

नुगुणकामलकवचितगहनगभीरविततग्रंथनिर्मात्र, तया तत्त्वत्रयादिविवेकस्य अत्र बंधेषु कृत्स्नसाध्यत्वाच्च ॥ २४

तु तूष्णीमपि तत्स्मीशमाचार्यगुणयंत्रितः कमात्स्व स्वक्तस्तौ यो लुंब प्रगुणमत्र कृष्यते । अत्र हि प्रबंधनिर्मालवारापरंपरयोपकौन्नमप्यकीर्षु रका ४१

भा२ धर्मशास्त्रकृतां प्राचुर्येण कर्मगोपबृंहणप्रधानत्वान्नारतादिकृतां मनुष्यत्वकंचुकितमहापुरुषोन्नयपरायामिश्रप्रकृतात्पर्ये संक्षि

प्तसाविकोपबृंहणप्रधानत्तमपुराणनिर्माणेनास्मत्संतोषकारकं पराशरं प्रणमति । तत्त्वेनेति । तत्त्वमिह्यानारोपितं रूपं यथावस्थिताका

रेणेत्यर्थः ॥ यच्छब्देन प्रजापतिनिष्ठावसिष्ठवरप्रदानजधव्यपरदेवतापारमार्थ्यज्ञानवत्तया प्रसिद्ध इति व्यज्यते । अत्र चिदचि

च्छब्दौ गोवलीवर्दन्यायात् चेतनाचेतनविशेषपरौ चेतनविशेषाव बद्धमुक्तादयः ॥ अचेतनविशेषास्त्रिगुणकालादयः ईश्वरश्च

ह्मेतरसर्वनियंता स्वयमन्यैः स्वसंकल्पमंतरेणानियाम्यः पुरुषोत्तमः अत्र स्वस्वरूपावाप्तिपूर्वकत्याज्योपादेयविभागार्थं

॥ तत्त्वेन यश्चिदचिदीश्वरतत्स्वभावभोगापवर्गतदुपायगतीरुदारः ॥

प्रकृत्यात्मभ्रमस्वतंत्रात्मभ्रमनिवृत्त्यर्थं च त्रयं तोक्तं भोक्तृभोग्यनियंतृकमेण निर्दिष्टः । तत्स्वभावाः तेषां त्रयाणां साधर्म्यवै

भोक्तृत्व२ धर्म्यस्वरूपाः धर्माः तत्र कारणत्वादयः साधर्म्यरूपाः परतंत्रत्वैकपरार्थत्वं शेषत्व सर्वशरीरित्वादयो वैधर्म्यरूपाः भोग इह स्वर्गराज्या त२

दिसुखानुभवः स्वात्मानुभवानंदश्च तस्मिन् मुक्तिशब्दं केचिदुपचरंति । नहि नित्यं किंचित्स्वात्मानंदमात्रानुभवरूपं कैवल्यम

स्ति चतुर्विधा मम जना भक्ता एव हि ते स्मृताः । तेषामेकांतिनः श्रेष्ठास्ते चैवानन्यदेवताः । अहमेव गतिस्तेषां निराशीः कर्मकारि

णां ये तु शिष्टास्त्रयो भक्ताः फलकामा हि ते मताः सर्वे च्यवनधर्माणो प्रतिबुद्धस्तु मोक्षभागिति विशेषणात् । किंच सर्वकर्मविनि

र्मोक्षे मुक्तिभेदः कथं भवेत् । कर्मैकदेशयोगे तु न मुक्तिर्मुक्तिभेदवत् । न च कैवल्यवादिनां मुक्तिरेवेति युज्यते । स्वमात्रभुक्ति ।

चिरानुभूतत्वेपि अपूर्वं नित्यानु[illegible]भाव्यमित्यर्थः वैदिकार्थविषयतया विद्यांतरेभ्यः पुरातनत्वां[illegible] पुरातनत्वं च चतुर्मुखेन प्रथमं पुराणं कृतं पश्चा द्वेदाः कृताः
स्तो॰ भा॰ तावन्मोहस्तथा सुखं। यावन्न याति शरणं त्वामशेषाघनाशनमित्यादिषूक्तं। भोगापवर्गार्थिनां। निश्चनदुपायमभ्येयथाश्रुतिं प्रतिपत्त्या पुरा तस्मात्पुराणस्य प्राचीनत्वं
५ मी॰२ णसंहितावक्ता भवान् भविष्यतीति वैष्णवलिंगयोरुक्तमाह। निरमितं पुराणरत्नमिति। न केवलं सर्वं प्रसिद्धवंशप्रवर्तनमात्रमिति भावः २
पुरैव विद्यमानेपि संप्रति नवत्वात् पुराणत्वम्। यथोक्तं वायवे। प्रथमं सर्वशास्त्राणां पुराणं ब्रह्मणोदितं। अनंतरं च वक्त्रेभ्यो वेदास्तस्य विनिःसृ
ता इति॥ नन्वेवं सति पराशरः पुराणरत्नं निरमिमीते केति कथं स्यात्। शैवे च पुराणे। ब्रह्मा चैव तु वेदानां पुराणानां च प्रदर्शकः इत्युक्तं सत्यं त
थापि तत्रैव प्रत्येकं पुराणसंहिताविशेषप्र[illegible]णेतारः प्रतिपाद्यंते। ब्राह्मं तु ब्रह्मणा प्रोक्तं पाद्मं तेनैव शोभनं पराशरेण कथितं वैष्णवं
मुनिपुंगवाः शैवं शैलादिना॥ प्रोक्तमित्यादि मात्स्ये॥ वराहकल्पवृत्तांतमधिकृत्य पराशरः। यत्राह धर्मानखिलान् विज्ञोस्तद्वै
ष्णवं विदुः यत्तदीशानकल्पस्य वृत्तांतमधिकृत्य च कलितं लैंगमित्युक्तं। पुराणं ब्रह्मणः स्वयमित्यादि॥ अष्टादशपुराणानां कर्ता स
त्यवतीसुत इत्येतदपि प्राक्सिद्धसर्वपुराणप्रवर्तनविशेषाद्वा सर्वपुराणसारोद्धारेण यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्व
चिदित्युक्तमहाभारतकरणाद्वा निर्वाह्यं तत एवस्तूपचर्यते॥ अष्टादशपुराणानि कृत्वा सत्यवतीसुतः भारताख्यानमखिलं च
क्रे तदुपबृंहणं। लक्षेणैकेन यत्प्रोक्तं वेदार्थपरिबृंहणमिति भविष्यन्मात्स्यपुराणयोरुक्तमपि नेतव्यं इदं तु पुराणं॥ सर्ग
श्च प्रतिसर्गश्चेत्यादिना पंचलक्षणमुक्तं॥ तस्य रत्नत्वरूपेण नाशारहितत्वस्थिरत्वसुग्रहत्वसुरसत्वभोग्यत्वप्रकाश शो॰ ६
त्वमंगलत्वमहर्घत्वप्रजत्वमानहेतुत्वादीनि व्यज्यंते॥ अत्र संमानदं रत्नं स्थिरं भोग्यं प्रकाशकं। महार्घं मंगलं मान्यं सु
रसं सुगृहं नृणां। एतस्य परिग्रहातिशयः सर्वसंमततस्मादुक्तप्रकारमहौदार्यविशिष्टाय इतिहासपुराणाभ्यामित्यादि ना
मनुप्रतिपादितवेदनयप्रशमनाय मुनिवराय परब्रह्ममननशीलश्रेष्ठाय तेवैरणीयायेति वा मुनिनिर्दिष्टनवरोसौ ते
नायमपि प्रत्युपकर्त्रेति भावः। पराशरं मुनिवरमिति पुराणारंभकोक्तिस्तव कामं मुनिवरपराशरशब्दाभ्यां स्वप्रकृस्या
पकत्वं प्रतिपक्षप्रतिक्षेपकत्वं च प्रकाश्यते परान् बाह्यकुदृष्टीन् प्रमाणतर्कशानैराशृणातीति भावः॥५॥ ॥ ५

अष्टादशपुराणानि अष्टौ व्याकरणानि च ज्ञात्वा सत्यवतीसूनुः श्चक्रे भारतसंहि
तामिति२

संदर्शयन् सम्यक् दर्शयन्नुक्तं तेनात्मा अर्थोस्मिन्नास्ति विशदं प्रकाशयन्नित्यर्थः लक्षणहेत्वोः क्रियाया इति शतृप्रत्ययः चिरन्निर्वृत्तमपि तस्य
स्वरूपमिव दर्शयन्निति न्यायात् दर्शनशास्त्रस्यौपचारिकत्वदभिप्राये नहि स्वरूपतेन तस्मै मृदितकषायतमसः पारं दर्शयति भगवान् सनत्कुमार
इति । ततेन संदर्शयन्नित्यनेन श्रोवाच्यतातत्त्वतो ब्रह्मविद्यामिति प्रयुक्तं सूचयते । एवं सर्ववेदसार भूतसकलार्थोपबृंहणपरत्वं ख्यापि
तं । अत्र जीव-स्वभावतदवान्तरभेदाः पिंडः पृथग्यतः पुंसः शिरः पाण्यादिलक्षणः पुमान्न देवो न नरः निर्वाणमयमेवायमात्मा ज्ञानमयो
मलः आत्मा शुद्धोक्षरः शान्तो निर्गुणः प्रकृतेः परः अप्रत्ययविनानिवर्तंते बाद्धाक्षरचितकाः यद्वै प्रशंसति स्तरंय इत्यादिभिरुक्ताः अचित्स्व
रूपस्वभावतद्भेदाः त्रिगुणं यज्जगद्योनिरनादिप्रभवाप्ययम् क्ताः प्रक्तेतथैवान्ये रूपेकालस्तथापरः कलामुहूर्तादि मयश्च कालोन
यद्विभूतेः परिणामहेतुरित्यादिभिर्दर्शिताः ईश्वरस्वरूपादिकं तु अविकाराय शुद्धाय परः पराणां परमः शान्ताविष्णुरशेषसमस्तकल्या
णगुणात्मको आत्मभावं नयत्येनेन तद्ब्रह्म ध्यायिनं मुने विकार्यमात्मनः शक्त्या लोहमाकर्षको यथा इत्यादिषु द्रष्टव्यं । भोगसंस्थानैश्व भोग्य

मी ॥ संदर्शयन्निखिलमित्तपुराणरत्नं तस्मै नमो मुनिवराय पराशराय ४॥

गोपकरणादिकं भुवनकोशादिषु प्रपंचितं योगिनाममृतं स्थानं स्वात्मसंतोषकारिणामित्यनेन स्वात्मानुभवपरं णं स्थानमप्युक्तं सनन्
कादियोगिनाममृतं स्थानं स्वात्मसंतोषकारिणामपि स्थानं भवतीत्यर्थः अत्र पूर्वापरवाक्यप्रवृत्तिप्रकारः परामर्शनीयः स्वधर्ममनुवर्ति
नामिति कैवल्यचिंतानां योगिनां एते वर्ची नाः तत्स्थानमथ पितृणे च । एकांतिनः सदा ब्रह्मध्यायिनो योगिनो हि ते । तेषां तत्परमं स्थानमिति तर
धिकस्थानं तरोक्तेः । अपवर्गस्य स्वरूपं निरस्तातिशयाह्लादसुखभावैकलक्षणा । भेषजं भगवत्प्राप्तिरेकांतात्यंतिकी मता । तत्राव
भावमापन्न इत्यादिभिरुक्तम् । अत्र कर्मकृतवैधर्मस्यात्यंतनिवृत्तिर्विवक्षिता भोगोपायाश्च ध्रुवादिस्थानं वेदाहताः अपवर्गोपायश्च भ
क्तियोगः तद्रूपप्रवृत्तये चैकांतं संतनिष्कामनिःस्पृहान्तद्ध्यानं प्रथमं चिह्नं गैर्भिर्व्याप्यते नेत्यादिषु द्रष्टव्यः प्रपत्तिरूपं । तावदार्तिस्तथावांछा

वि

स्वरूपवैभवमपिज्ञानवैराग्यप्रवृत्तयाश्लाघ्यस्येतिविशेषणंनः। नाथमुनिसंप्रदाययाजामस्माकंगोत्रकूटस्थस्यसात्विकस्याभिप्रायेणकुलपतिरित्युक्तिः। ई
श्वरस्यपरमाचार्योपिसर्वेषांसाधारणः। अयंतुअस्मद्साधारणइतिभावः। योगरहस्यप्रदर्शितारंरकुलशेखरत्वात्प्रपतित्वोक्तिः। वकुलाभिरा
मंश्रीमदित्युभयत्र ... तंस्वभावस्यसौमनस्यमंगलत्वेविवक्षितेपरत्वनिर्णयहेतुत्वंतत्स्वबंधस्थिरपरिमलस्यरचनार्थंतदानन्तसात्विकजनप्र
युक्तैःसपर्यार्थंवकुलकुसुमैरभिरामंवैष्णवत्वसाम्राज्यचिह्नैः श्रीमत्त्वाश्रितानांतादृशसंपत्प्रदानयोग्यंचसतुनागवरंश्रीमानितिवत्। भगव
त्सेवोद्यतत्वंवाश्रीमत्वंतदुक्तप्रकारंनिरतिशयभोग्यत्वनिरपायशरण्यत्वाभ्यांप्रसिद्धंअंघ्रियुगलंतत्पमातरराहित्येनान्योन्यसदृशंदेवता
द्वन्द्ववत्श्राविनन्ततोद्देशंप्रणमामिप्रकर्षपूर्वकंप्रह्वीभावेननजामीत्यर्थः। नित्यानुवृत्तिविवक्षयावर्तमानव्यपदेशः। मूर्ध्नेतिकेवलंवाङ्मात्रेण
पिमनसासमस्तिष्कः प्रणामः स्यादंजलिंमस्तकेन्यसेत्। प्रणमस्संपुरःस्यात्हृदयेंजलिमर्पयेत्। प्रकांगंसंपुरंकुर्यात्सर्वांगनमस्क्रियेत्यु
क्तमस्तिष्कसंपुटाहिमात्रेणनेतिभावः। नमस्कारप्रकरणेचलक्षणापुनरयंजानुभ्यांचपाणिभ्यांशिरसाचेत्यारभ्यइत्येवंनमतिंसर्वैःकरणैः
र्नमतीत्युक्तं। तादृशोप्रणामश्चैवंप्रशस्यतेसर्वैःकरणैर्नमन्समयोभवति। समयोन्नमन्वामकारीभवति। आमकारीभगवन्तंप्राप्नोति। अयं

॥आद्यस्यनःकुलपतेर्वकुलाभिरामंश्रीमत्तदंघ्रियुगलंप्रणमामिमूर्ध्ना॥५॥

चमूर्ध्नाप्रणामश्चतुर्विधः तत्रपंचांगस्तावत्श्रीबौधायनेनोक्तः पदांगुलिभ्यांजानुभ्यांशिरसाचावनिंस्पृशन्। बद्धांजलिर्नमस्कुर्यात्सपंचांग
इतीरितइति। दंडागश्चपादौहस्तौप्रसार्येत्यादिनोक्तः। शांडिल्यस्मृतौनिधायदंडवद्देहंप्रसार्यचरणौकरौ। बद्धामुकलवत्पाणीप्रणामोदंड
संज्ञितः पादौशिरस्तथाहस्तौनिकुंचामुकजाकृतिः मनोबुद्ध्यभिमानैश्चप्रणामोष्टांगसंज्ञितः मस्तिष्कंसंपुटंचैवप्रह्वांगंचत्रयंबुधैः। कृतयोरन
योःकार्यमन्यथाविफलोभवेत्। इतिसात्वते। मनोबुद्ध्यभिमानेनसहन्यस्यधरातलेकर्मवचनचतुरःपादान्शिरस्तत्रैवपंचमं। प्रदक्षिणसमेतेनत्वे
वंरूपेणसर्वदा। अष्टांगेननमस्कृत्यउपविश्यायतोविभोरिति। संकर्षणसंहितायांतुसकृत्प्रणमविधौलजारोदरजान्वंघ्रियुगायान्नईगो
करौ। भूमौसंधायमनसा। वासुदेवमनुस्मरन्निति। करचरणजानुशिरःप्रभृतिद्वादशांगकश्चप्रणामोत्रद्रष्टव्यः। भगवतीवसम्यक्ज्ञानपूर्व
त्वपिभक्तिप्रकर्षादिकृताप्रणामाउपपद्यन्तेद्रविडोपनिषद्रसज्ञाथासम्यकुतं। सम्यक्स्तुतवंतामत्रशंकनीयत्वप्रसवः देवगुह्येषुचाप्येषु

अथ पराशरप्रबंधादपि वेदांतरहस्यवैशद्यातिशयहेतुभूतैः सद्यः परमात्मनि चित्तरंजकतमैः सर्वोपजीव्यै रूपरंहणैर्येकस्कविप्रभृति।
संप्रदायपरंपरया नाथमुनेरप्युपकर्तारं कालविप्रकर्षेपि परमपुरुषसंकल्पात्कदाचित्प्रादुर्भूय साक्षाद्दृष्टिसर्वोपदेष्टारं परांकुशमुनिं मा।
तापिताभ्रातेत्याद्युपनिषत्प्रसिद्धभगवत्स्वरूपं दृष्ट्वा प्रणमति। मातेति। उपजीव्यप्रबंधनिर्माणक्रमादत्र परांकुशनमस्कारक्रमः माता
पुत्रस्य श्रेयांसि कर्माण्यारभते यतः तस्मात्सुश्रूषानित्या आचार्यश्रेष्ठो माता गुरूणां मातेत्येके। पितुः शतगुणं माता गौरवेणातिरिच्यते इ
त्यादिषु मातुर्गौरवं प्रतिपादितं एवं माता भ्रातापितुः पुत्रो यस्य जातः स एव सद्गतिपिता प्रसिद्धगौरवः पुत्रतनयश्च यत्रानुरूपसंदंपत्यो
स्त्रिवर्गस्तत्र वर्त्तते इति धर्मार्थकामहेतुतयोक्तास्तनया। संदर्शनादिभिराह्लाददहेतवः सर्वावस्थायां संरक्षकाः पुन्नाम्नो नरकात्त्रातारः
या अपि स्यात्कुलेस्माकं सर्वभावेन यो हरिं प्रयाच्छरणं विष्णुं देवेशं मधुसूदनं। आस्फोटयंति पितरः प्रनृत्यंति पितामहाः वैष्णवो नः कुले जा
तः स नस्त्राता तारयिष्यतीत्यादिभिः स्वगुणेन पितृपंक्तेरपि निस्तारकाः प्रसिद्धाः एकस्मिन्नेकस्मिन्नेव कुलेस्याध्युपकारस्य समुदितः इत्य

॥माता पिता युवतयस्तनया विभूतिः सर्वं यदेव नियमेन मदन्वयानां॥

त्रिप्रायेन वकुवचनं विभूतिः दासभृत्यधनरत्नादिरूपशेषभूतो नियंतव्यवर्गः धारकपोषकविभूत्याभावेषु सर्वोक्तमपि खिलं संदर्पसत्स्यं
स्यात् सर्वमन्यदामुष्मिकपुरुषार्थतत्त्वादिनादिपत्रसिद्धं ह्यैतत्स्वाविकसमाजेष्विति भावः एकमेव दृष्टादृष्टरूपं सर्वमुपजीव्यमासीदे
वविधतत्त्वदपेक्षणीयं नास्तीत्यवधारणाभिप्रायः माता पित्रादिशब्दविवक्षिताः प्रियप्रवर्त्तकत्वादयस्तत्स्वभावास्तदंघ्रावुपचर्यंते निय
मेन सर्वदा मुक्तावित्यर्थः यद्वा अवधारणनियमाभ्यामाचार्यस्य सर्वेश्वरादपि तत्प्रसादार्थमतिशयेन सर्वदा वकुमंतव्यत्वमुच्यते। ईश्वरस्य
पाहि अनादिरपि आचार्यरूपामपेक्षते लीलारसमहचरिताचक्षुराचार्यकृपा तु तं निग्रहमपि शमयति। अनुग्रहैकरसा च ईश्वरस्य कश्चिद
धोनिनीवापिविद्यते। असाधु कारयित्वं च आचार्यस्य तु सर्वज्ञो नितिनीषे वसव साधुवकारयति आविनोनिहिता शास्त्रार्थमाचारे स्थापयिष्य
ति। स्वयमाचरते यस्मात्तस्मादाचार्य उच्यत इति स्मरणात् भगवतो देवत्वादिषु विपरीतोपदेशोप्यस्ति अस्य तु सर्वत्र यथार्थवादित्वमेवेत्यादि

याभीभिरविवेकानामित्यादिवत्। त्वमेव माता चेत्यादि त्वमेव सर्वं मम देव देवेति ह्यनुसंधीयते पिता त्वं माता त्वमित्यादि वक्ष्यति। स्वध्यायेनार्चयति भग
वंतं संयमेन च वाग्भिः प्रशस्ताभिर्योनिर्विष्णुरीडितः वाग्यज्ञेनार्चितो देवः प्रीयतां मे जनार्दनः आराधयिष्णुः कृष्णं वाचं जिगदिषामि यां तया भ
ससमासि न्याप्रियतां पुरुषोत्तमः एष मे सर्वधर्माणां धर्मोधिकतमो मतः यद्भक्त्या पुंडरीकाक्षं स्तवैरर्चेन्नरः सदा। आदरेण यथा स्तौति धनवंतं
धनेच्छया। एवं चेद्विश्वकर्तारं को न मुच्येत बंधनात्। वाजिका याहरिं स्तौति। इत्यादि प्रसिद्धं स्वशास्त्रया वाचिकीं परिचर्यां करिष्यामीत्याह। स्तोष्यामीति पर
मार्थगुणवर्णनेन सेवेष्य इत्यर्थः तथा च द्रविडभाष्यं नासतः स्तुतिरुपपद्यत इति आह स्म वरदाचार्याः कथमसता गुणेन कथितेन स्तुतिर्भवती
ति मुख्यस्त्वोपचारस्तस्या वाक्यस्य विष्णु णस्थानविधाने स्तुतित्वं स्यादिति भावः गुणवद्भिन्नगुणाभिधाने हि स्तोत्रमाहुर्मनीषिणः सर्वेश्वरेश्वरः
कृष्णः प्रोच्यते यदि पंडितैः तथापि सत्यमेवोक्तं। भूतार्थकतमा स्तुतिरित्यादिकं तु गुणारोपणे न च न स्तुतिर्लोके दृष्टप्रकारेणोच्यते। स्तोष्यामीत्यत्र
प्रधानस्तुतिफलं सर्वे शेषिभूतस्तुत्यगामीति हृदयं नः सर्वोक्तविद्यासंतानजातानां यथा सर्वदेशकालवर्तिनां सात्विकानां कुलधनमापदर्थं संचयं।

॥ स्तोष्यामि नः कुलधनं कुलदैवतं तत्पादारविंदमरविंदविलोचनस्य ॥ ६ ॥

त्वमयत्नलभ्यमनुष्ठेयोपायमिति भावः। कुलदैवतं अनतिलंघनीयमाराध्यमुपायनिर्वाहकं प्रजप्रदं फलं च तत् कुलप्रकारपरत्वसौलभ्यपरमावधिभूतं।
पादस्यारविंदत्वरूपणेन लक्ष्मीकरग्रहणयोग्यत्वकांतिसौकुमार्यादिकं व्यज्यते पुरुषे पुष्करेक्षणे जितं ते पुंडरीकाक्ष यश्च देवो मया दृष्टः पुरा पद्माय
तेक्षणः मत्स्यः कमललोचनः महावराहः स्फुटपद्मलोचनः रामो राजीवलोचन इत्यादि प्रसिद्धमनुग्रहशीलत्वसूचकमाह। अरविंदलोचनस्येति
अरविंदवत्सौम्ये लोचने यस्य स तथोक्तः मम योगिनां महति कुले जन्म सदाचार्यस्वीकरणमुपकारेषु प्रामाण्ये तदभिमतविकीर्षया वीचीतरंगहत्ति
क्रमेण प्रारीप्सितपरमात्मस्तोत्रं कस्य भगवत्कटाक्षविशेषस्य फलमिति भावः उक्तं च मोक्षधर्मे जायमानं हि पुरुषं यं पश्येन्मधुसूदनः सात्विकः स तु
विज्ञेयः स वै मोक्षार्थनिश्चितः पश्यति नं सम दृष्टिगोचरत्वे च दोष उक्तः पश्यते नं जायमानं ब्रह्मा रुद्रो यवा पुनः रजसा तमसा चैव मानसं समभिप्लुतं।
मिति किंच त्वद्देशिनमपि तु क्ष्यमाणेतज्जलितदीत्तिदृष्ट्यायेन दोषपूर्णकर्तुमरविंदत्वैत्स विकाशशोभादिमता लोचनेन भूयोपि माकल्पयति
इति धन्यत्वमात्मनोनुसंधत्ते। उक्तं हि श्रीविष्णुधर्मोत्तरे रुद्रगीतायां नाधन्यः केशवं स्तौति नाधन्योर्चयति प्रभुं नमस्त्यधन्यो न हरिं नाधन्यो वेत्ति माधवमिति ७

एवमुपकारकान्प्रणम्य ममाक्रान्तसंपरंपरया वा सर्वोपकारकस्य भगवतस्तत्संप्रदायप्रदानमहोपकारकृतत्तया च आचार्यप्रियचिकीर्षया च
प्रेरितः तत्संप्रसादसंधुक्षितत्वस्वसंबंधानुसंधानजनितज्ञानभक्तिपरीवाहरूपे स्तोत्रे प्राप्य प्रापकरूपं प्रतिपाद्यसंग्रहं सर्वकं प्रवर्तते । यन्मूर्ध्नी
ति । यच्छब्देन सर्वशास्त्रप्रसिद्धं सर्वान्तरत्वं स्मार्यते । यन्मूर्ध्नि मे भातीत्यास्वार्थगर्भमत्वं तन्निः कृष्टस्य मे मूर्ध्नि पंगोरुपरि गंगानिपातवद् यत्नोपस्थित
मनुभवयोग्यं भवतीत्याश्रयणसौकर्यानुगुणशौलभ्यसौशील्यवात्सल्यादिस्वचकं च श्रुतिशिरस्सु च भाति । सर्वाधिकत्वसर्वेश्वरत्वकत्वहेयप्र
तिभटत्वसमस्तमंगलगुणास्पदत्वपरमप्राप्यविशिष्टतया सर्वेषु वेदान्तेषु प्रकाशत इति भावः । प्राप्तेराश्रयणस्य चैकतयात्र उपयुक्तसौल
भ्यप्राधान्यविवक्षयास्य मूर्ध्नि भानस्य प्रथमोपादानं नीचोत्तमस्थानप्रवृत्तिभ्यां स्वाभाविकसातत्योज्ज्वलस्य नद्युपचयापचयोमेतत्र तद
भिव्यक्तिरात्मनामित्यभिप्रायेण वा वेदेकवचनमत्र कारः श्रूयते नित्यमित्यपौरुषेयत्वं दर्शयता श्रुतिशब्देन स्मृतिविषयस्य प्रमाणस्यानित्यानिर्दोषत्वं ।

॥ यन्मूर्ध्नि मे श्रुतिशिरस्सु च भाति यस्मिन्नस्मन्मनोरथपथः सकलः समेति ॥

स्मृत्यते शिरश्शब्देनाभिलितात्मन्नवहितप्रवृत्तज्ञानस्य परमार्थोक्तिः बहुवचनेन सहन्वयाध्यायस्थापितं सर्वोपनिषदैकार्थ्यमभिप्रेतं ।
विप्रकीर्णेषु बहुषु वेदान्तेषु क्रमादनेकविधपर्वपक्कगर्तसंसारेण कथंचिद् दृष्टव्यम् । इदानीं सदाचार्यप्रसादेनैकत्र रूढप्रयत्नहृदयमासीदिति का
ठिन्यं चु भासते । भातीति वर्तमानव्यपदेशो नाविरोधवलत्वेन कृतिनिर्बाधत्वमपि प्रकाश्यते । यस्मिन्स्वप्राप्युपायतया स्वीकृते अस्मदित्यादि ।
नासर्वप्रकारनिरवधिकभोग्यत्वोक्तिः । अस्मच्छब्दं इह ज्ञानुबंधिसहितत्वात्मपरः । परावरात्मपुरुषार्थविवेकस्वयंशास्त्रभावोयमिति ।
भावः । मनोरथपथः । इच्छामार्गः । आफलप्राप्त्यनुस्यूतोऽभिलाषइत्यर्थः । सकलः ऐहिकामुष्मिकप्राप्यप्रापकरूपसर्वविषयः । समे
ति सम्यक्संभूय वा गच्छति न च विषयभेदात् दृक्शिरस्क इति भावः ॥

स्तो·भा·
८

तथा चामनन्ति वक्ष्यमाणे न ते विष्णो जायमानो न जातो न देव महिम्नः परमन्तमापेति। ऋक् चोत्तररामायणे ब्रह्मणा त्वं हि लोकगतिर्देव न त्वां केचन जानते
रूपे मायां विशालाक्षी तव सर्वे परिग्रहामिति। मोक्षधर्मे च भृगुभरद्वाजसंवादे प्रजापतिं च रुद्रं चाप्यहमेव सृजामि वै। तौ हि मां न जानीतो मम माया
प्रमोहिताविति। ब्रह्मरुद्रसंवादे च न च शक्यं त्वया द्रष्टुं मयान्यैर्वापि सत्तम सगुणो निर्गुणो विश्वो ज्ञानदृश्यो ह्यसौ स्मृतः तवान्तरात्मा मम च ये चान्ये
देहिसंज्ञि ताः सर्वेषां साक्षिभूतोसौ न ग्राह्यः केनचित्क्वचिदिति। विष्णुधर्मे न यस्य रूपं न बलप्रभावौ न च स्वभावः परमस्य पुंसः विज्ञायते स
र्वपितामहाद्यैस्तं वासुदेवं प्रणतोस्मि नित्यमिति। वैष्णवपुराणे यन्नायं भगवान्ब्रह्मा जानाति परमं पदं। तन्नतास्म जगद्धाम सर्वं सर्वगतो
ऽच्युतं यं न देवा न मुनयो न चाहं न च शंकरः जानन्ति परमेशस्य तद्विष्णोः परमं पदमिति। वाराहे स्वयं चाह यदेतत्परमं ब्रह्म वेदवादेषु प
ठ्यते स देवः पुण्डरीकाक्षः स्वयं नारायणः परः अद्यापि मां न जानन्ति रुद्रेन्द्राः सपितामहा इति। भगवद्गीतासु च नाहं प्रकाशः सर्वस्य योगमायास

॥ कर्तुं तदीयमहिमस्तुतिमुद्यताय मह्यं नमोस्तु कवये निरपत्रपाय ७ ॥

वस्थितः मूढोयं नाभिजानाति लोको मामजमव्ययमिति। मां तु वेद न कश्चनेति च। अत्र महिमा लौवशीकराप्तुमीतुं न शक्यत इत्युक्त्वा महिम
स्तुतिमिति वचनात्स्वस्य चापलं भूम्ना कार्त्स्न्येन महिमस्तुतावुद्योगः स्तूयते। तदीयमहिमस्तुतिं तदसाधारणमहिम्नः प्रकर्षकथनमित्य
र्थः। तदीयस्य स्तोतव्यतया प्रकृतस्य पादारविन्दस्य माहात्म्यवर्णनमिति वा। उद्यताय उद्युक्ताय मह्यं महायोगिभिः। सर्वैरप्यशक्ये प्रवृत्ता
य तस्मै नम इति स्वात्मनि गमेवात्राक्षेपोक्तान्यानि ह्यर्थसाहसिकाः मायोनन्तस्या इति चोपालंभः। नमोस्त्विति सामान्योक्त्या सर्वैः क्रि
यमाणं नमो मह्यमेवास्त्विति मनेनवक्रमस्य परमशोषीडस्युक्तेन सर्वैश्वर्येणेति व्यजते। कवये क्रान्तदर्शिने। अपरिच्छेद्योपि परिच्छेदं
प्रत्यनेत्रस्यं तेपि स्तोतुमशक्ये सर्वप्रकारवर्णनकौतुकेन सर्वेषां विडंबनं रस्यावहायेति भावः। अनन्ते भगवति स्ववाचां परिमि
तिबावबद्धमुद्दामत्यल्पहं। सर्वैरात्मनः परिहसनीयतां न जानामीत्यभिप्रायेणाह निरपत्र पायेति॥ ॥ ॥ ८

अथस्तोत्रारम्भमुपगमप्रीतेन तत्स्तवनकौतुकेन भगवता स्तुतिसामर्थ्याय स्तोतव्यस्य स्वरूपगुणविभूतिषु कार्त्स्न्येन प्रकाशितासु
सर्वैरपि विषयानुरूपस्तुतेरशक्यत्वात्तुष्ट्यानिवृत्तो योगस्तत्परतमात्मानमुपालभते तत्त्वेनेति। तत्त्वेन यथावस्थिताकारेणेत्यर्थः
कार्त्स्न्येनेति वाभिप्रायः। यस्य त्रिविधपरिच्छेदरहितत्वान्निरवधिकगुणविभूतिमत्त्वेन प्रभुत्वादिप्रसिद्धस्य महिमा तत्र निरुपाधिक
सर्वज्ञसर्वनियमनशक्त्यादिरूपः तस्य दुरवगाहत्वादिना ब्रह्मेन्द्रादिभिः तादृशस्य महिम्नो अतिक्षुद्रविषयाविष्टानांशःशी
अनं ४ करणत्वेन कस्मिंश्चिद्गुणे एकैकमात्रं वा शक्तो न मातुं वाचा मनसा च परिच्छेत्तुमशक्य इत्यर्थः। श्रूयते हि। यतो वाचो निवर्तन्ते अ

॥ तत्त्वेन यस्य महिमार्णवशीकराणुः शक्यो न मातुमपि सर्वपितामहाद्यैः ॥

प्राप्य मनसा सह। यस्यामतं तस्य मतं मतं यस्य न वेद सः। अविज्ञातं विजानतां त्वमेव त्वां वेत्थ योऽसि सोऽसि। यो अस्याध्यक्षः परमे
व्योमन् सो अङ्ग वेद यदि वा न वेदेत्येवं विभूतिद्वयैकदेशोऽपि मातुं न शक्य इत्यवगन्तव्यम्। ननु ईशानः सर्वविद्याना
मीश्वरः सर्वभूतानामीश्वरो ज्ञानमन्त्रीश इत्यादिप्रसिद्धवैभवः सर्वज्ञनामा सर्वज्ञः। तस्याप्युपदेष्टा सर्ववेदवर्त्त
नाधिकृतश्च पितामहः। सनन्दनादयोऽपि ब्रह्मभावनयान्विता इत्युच्यते। वेदाश्च सर्वोपदेष्टारस्तत्कथमेते मातुमशक्ता इ
त्यत्राह। अपि सर्वपितामहाद्यैरिति। लोकोत्तरज्ञानैरपीत्यभिप्रायः। अत्र कालत्रयवर्तिभिरपि भाव्यम् ॥ ॥ ॥

स्तो·भा·

९

वेदशब्देनास्मदाद्यतीन्द्रियपुरुषार्थतदुपायकत्वं मन्यते। चतुर्मुखमुखाः चतुर्मुखप्रधानाः विदुः श्रेष्ठाः स्वमुखैर्वेदचतुष्टयप्रवर्तकत्वस्मा-
वनाय चतुर्मुखशब्दः सर्वैरपि यथावत्स्तोतुमशक्यं च भारतोक्तं। वर्षायुतैर्यस्य गुणा न शक्याः वक्तुं समेतैरपि सर्वदेवैः महात्मनः शंखचक्रासि-
पाणेर्विष्णोर्जिष्णोर्वसुदेवात्मजस्येति श्रीविष्णुधर्मे च। सत्वादयो न संती शे यत्र च प्राकृताः गुणाः। न हि तस्य गुणाः सर्वे सर्वैर्मुनिगणैरपि वक्तुं
शक्या वियुक्तस्य सत्वाद्यैरखिलैर्गुणैरिति वैष्णवे च पुराणे कालीसराश्राकुः न समर्थाः सुराः स्तोतुं यमनंतमजं प्रभुं। स्वरूपवर्णनं तस्य कथं
योषित्करिष्यति। स्त्रियोनुकंप्यास्सोनंगमनादीनात्कजंतवः यतस्ततोस्यदीनस्य कृष्णतामवतावरेति। वाराहे च। रुद्रगीतासप्ताध्याये चतु-

धू

१

वेदाश्चतुर्मुखमुखाश्च महार्णवांतः को मज्जतोरणुकुलाचलयोर्विशेषः॥ ७॥

र्मुखार्युर्यदि कोटिवक्त्रो भवेन्नरः क्वापि विशुद्धचेताः स ते गुणानामयुतैकमंशं वदेद्देववर प्रसीदेति। ननु स्वविषयस्य यथावद्व-
क्तुमशक्यत्वेपि चतुर्मुखादीनां न तत्तारतम्यमस्तीत्यत्र स्वाभिप्रेतमर्थमर्थांतरन्यासेनाह महार्णवांतरिति। अत्यगाधेस्मि-
न्कुलाचलस्याप्यमानां शोनस्यादिति भावः। अणुकुलाचलयोश्च मिथः परिमाणगुरुत्ववैषम्येपि मज्जनेनादृश्यत्वमविशि-
ष्टमिति तदभिप्रायेण को मज्जतोर्विशेष इत्युक्तं॥ ७॥ श्रीरामाय नमः। श्रीकृष्णाय नमः॥ श्रीगोपीजनवल्लभाय नमः॥ ॥ ९

अथवा पार्थनयाज्ञ्य: प्रभुणा प्रतिबोधित: प्रारीप्सितपरिमाणान्निवृत्त स्तोतुमीहवे। अत्र हि भगवता गुणोत्तरेषु गुरुष्वेव विश्वमेकथं चिन्तिवा
रितोपि विषयानुरूपस्तोत्रशक्तिजनितं वैमुख्यं परिहर्तुं वेदप्रभृतीनामपि स्वात्मात्मनश्च दीनानुकंपितादिगुणगणं प्रकाशयति समाहि
तं स्तोत्रे यावानर्थ इत्यादिनायात्वोचितप्रवृत्तनया सोपालंभं निवृत्तिं सिद्धान्तयति यद्वेति। अशक्तोपि स्तौमीत्यन्वय: अशक्तमप्रान्तं नीतं य
थावद्वक्तुं ज्ञातुं वाशक्य इति परोपकारार्थं श्रमावधि यथामति इत्युभयो रूपादानात् स्वमोक्तिरसामर्थ्यसूचनार्थं तेन चानुकंपितो योहमि
ति व्यज्यते। यथाह कालीय: सोहं ते देवदेवेश नार्चनादौ स्तुतौ न च। सामर्थ्यवान् कृपामात्रमनोवृत्ति: प्रसीद मे इति। यथामतीति मतिरस्य
सूचनार्थं यथोच्यते स्वबुद्ध्या निवर्तन्ते मां न गरिमक्षितिक्षयात् मतिक्षयान्निवर्तन्ते न गोविंदगुणक्षयादिति। यथामतिवचनं महाभारते
प्रोक्तं। यथाज्ञानं तु वक्ष्यामि पुरुषं तं सनातनं एतस्यैव महत्वं हि स चैक: पुरुष: स्मृत: महापुरुषशब्दो हि बिभर्त्येक: सनातनं इति। वाश-

॥ यद्वा श्रमावधि यथामति वाप्यशक्त: स्तौम्येवमेव खलु तेपि सदा स्तुवंत:॥

ब्द: प्रतिपन्ने स्तुतिशक्तिक्षयात् स्तुतिशक्तावपि स्तोतव्यविषयज्ञानमांद्यादानिवृत्तसंभवं व्यनक्ति। अशक्त स्तौमीति वर्तमाननि
र्देश: स्तु॥ वर्तमानसामीप्यपर: आस्यापिचाकास्य स्तुत्यात्मकत्वं वा सूचयति॥ एवमेव श्रमावधीत्युक्तप्रकारेणेत्यर्थ:। एवकारे-
ण नि:शेषस्तुतेरसंभव स्थिरीक्रियते। अन्यथा परमात्मस्तुतिरेव न स्यात्। ततस्तद्विधानि सत्यस्तवप्रिय: स्तोत्रं स्तुतिरिति-
तन्नामभिश्च निरर्थकानि भवेयुरिति भाव:। खलुशब्द: श्रुत्यादिप्रसिद्धिं द्योतयति तेपि लोकोत्तरज्ञानशक्तिमंतोपीत्यर्थ:। सदा
स्तुवंत:॥ स्वरूपनित्यतया वेदानां सदा स्तोतृत्वमुक्तम्। तथानादिप्रासो विप्रन्यत्र इत्यात्मानां नित्यसूरीणां च स्यात्। चतु-
र्मुखादीनां तु प्रवाहनित्यतया यावदधिकारं यथाकालमविच्छिन्नं स्तोतृत्वं एवं सर्वेषु कल्पेष्वपि विवक्षितं॥ ॥ ॥

स्तो॰ भा॰
१०

अथैवं यथा मनोरथं तव सर्वे समीहितं सिद्ध्यैव तु इति करास्यं तं भगवंतं प्रति शाचीनब्भूतोपकारप्रख्यानेनायतनानुग्रहस्यानाश्चर्यतामा
ह ॥ नावेक्षस इति ॥ अथवा अल्पशक्तेः स्वसक्तस्योचितात्तिशायवचनेन यजितं भगवत आश्रितवात्सल्यं केनचित्के मुखेन स्यापयन्निव सर्वं चार
णत्वोपयोगितया पंचविध्यमाणा सर्वं स्मात्पर । त्वकारणलक्षणो नोपदिष्टं तत्त्वत्काष्ठा प्राप्तं सोऽलम्प्रचारः ॥ अयमेव शारीरकशास्त्रारंभघटिता
त्तोत्रारंभः कारणत्वं नियंतृत्वं सुहृत्त्वं स्वामिता हरेः वात्सल्यमिति पंचैते के गेयाः इह सद्गुणाः ॥ अत्रेक्षमाणमिह तदैक्षत सोऽकामयत ईक्षते
र्नाशब्दं गौणश्चेन्नात्मशब्दादित्यादि श्रुतिसूत्रस्थापितस्यानुग्रहसंकल्पः ततस्त्वदवेक्षणरूपहेतुत्वभावादित्यर्थः ॥ भुवनानीति कृत्स्नकार्य
परममूनीति तत्तत्प्रमाणसिद्धं भोक्तृत्वभोग्यरूपकार्यजातानामन्याशक्यकरणवैचित्र्याभिप्रायं ॥ यतो वा इमानि भूतानि जायंते जन्मा
द्यस्य यत इति श्रुतिसूत्रयोरिह शाखा तत्सामान्येन समर्थानि कारणाभावे कार्याभावः स्यादिति भावः ॥ प्रभो स्वाधीनत्रिविधचेतनाचेतनस्वरूपस्थि

10 ॥ नावेक्षसे यदि ततो भुवनान्यमूनि नालं प्रभो भवितुमेव कुतः प्रवृत्तिः ॥

तिप्रवृत्तिभेदस्य भवितुमुत्पत्तुं सत्तायोगितया स्थातुं च एवकारो भवनस्य परसंकल्पनैरपेक्ष्यशंकां वारयन् प्रवृत्तेस्तेनहेतुकैमुत्यमुद्घाट
यति ॥ एवं लब्धसत्ताकानां सत्ताहर्तृविकारप्रवृत्तिः स्वत्वदीक्षणमंतरेण न स्यादित्याह कुत इति ॥ प्रवृत्तिरिति ॥ स्पयते हि कोह्येवान्यात्कः प्रा
ण्यात् यदेष आकाश आनंदो न स्यादिति ॥ अंतर्यामिब्राह्मणादिकं सर्वमिहानुसंधेयं ॥ उक्तं च स्वयमेव मोक्षधर्मे ॥ यत्किंचिद्दृश्यते लोके
सर्वं तन्मद्विचेष्टितं ॥ अन्यो ह्यन्यं चिंतयति स्वच्छंदं विदधाम्यहमिति ॥ अत्र च परमकारणविषये विकल्पसमुच्चयान्यतमभावाद्यसंभवा
त् ॥ मतिसामान्यन्यायेन कारणवाक्यानि सर्वाणि त्वय्येककंगानीति व्यतिरेको न्यास्यते कारणत्वोक्तेर्य वयो ब्राह्मणमित्यादिष्वितास्व
तरमंत्रोक्तं शरणत्वमप्यत्र कृष्टं ॥ एवं भोगमोक्षार्थप्रवृत्तौ पयिककरणकलेवरप्रदानादिप्रकारेण स्पष्टः ॥ ॥ ॥ १०

न

नकेवलं मम विशेषस्तोतृबुद्धेर्मान्तिशयेन शीघ्रं त्वदनुकंपाफललाभाग्मम्मैवाधिकारः प्रकृष्यत इत्याशयेनाह । किंचेति । अत्राधिकारस्य ज्ञा
वेन सह तत्प्रकर्षः समुन्नीयते । एष स्तोतेति । भगवति स्तुतिवैमुख्यनिवृत्तिसामान्येऽप्यन्तःशक्तेरेकराशित्वेनोपादानं स्तोतुः सामर्थ्याति
शयः शायत्वत्कृपामांद्यकारणमिति सूचयन्नाह । अत्यतिशयेन तेनुकंप्य इति ते सर्वविद्भिर्वेदैस्तु रिमिस्वमितं स्तूयमानं तथा स्तुतं
नरनिरपेक्षस्य दीनानुकंपनस्वभावस्य यथाधिकारं करुणोपयुक्तं यत्किंचिन्माजमात्रापेक्षत्वेति भावः केन तस्यानुकंप्य इति शंका
यां शक्त्यतिशयवैपरीत्यसैवानुकंपातिशयहेतुत्वरूपं विशेषं सूचयति । अपि त्विति परिश्रमेणाशक्त्या भक्त्या च स्तोतुं ज्ञातुं वानर्हं तया

किं चैष शक्त्यतिशयेन न तेनुकंप्यः स्तोतापि तु स्तुतिकृतेन परिश्रमेण । तत्र श्रमस्तु सुलभो मम मंदबुद्धेरित्युद्यमोयमुचितो मम चाब्ज
नेत्र ९ ॥

सर्वप्रकारव्याकुलत्वेनेति भावः । तत्र तथातीत्यर्थः स्तुतावितिवा । मम तु श्रमः सुलभ इत्यन्वयः श्रमस्तु सुलभः न तु शक्त्यतिशयप्रसं
ग इति वाभिप्रेतं मंदबुद्धेरलसत्वादित्यर्थः । इति शेषः त्वर्थः उद्यमप्रकारो वा ॥ अयमुद्यमः स्तोष्यामि स्तौमीति श्लोकद्वयोक्तस्तो
त्रोपक्रमः मम च मममैवेत्यर्थः ॥ अविरुद्धोप्ययं समुच्चयार्थो मंदमतेर्ममेति कथितपदावर्तिनेऽहि रणगर्भोदरेति तिशयितवि
धेयतात्पर्यालंकार एव त्वत्करुणा त्वं त्वहं तु दृष्टुपुरश्शो तत्राधिकारातिशयं च प्राप्तः एवमनुग्रहातिशयप्रजकेनावलोक
नदानेन भूयो विमांपाययेन स्तुतिरियमविघ्नेन निष्पाद्यत इत्यभिप्रायेणाह ॥ अब्जनेत्रेति ॥ ॥ ॥

वनु हिरण्यगर्भः समवर्तताग्रे न सन्नासच्छिव एव केवलः इन्द्रो मायाभिः पुरुरूप ईयत इति । ब्रह्मादीनां मुक्तस्य यं कामं कामयते सोऽस्य संकल्पादेव स
मुत्तिष्ठतीति सर्वजगत्कारणत्वं प्रतीयते । तदेतत्कथं परब्रह्मलक्षणं कथं च तद्योगात्परमपुरुषस्य स्वामित्वादीनत्राह । स्वाभाविकेति । स्वाभा
विकत्वमिह अनन्याधीनत्वं तेन कर्मोपाधिकं दुःखमिश्रमनित्यं चतुर्मुखाद्यैश्वर्यं व्याहन्ति । अनवधिकातिशयत्वमुत्कर्षावधिरहितोत्कर्षवत्त्वं प
रास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया चेत्यत्र परत्वस्वाभाविकत्वे शक्त्यादिषु सर्वेषु सक्त इति भावः । एताभ्यामेव परिमितप
राधीनं च मुक्तानित्यैश्वर्यमपि व्यवच्छिद्यते । ईदृशमीश्वरत्वं हि तवैव विश्वपतित्वात्मेश्वरत्वादिश्रुतेः । प्रशासितारं सर्वेषां शास्ता विष्णुरशे
षस्येत्यादिश्रुतिशतेभ्यः । स्वयं च गीतं । मत्तः परतरं नान्यदिति । एष धाता विधाता च सर्वेषां प्राणिनां प्रभुः परं हि पुंडरीकाक्षान्न भूतं न भविष्यदित्या
दिवचनात् । अत्र नारायणेत्यनेन कारणवाक्येषु पार्श्वशंकागोचराणां सदसद्व्याकृतब्रह्मात्महिरण्यगर्भशिवाकाशप्राणादिशब्दानां कया

॥स्वाभाविकानवधिकातिशयेशितृत्वं नारायण त्वयि न मृष्यति वैदिकः कः॥

चिद्धस्यानन्यपरत्वात् हितार्थसात्त्विकोपबृंहणानुगुणमहोपनिषन्मयीनारायणीयसुबालोपनिषदादिपठितनारायणशब्दोदितमहापुरुषवि
षयत्वं केवलं तत्त्वनिर्णयप्रवृत्तनारायणानुवाकतात्पर्येण भगवत एव सर्वपरविद्यावेद्यत्वं तत्र तच्छब्दवाच्यत्वं च प्रकाश्यते ॥ अस्य
च नाम्नो निरुक्तिभेदैः शारीरकाध्यायचतुष्टयविवक्षितकारणत्वनिर्बाधत्वोपायत्वप्राप्यत्वान्यभिव्यनक्ति । एवमाप्ततमानेकश्रुतिवचना
निचयेन प्रतिपाद्यते । तत्र तावन्मनुः आसीदिदं तमोभूतमित्यारभ्य आपो नारा इति प्रोक्ता आपो वै नरसूनवः । ता यदस्यायनं पूर्वं तेन नारा
यणः स्मृतः । यत्तत्कारणमव्यक्तं नित्यं सदसदात्मकम् ॥ तद्विसृष्टः स पुरुषो लोके ब्रह्मेति कीर्त्यत इति ॥ बृहस्पतिश्च ॥ नारायणः परो
ऽव्यक्तोऽव्यक्तमव्यक्तसंभवं ॥ अंडाद्ब्रह्मा समभूत्तस्तेन सृष्टमिदं जगदिति ॥ स्कन्दः ध्यायेन्नारायणं देवं स्नानादिषु च कर्मसु ब्रह्म
सलोकमवाप्नोति न चेह जायते पुनरिति ॥ व्यासः आलोक्य सर्वशास्त्राणि विचार्य च पुनः पुनः ॥ इदमेकं सु ॥ ॥ ९

स एव श्रीकीनरमतेत्वात् दिनाभिप्रेतं विश्वसृष्टुं प्रयुक्तं दयमानत्वं सूचयति। निसर्गसुहृदि सर्वसामान्यत्र: सर्वोपकारप्रवृत्तप्रकारनिरपेक्ष-
हितैषिणीत्यर्थः सुहृत्त्वस्य नैसर्गिकत्वं स्वाभाविकी ज्ञानबलक्रिया चेत्यत्र स्वरूपणक्रियायाश्चापिकत्वोक्त्या सिद्धं। अत्र प्रभुशब्देन सुहृत्त्व-
हेतुत्व सर्वस्य प्रभुमीशानं सर्वस्य शरणं सुहृदिति श्वेताश्वतरवाक्यं सूचितं। त्वयि न हि त्वदन्यः कश्चिदेवं प्रमाणसिद्ध इति भावः। सर्वज-
न्तोरित्येतत् काकाक्षिन्यायात् परत्राप्यन्वेतव्यं पतिं विश्वस्यात्मेश्वरं स कारणं करणाधिपाधिपः प्रधानक्षेत्रज्ञपतिर्गुणेशः पतिं पतीनां
परमं परस्तात्। एष भूतपतिरेष भूतपाल इत्यादिप्रसिद्धं हि। सर्वस्वामित्वं एतत्त्वं सर्वं सर्वेषां स्वार्थोपकारकत्वे सर्वस्य च तदिष्टविनि-

॥ एवं निसर्गसुहृदि त्वयि सर्वजन्तोः स्वामिन्न चित्रमिदमाश्रितवत्सलत्वं ॥१९॥

योगानर्हत्वे हेतुभूतं। न चित्रं नाद्भुतं इदं स्फूर्तिवैगुण्यानादरेण स्तोतरि मयीश्रीतिरूपमित्यर्थः स एव वात्सल्याख्यो गुणः। सर्वा-
विशेषेण कवत्स्यानुक्तः। अंगुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठति। ईशानो भूतभव्यस्य न ततो विजुगुप्सत इति॥ उपदृंहितं चरि-
पूर्णमपि वत्सल इति। इदमाश्रितवत्सलत्वं न चित्रं संप्रतिहि स्तोत्रं प्रेरयतस्ते मन्मुखोदितस्तुतिश्रवणेन जगद्व्यापारविहारसफलः।
संपद्यत इति भावः। अत्र स्फूर्तिवैमुख्यनिवर्तनादिलक्षणविजयसंतोषभगवदुक्तिप्रयुक्तिरूपतात्पर्योक्तात्याहिवेत्स्ययथा मम त्व-
यि वात्सल्यं यथा च मुग्धभाषितं पित्रोरिव मे भवन्मुखागतस्फूर्तिवचनश्रवणकौतूहलमिति तं प्रत्याह नावेहस इति ॥१९॥

स्तो॰भा॰
१२

12

रूपयान्न लिख्यंते। त्वयि सर्वे वेदा यत्पदमामनंति सर्वे वेदाः। यत्रैकं भवंति। नतास्म सर्ववचसां प्रतिष्ठा यत्र शाश्वती वेदे ऽश्वर्यं सर्वैरहमेव वेद्यः
वेदे रामायणे चैव पुराणे भारते भरतर्षभ॥ आदौ मध्ये तथा चांते विष्णुः सर्वत्र गीयते। नारायणपरा वेदा इत्यादिभिः सर्ववेदावेद्यतया प्रसिद्ध
स्यैर्क्ति सर्वकारणत्व सर्वस्वामित्वज कृष्णेन मप्राप्ति न सहते वैदिकः वेदप्रमाणक इत्यर्थः वेदैः प्रत्युतिब्राह्मणापितृदेवमनुष्याणां वेदः चक्षुः
सनातनः श्रुतिस्मृती तु विप्राणां चक्षुषी द्वे विनिर्मिते इति स्मर्यते वैदिकशब्देन सर्वे देवाः सपितरो ब्रह्मायाश्चाऽद्य मध्यमाः विशेषः सकाशाद्
त्वन्या इयंवै वैदिकी श्रुतिरिति॥ वाराहवचनं। वेदवेद्यो ऽस्ति भगवान् वासुदेवः सनातनः गीयते च परो वेदैर्यो वेद इः स वेदविदिति कौमेच
वनं च सत्यते॥ अत्र चोत्तरेषु वाक्येषु किंशब्दः हे पार्थ कोनमृष्यती स नेनेन भगवत्सारम् असहमानस्य वेदबाह्यतया पापिष्ठत्वं भज्यते यथो
क्तं प्राजापत्यस्मृतौ नारायणं परित्यज्य हृदिस्थं चतुरीश्वरं यो ऽन्यमर्चयते देवं परवृत्यासपापभागिति। महाभारते तीर्थरदूक विशाचवा
क्यं। ये द्विषंति महात्मानं न स्मरंति च केशवं। न तेषां पुण्यतीर्थेषु गतिः संसर्गिणामपि सप्तर्षिसंवादे विष्णुं ब्रह्मण्यदेवेशं देवदेवं जनार्दनं त्रै

॥ब्रह्माशिवः शतमखः परमस्वराडिते तेपियस्य महिमाणेव विप्रभस्ते॥

लोकस्थितिसंहारसृष्टिहेतुं निरंजनं। अधातारं विधातारं जगद्गुरुं विहाय च भजंतस्नान्यं विराश्नेनं करोति यइति भगवद्गीतापसुराःन्प्रक्रम्य
अहंकारं बलं दर्पं कामं क्रोधं च संश्रिताः मामात्मपरदेहेषु प्रद्विषंतो ऽभ्यसूयकाः तानहं द्विषतः क्रूरान् संसारेषु नराधमान्। क्षिपाम्यजस्रम
शुभानासुरीष्वेव योनिष्विति॥ ब्रह्मांडकौमे यो ऽन्यथा येन्यदेवं परत्वेन वदंति ज्ञानमोहिताः नारायणं जगन्नाथं ते वै पाषंडिनः स्मृताः श्रीभागव
ते भगवंतं प्रकृत्य तस्मादन्यं परत्वेन चेतयानो ऽप्य चेतनः सपाषंडीति विज्ञेयः सर्वकर्मवहिष्कृत इति। यस्तु नारायणं देवं समत्वेनाभिमन्यते
स तु तेनापमानेन नरकान्नातिवर्तत इति च॥ एवं ये तु सामान्यभावेन मन्यंते पुरुषोत्तमं। ते वै पाषंडिनो ज्ञेयाः नरकार्हाः नराधमाः यः पु
रः पितरं द्वेष्टि तं विद्यादन्यरेतसं। यो विष्णुं सततं द्वेष्टि तं विद्यादन्यरेतसं। विष्णुभक्तिविहीनो यः सर्वशास्त्रार्थवेद्यपि ब्राह्मण्यं तस्य न भवेत्त
स्योत्पत्तिर्निरूप्यतां॥ चतुर्वेद्यपि यो विप्रो वासुदेवं न विंदति वेदभारभराक्रांतः स वै ब्राह्मणगर्दभ इत्यादीनि द्रष्टव्यानि। अस्मिन्नारायणानु १२

तितुहिरण्यगर्भःसमवर्तताग्रेनसन्नचासच्छिवएवकेवलःइंद्रोमायाभिःपुरुरूपईयतइतिब्रह्मादीनांमुक्तस्यचस्वयंकामंकामयतेसोस
संकल्पादेवसमुत्तिष्ठतीतिसर्वजगत्कारणत्वंप्रतीयते।तदेतत्कथंपरब्रह्मलक्षणंकथंचब्रह्मोपात्तपरमपुरुषस्यस्वामित्वादीनांचाह
स्वाभाविकेपि।स्वाभाविकत्वमिहानन्याधीनत्वंतेनकर्मोपाधिकदुःखमिश्रानित्यचतुर्मुखाद्यैश्वर्यस्याहतिः।अनवधिकातिशयत्वमुत्कृ
ष्टावधिरहितोत्कर्षवत्वंपरास्यशक्तिर्विविधैवश्रूयतेस्वाभाविकीज्ञानबलक्रियाचेत्यत्रपरत्वस्वाभाविकत्वेशास्त्यादिषुसर्वेस्वकृतइ
तिभावः।एताभ्यामेवपरिमितपराधीनंचमुक्तनित्यैश्वर्यमपिव्यवच्छिद्यते।ईशित्वमीश्वरत्वंहितवेवविश्वपतित्वात्मेश्वरत्वादिश्रुतेःप्रसा
शितारंसर्वेषांशास्ताविष्णुरशेषस्येत्यादिश्रुतिशतैश्चस्वयंचगीतंमत्तःपरतरंनान्यदिति।।एषधाताविधाताचसर्वेषांप्राणिनांप्रभुः।परं
हिपुंडरीकाक्षान्नभूतंनभविष्यतीत्यादिचद्रष्टव्यं।अत्रनारायणेत्यनेनकारणवाक्यैकार्थ्यशंकागोचराणांसदसद्व्याकृतब्रह्मात्म
हिरण्यगर्भशिवाकाशप्राणादिशब्दानांकयाचिद्व्यापारावधितार्थैसात्विकोपबृंहणानुगुणमहोपनिषन्मैत्रायणीयसुबालोपनिष

।स्वाभाविकानवधिकातिशयेशितृत्वंनारायणत्वयिनमृष्यतिवैदिकःकः॥१२॥

दिपठितनारायणशब्दोदितमहापुरुषविषयत्वंकेवलतत्वनिर्णयबृहन्नारायणान्वाकतात्पर्येणभगवतएवसर्वपरविद्यावेद्यत्वंत।
त्रतत्रतत्तद्वाचकत्वंचप्रकाश्यते।अस्यचनाम्नोनिरुक्तिभेदैः।शारीरकाध्यायचतुष्टयविवक्षितकारणत्वनिर्बाधत्वोपायत्वप्राप्यत्वानिभाव्या
नि।एवमाम्नातमानेकश्रुतिवचनानिचान्योन्यप्रतिपाद्यंते।तत्रतावन्मनुः।आसीदिदंतमोभूतमित्यारभ्यआपोनाराइतिप्रोक्ताआपोवैनरसूनवः।
तायदस्यायनंपूर्वंतेननारायणःस्मृतः।यत्तत्कारणमव्यक्तंनित्यंसदसदात्मकं।तद्विसृष्टःसपुरुषोलोकेब्रह्मेतिकीर्त्यतइति।बृहस्पति
श्च।नारायणःपरोव्यक्तादंडमव्यक्तसंभवं।।अंडाद्ब्रह्मासमुद्भूतस्तेनसृष्टमिदंजगदितिदक्षः।ध्यायेन्नारायणंदेवंस्नानादिषुचकर्मसु
ब्रह्मलोकमवाप्नोतिनचेहजायतेपुनरिति।व्यासः।आलोड्यसर्वशास्त्राणिविचार्यचपुनःपुनः।इदमेकंसुनिष्पन्नंध्येयोनारायणःसदेति
नमोभगवतेतस्मैव्यासायामिततेजसे।यस्यप्रसादाद्वक्ष्यामिनारायणकथामिमामितिचवैशंपायनवाक्यं।ईदृशानिवचनान्येतानिविस्त

स्तो·भा· ते प्रजापतिपशुपतिसुरपतिप्रसिद्धिमंतः ततोऽप्यधिको मुकुन्दस्यापि शब्दस्तेषां तत्प्रभावप्रसिद्धमहत्त्वे सत्यपीति ज्ञापयन् ततोऽर्वाचीनेषु कैमुत्यं
१२ नक्रियस्ते तं दुर्दर्शं गूढमनुप्रविष्टं यस्तद्ड्रेश्मयाद्यमित्यादिस्वहृद्यत्वादिगुणकतयाप्रसिद्धमपि स्वात्मानं धनंजयधृतराष्ट्रादेरिव कृपयामेव
काशयत इति भावः महिम्नोऽर्णवत्वरूपणं अहृदयत्वापारत्वादिसूचनार्थं महिमार्णवविप्रुषः। अर्णवस्थानीयत्वन्महिमापेक्षया पृषत्स्थानी
यमहिमान इत्यर्थः यथाब्धेरनंतविप्रुतेस्तवविभूतेस्तवविभूतिरूपमहिमा समुद्रविंदवदिति तदेतदुक्तमद्वितीयश्रुतिव्याख्यानमुखेन संवि
त्सिद्धो। यथाचोक्तं नृपः स सम्राट्। अद्वितीयो भूतले इति तत्तुल्यनृपतिवारणपरं वचः नतु तत्पुत्रनप्तृतत्कलत्रादिनिवारणपरं तथा सुरासुर
13 नराकारब्रह्मांडशतकोट्यः क्लेशकर्मविपाकाद्यैरस्पृष्टस्यापि अखिलेशानुज्ञानादिषाड्गुण्यप्रसिद्धेरचिंत्यविभवस्यतः विष्णोर्विभूतिर्महिमा
समुद्रस्य विप्रुष इति ब्रह्मादीनां च सृष्ट्यात्तद्यप्रयुक्तविभूतिमत्त्वं वक्ष्यति। तदिह सब्रह्मेत्यादि समानाधिकरण्यमपि न स्वरूपऐक्यादिप्रयुक्तं
किंतु शरीरशरीरिनिबंधनमिति सूचितं किंच॥ अग्निर्वै देवानामवमो विष्णुः परम इति होतारो धीयंते॥ अग्निरवमो देवतानां विष्णुः परमः
इत्यध्वर्यवः तथा तद्ब्रह्म स आत्मा अंगान्यन्या देवता इति च। एतच्चोपबृंहितं अस्य यत्तांपरमं देवं दुर्विज्ञेयं ममापि च। नारायणस्तु पुरुषो विश्वरूपो
महाद्युतिः नारायणस्य चांगानि सर्वदेवानि वा भावत्। अन्यानि सर्वदेवानि तस्यांगानि महात्मन इति। तत्र ब्रह्मादीनां भगवद्विभूतिसागर
शीकरत्वं प्रसिद्धमिति॥ ११॥ अथ सा तत्र हिरण्यगर्भः समवर्तताग्र इत्यादेश्चाद्भ्यः संभूत इत्यादिनैकार्थ्यापि तत्रैव चतुर्मुखासाधारणप्रजा
पतिशब्ददर्शनात्। पुरुषशब्दस्य तु साधारण्येन चतुर्मुखेपि संभवात्॥ अंभस्यपारे इत्यत्रापि प्रजापतिश्चरति गर्भे अंतः स नो बंधुर्जनि-
ता स विधाता सूर्याचंद्रमसौ धाता यथापूर्वमकल्पयदिति प्रजापत्यादिशब्ददर्शनात्तत्रयमप्येतच्चतुर्मुखविषयं स्यादिति॥ अत्र तावत्
च ब्रह्मा नेशान इत्यादिरन्योन्यतरनिषेधसहितविशेषश्रुत्यवाधदर्शनात्। न च क्लेशविशेषमस्ति अथापि ब्रूमः अंभस्यपार इत्यत्र तावद्यमंत
समुद्रे कवयो वयंतीति समुद्रशायित्वं तदेकमव्यक्तमनंतरूपं विश्वं पुराणं तमसः परस्तादिति॥ तमसः पारे वर्तित्वं सर्वे निमेषा यज्ञिरे वि
द्युतः पुरुषादधि इत्यादिना वर्णपुरुषत्वं स आपः। प्रदुधे तु भे इत्यादिभिर्विविचित्रजगत्कारणत्वं य एनं विदुरमृतास्ते भवंतीति मोक्षप्रसिद्धेतु-
त्वं विश्वतश्चक्षुरुत विश्वतोमुख इत्यादिना सहस्रशीर्षत्वादिकं च प्रत्यभिज्ञायमानमस्यानुवाकस्य पुरुषसूक्तादिमहापुरुषगोच १२

केविश्वमेवेदंपुरुषइतिपूर्वोक्तसमानन्यायतया सब्रह्मसशिवइति सामानाधिकरण्येन ब्रह्मादीनां विभूतित्वश्रवणात् । त्रिमूर्त्यैक्यसा
म्योत्तीर्णाद्यवस्थांतररूपस्याणांप्रतिक्षेपसिद्धइत्यभिप्रायेणाह । ब्रह्माशिवइति । अनीश्वरतया संप्रतिपन्नेंद्रादिसमभिव्याहाराद्वाधावब्रह्मशि
वयोरप्यनीश्वरत्वंसूच्यते । शतमखशब्दःकर्मवश्यत्वप्रसिद्धिख्यापनार्थः ॥ अत्रचानुवाकेनतत्कारणोपासनवाक्यप्रविताः । शिवशंभ्वा
दिशब्दाः नारायणविषयाइतिज्ञापयितुंनारायणपरंब्रह्मेत्यादिभिस्तदनुवादेननारायणत्वविधानभूयस्त्वंसूत्रितं । लिंगभूयस्त्वात्तद्धिब
लीयस्तदपीतिहिरण्यगर्भःसमवर्त्तताग्रइतिवाक्यंअद्भ्यःसंभूतोहिरण्यगर्भइत्यष्टाविविष्णुमेवानुवाकांतरसंयोजनात् ॥ पुरुषसूक्तेका
र्योत्तरानुवाकप्रतिपाद्यमहापुरुषविषयं अत एवेंद्रीन्यायादत्रहिरण्यगर्भशब्दः कयाचिद्व्युत्पत्त्या भगवति च वर्त्तते शिव एव केवल
इत्यत्र शिवशब्दोपि यदा तमस्तन्न दिवा न रात्रिरित्यनुवाकान्वयात् ॥ सुबालोपनिषदुपदिष्टतमो मृत्युशब्दवाच्यप्रकृत्यधिष्ठातृभूतनारा
यणविषयः श्रुतिस्मार्गन्यायो योगात्तच्छिवेपि रूढस्य सोऽप्युत्कृष्य भगवति शाश्वतं शिवमच्युतमिति । एक एव रुद्र इत्यादेरुक्तप्रकारेणैक
ह्यविरुद्धवपुत्वाकारपरतया न पारम्योपपादकत्वं । इंद्रो मायाभिः पुरुरूप ईयते इत्यत्र इंद्रशब्दस्य तमिंद्रं गुप्तं तं रुद्र इत्यादिवत्कृतेपरोक्षे
नेनिद्रायुक्तोक्त्या सर्वदर्शी परमात्मविषयः प्रसिद्धेंद्रविषयत्वेपि नात्र सर्वकारणत्वकं वोक्तिः । न च तत्कृतमिंद्रः पुरुरूपत्वादेरन्यथाप्युपप
त्तेः । न किरिंद्र त्वदुत्तरो न ज्यायानस्ति वृत्रहन् इत्यत्र प्राकरणिककर्मविशेषापेक्षया स्तवनपरत्वात् त्वम्वादिषु त्वदुत्तरो नास्तीति विवक्षितं स
राड्भावास स्वराड्भवतीत्याम्नायानां मुक्तविषयः । स च स्वातंत्र्यवाचकोप्यकर्मवश्यत्वपरः । ईश्वरशरीरभूतात्मनां तत्पारतंत्र्यस्य याव
त्स्वरूपभावित्वात् । पारतंत्र्यस्यापि सत्यसंकल्पत्वमिच्छाविघाताभावादुपपद्य ॥ तेतेन संकल्पादेव तच्छ्रुतेः । अत एव चानन्याधिपतिरिति सू
त्रद्वयमप्यविरुद्धं मुक्तस्यैश्वर्यं च जगद्व्यापारवर्जमिति शारीरकान्तेस्थापितं परमत्वमिह ब्रह्माद्यपेक्षया तच्चाकर्मवश्यसज्ञानसंकोचा
दिरूपस्याणविरहाद्रूपशब्देन दर्शितं ब्रह्मवेद ब्रह्मैव भवतीत्यादिकमपि परमं साम्यमुपैतीति मम साधर्म्यमागता इति श्रुतिस्मृत्यनुसारात् वै
लक्षण्यं वामनमालभेत स ईमानो विष्णुरेव भूत्वेमान् लोकानभिजयतीत्यादिवत् तत्साम्याभिप्रायमेव तस्य च संकल्पाभिमतसृष्टिपरेच्छानु
गुण्येन परिमितविषया सर्वलोकानुसंचरणश्रुतिश्च न जगद्व्यापारार्था इति शब्द इह सब्रह्मा सशिव इत्यादिवाक्योपात्तप्रकारसूचनार्थः ए

स्तो·भा·
१४

एतत्सूक्तेन यो रुषेन तु नैवाभ्यां सहस्रशीर्षो मंत्रो वेदेषु रूपश्चतुर्थ्वीपि निवेश्ययेत मात्मानं विष्णवे मितत्तेजसो न त्मात्मा तन्मना शान्त स्त्वद्धि सोरिति मंत्रत इति।
शौनकीये कल्पे च। शौनकोऽहं प्रवक्ष्यामि नित्यं विष्णवर्चनं परं। प्रातःकाले मध्याह्ने इत्यर्द्धं चैव विधानत इति प्रक्रम्य स्त्राद्य मावाहनम् इत्येवमर्चा तु पुरुषो।
त्तममित्यादिना प्रत्यृचमुपचारभेदेषु विनियोगः कृतः एवं भगवच्छास्त्रादिष्वपि द्रष्टव्यं किंचाथर्वणे। अष्टादशमहाशान्तिप्रकरणेन तद्देवता
विषमहाशान्तिषु वैष्णव्यां पुरुषसूक्तमिति विनियोगो दृष्टव्य एवं सहस्रशीर्षा पुरुष इति उपसंहितायां पुरुषे नारायणेन यजमानत्रुपति।
ष्ठति सहस्रशीर्षा पुरुष इति पुरुषेण नारायणेन पश्चानुशान्तीति कल्पसूत्रवाक्याच्च नारायणो विषयत्वमप्रसिद्धं नन्वत्र तत्त्वं परमपुरुष
सन्निधानवशात्तेन तत्र तदुपस्थानं युज्यते। तत्र नारायणस्य ऋषित्वेन पुरुषस्य च देवतात्वेन संबंधः स्वाचस्त्वसर्वसंमतः। अत्र नारायणपुरुष
24 शब्दयोरेकविषयत्वं सहस्रशीर्षं देवमित्यारभ्य विश्वमेवेदं पुरुष इति। नारायणानुवाकोक्त्या सिद्धं तथा सुबालोपनिषदि च सुभूष्म इष्टव्य
च नारायण इत्यादिना नारायणस्य सर्वात्मत्वं प्रतिपाद्य पुरुष एवेदं सर्वमिति पुरुषसूक्तवाक्येन निगमनान्नारायण एव पुरुषसूक्तप्रति
पाद्य इति निश्चीयते॥ तदिह पुरुषशब्दः पुरु ॥परमसत्त्वसमाश्रयः कः॥ षोत्तमविषयः तथा च पौराणिकं वचनं भग
वानिति शब्दोयं तथा पुरुष इत्यपि निरुपाधी च वर्तेते वासुदेवे सनातन इति। एवं ब्रह्माकमलागर्भो मोरुद्रः कालाग्निसन्निभः पुरुषः
पुंडरीकाक्षो रूपं तत्परमात्मन इति त्रयाणां रूपभेदवचनेन प्रतीकनाम्नोक्तौ ब्रह्मरुद्रव्यावृत्ते परमात्मशब्दोदिते भगवति पुरुषशब्दसमा
ख्यारूपेण प्रयुक्तः पुरुषः पुंडरीकाक्षः इति पाठेऽपि न प्रसक्तविरोधः। अधीयते च तैत्तिरीयाः प्रजापतिजनकत्वमपि विषये सर्वमेवाहमिहास
मिति तत्पुरुषस्य पुरुषत्वमिति। अनंतरं सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् भूत्वोदतिष्ठदिति पुरुषसूक्तारंभस्तत्र एवमभिज्ञायते
श्रूत्वेवं तथापि महेश्वरशिवादिशब्दैः शास्त्रिनां श्वेताश्वतरोपनिषदि वेदाहमेतदिमित्यादिवाक्यदर्शनात् रुद्रेऽपि पुरुषशब्दाम्नानाच्च पुरु
षसूक्तस्यापि तद्विषयत्वं स्यादित्यत्राह॥ परमसत्त्वसमाश्रयः कः इति। परमस्य मोक्षोपयुक्तप्रकर्षवतः। पुरुषसूक्तं नावतत्परमपुरुषविष
यत्तथा स्यात्सत्त्वस्य प्रकाशसुखहेतुभूतगुणविशेषस्य समाश्रयः सम्यक्प्रवर्तकस्त्वदन्यः। क इत्यर्थः एतेन सांसारिकज्ञानसुखहेतुभूतप्र
श्मिति सत्त्ववावच्छेदः। अयं भावः पुरुषसूक्तं तावत्परमपुरुषविषयतया स्थापितं। तत्र सवाक्यप्रत्यभिज्ञानाच्च श्वेताश्वतरोपनिषदि। १४

त्वांगमपतिप्रसिद्धप्रजापतेःपरमपुरुषकार्यत्वतन्नियम्यत्वकर्मवश्यत्वादिकंप्रसिद्धं। अतोत्रप्रजापत्यादिशब्दःपरमकारणभूतनारायणमेवप्र
तिपादयति। एवमज्ञः संभूतइत्यनुवाकस्यापिपुरुषसूक्तप्रकरणाविच्छेदात्वेदाहमेतंपुरुषंमहान्तमादित्यवर्णमित्यादिवाक्यार्थप्रत्यभिज्ञाना
च्चमहापुरुषविषयत्वंसुगमंतमिममर्थमनन्यार्थेसिद्धेनलक्ष्मीपतित्वलिंगेनद्रढयति। कःश्रीःश्रियइति। अत्रवदन्तइतिवक्ष्यमाणमनुषंज
नीयं श्रियःश्रीश्चभवेदग्र्याकीर्त्याःकीर्तिःक्षमाक्षमेत्युक्तमिहाभिप्रेतंश्रीरेवह्यनेषामतिशयंविधत्ते। अस्याअपिभर्त्तानामपरंभार्याभूषणभू
षणाद्यपिन्यायेनातिशयहेतुरयमितिभावः नारायणमुनिभिस्त्वेवमिहव्याख्यातं स्वेतरसमस्तैः स्वरूपस्थितिप्रवृत्त्यर्थंश्रीयेतसाश्रीः तस्या
अपितथाश्रयणीयइति। श्रीशब्दनिरुक्तयः शृणोतिनिखिलान्दोषान् शृणोतिचगुणैर्जगत् श्रीयतेचाखिलैर्नित्यंश्रयतेचपरंपदं श्रयं
ती श्रीयमाणांचशृण्वतीं शृण्वतीमपीत्यादिपुष्टव्याः श्रियइत्यनेनद्योत्यते लक्ष्मीश्चपत्न्याविति आम्नातलक्ष्मीशब्दपर्यायोपादानं अत्रह्रीरि
तिभूमिर्विवक्षिता श्रीभूमिसहितंहरिमित्यादिप्रसिद्धेः वाजसनेयकेतुह्रीशब्दस्थानेश्रीशब्दपठनेपियथोचितमर्थोग्राह्यः तदिहपुरु
षसूक्तप्रकरणोदितश्रियःपतित्वलिंगसहकृ ॥कःश्रीःश्रियः॥ कृतमहापुरुषप्रत्यभिज्ञानबाधितरूढिःप्रजाप
तिशब्दः पतिंविश्वस्येत्युक्तपुरुषवाक्यवाच्यंनारायणमेवाभिधत्ते इतिभावः प्रत्युक्तश्चासौतद्विषयतयामहाभारते राजाधिराजःसर्वेषां
विष्णुःसर्वमयोमहान् ईश्वरंतंविजानीमःसपितासप्रजापतिरिति सप्रदशाप्रजापत्यान्पशूनालभन्तेइत्यादौचश्यामाएकरूपाभवंति। एवमेव
हिप्रजापतिरितिप्रजापतेःश्यामत्वैकरूपत्वोक्त्याप्रजापतिशब्दस्यविष्णुविषयत्वंगम्यते। आश्रावयेतिचतुरक्षरमित्यारभ्यएषवैसप्तदशः
प्रजापतिरित्येतस्यविष्णुविषयत्वंचतुर्भिश्चतुर्भिश्चद्वाभ्यांपंचभिरेवचहूयतेचपुनर्द्वाभ्यांसमेविष्णुःप्रसीदत्वितिमहाभारतवचनेनव्यंजितं। न
नुपुरुषसूक्तस्यकथंभगवत्परत्वंपुरुषशब्दोहिसर्वात्मपुरुषोनरसमयः प्रकृतिंपुरुषंचैवविद्ध्यनादीउभावपिइत्यादिषुतद्व्यतिरिक्तेष्व
पिप्रयुज्येत सत्यंअखिलजगत्कारणविषयस्त्वयंपुरुषशब्दःपरमपुरुषमेवब्रूयादाह। पुरुषस्सहस्रेः सूक्तंस्वर्ग्यंधन्यंयशस्करमितिचस्मर्यते
मोक्षधर्मेपरमपुरुषविषयतयैवपुरुषसूक्तंयोजितं इदंपुरुषसूक्तंहिसर्ववेदेषुपठ्यते। ऋतंसत्यंचविख्यातमृषिसिंहेनचिंतितमित्यादिना
व्याससुतेनोच इदंभगवदर्चनेविनियुक्तं॥ नविष्ण्वाराधनात्पुण्यंविद्यतेकर्मवैदिकं तस्मादनादिमध्यान्तंनित्यमाराधयेद्धरिं तद्विष्णोरितिमंत्रे

स्तो॰भा॰ १५

15

ब्रह्मेति चाभ्युपैव। अस्ति च तत्परं पुराणं श्रुतः पुरुषस्तत्कमादित्यपरं स एव च ब्रह्मेत्यन्वयेन तत्परकारणश्रुतिभिः श्रियः पतित्वलिंगेन परपुरु
षादित्ये च पुरुषस्तत्कपरं ब्राह्मणे श्वहत्तोत्तरत्वेऽपि भुक्तिभ्य स्तव्यापनाय उक्तं छोस्रोगस्यं च सुप्रसिद्धं लिंगमाह। कः पुंडरीकनयन इति
अ॰ ऽयमभिप्रायः। तस्य यथा कप्यासं पुंडरीकमेवाक्षिणी इति तत्रैव पुंडरीकनयनत्वोक्तिः पुरुषोत्तमस्यैव तत्प्रसिद्धेर्न तत्रादित्यो वा नो
वा नारायणः शंकनीयः यद्यपि द्विविडभाष्ये तस्य यथा कप्यासमित्यादेः षड्धा ऽऽम्नातास्तथाप्येषो त्रितात्मयमेव स्वीकर्तव्याः तथा चोक्तं वेदार्थ
संग्रहे। गंभीरांभःसमुद्भूतसुमृष्टनालरविकरविकसितपुंडरीकदलायतेक्षण इति॥ एतेन परिसर्णत्वमनुग्रहशीलत्वं चास्य व्यज्यते। उपरि
चरोपाख्याने चाक्षोषणो ह्यसौ देव इत्युक्तं। अन्येषां तु चतुर्मुखरुद्रादीनां नामग्रहीतया श्रोकावस्थत्वात्तापकोधाद्युपाकांचतावाद्धीणि रूपाणि
भवंति सन्निधिविशेषश्चादित्यमंडले भगवतः सावित्रीकल्पेषु पुराणादिषु च प्रसिद्धः॥ आदित्यस्य च चक्षुषे सूर्यो ऽजायत तस्यां चंद्रमसो
धाता यथापूर्वमकल्पयत्॥ अग्निर्मूर्धा चक्षुषी चंद्रसूर्यौ। यस्यादित्यो भामुपयुज्य भाति। येन सूर्यस्तपति तेजसेद्धः न तत्र सूर्यो भाति न चं
द्रतारकं यस्यादित्यः। शरीरमित्यादिभिश्चानीश्व ॥कः पुंडरीकनयनः॥ रत्वं सिद्धं॥ न द्वैधवप्रतिपादनपरं च पुराणमसा
त्विकत्वाद्विरुद्धांशे त्याज्यं कचित् ब्रह्मरुद्राणां सर्वेतत्त्वविवक्षायावा विवाहः एवं परमकारणविषयश्रुतिविशेषैः श्रियः पतित्वादि
लिंगैश्च नारायण एव स्वतः सिद्धैश्वर्यः सर्वस्मात्पर इति निश्चिते पि केचिद्विदिते पश्चात्कप्रमाणपरिज्ञाताः पुरुषसमाख्यामीश्वरसमा
ख्यां च निर्विशेषवादिमहत्परमाविशेषणविशिष्टां च परामृशन् ब्रह्मणः पितुर्ब्रह्मपुत्रस्य निकर्षोत्कर्षौ मन्यंतानुपालभ्यते पुरुषोत्तमः द्वा
विमौ पुरुषौ लोके इत्यादि श्लोकाः प्रतिसंधेयाः तेषु परमात्मेत्युदाहृतः इत्यनेन नतस्याशिष्वायामधोपरमात्मा व्यवस्थित इति श्रुतिः स्वयं
ते च। यो लोकत्रयमाविश्येत्यनेन यच्च किंचिदित्यादिकं व्याख्यातं विभर्तीत्याधारत्वोक्त्या यत्र विश्वं भवत्येकनीडं तत्सवितुर्वरेण्यं ध्रुवम
चलममृतं विष्णुसंज्ञं सर्वाधारं धाम एष सेतुर्विधरण एषां लोकानामसंभेदायेत्यादेरर्थ उक्तः अव्ययशब्देन शाश्वतं शिवमच्युतमित्याद्युक्त
संग्रहः॥ ईश्वरशब्देन व्याप्य नारायण स्थित इत्युक्तव्याप्तेरंतः प्रविष्टः शास्ता इत्याद्यनुसारा तत्समस्तनियमनविशिष्टत्वमात्मेश्वरमि
त्युक्तानामनियमनत्वं चाभिप्रेतिः स चापि वेदेषु समानः इत्यस्य श्रुतोक्तिः लोके वेदे च प्रसिद्धः इति व्यासोपात्तं भगवद्वाक्या परिहसनीयः। अत्रभ १५

महेश्वरशिवादिशब्दानां महापुरुषविषयत्वेनचयुक्तं । अनन्यथासिद्धं च लिंगं तत्र हृश्यते महान्प्रभुर्वै पुरुषः सत्वस्यैषः प्रवर्त्तक इति नारायणस्यै
व च सत्वप्रवर्त्तकत्वं ब्रह्मरुद्रयोश्च रजस्तमःप्रवर्त्तकत्वं श्रुत्यादिसिद्धं यथा मैत्रीयणीयोपनिष "" दि अथ यो ह खलु वावास्य राजसोंशः सोसौ ब्रह्म
चारिणो योयं ब्रह्मा अथ यो ह खलु वावास्य सात्विकोंशः सोसौ ब्रह्मचारिणो योयं विष्णुः अथ यो ह खलु वावास्य तामसोंशः सोसौ ब्रह्मचारिणो यो
यं रुद्र इति पुराणेषु च वाराहे अगस्त्यरुद्रसंवादे । रुद्रः यत्सत्वं स हरिर्देवो यो हरिस्तत्परं पदं सत्वं रजस्तम एवेति त्रितयं चैतदुच्यते । सत्वेन मुच्य
ते जंतुः सत्वं नारायणात्मकं । रजसा सत्वयुक्तेन भवेत् श्रीमान् यशोधिकः तच्च पैतामहं वृत्तं सर्वशास्त्रेषु पठ्यते यद्देववाह्यं कर्म सान्मामुहि
द्योपसेव्यते तद्यौड्यमिति विख्यातं कनिष्ठगतिदं नृणां । तद्धीनतपसा युक्तं केवलं तामसं तु यत् । तद्धुरौति प्रदं नृणामिह लोके परत्र चेति ॥ तै
गे च तु ईशाध्याये हिरण्यगर्भो रजसा तमसा शंकरः स्वयं । सत्वेन सर्वगो विष्णुः सर्वात्मा सदसन्मय इति ॥ तत्रैव चतुस्त्रिंशे त्वत्कोपसंभवो रुद्रः ।
तमसा च समावृतः त्वत्प्रसादाज्जगद्धाता रजसा च पितामहः सत्वस्वरूपश्च स्वयं त्वं विष्णुः पुरुषोत्तमः तदनंतरे ध्याये । नंदकेश्वरवचनं पर
मात्मानमीशानं तमसा रुद्ररूपिणं । रजसा सर्वलोकानां सर्गलीलाप्रवर्त्तकं । सत्वेन सर्वभूतानां स्थापकं परमेश्वरं । सर्वात्मानं महात्मानं पर
मात्मानमीश्वरं । तं दृष्ट्वा प्राह वै ब्रह्मा भगवंतं जनार्दनमिति । एवं पुराणांतरेष्वपि भगवच्छास्त्रादिष्वपि । सात्विकैः सेव्यते विष्णुस्तामसैरेव शंकरः
राजसैः सेव्यते ब्रह्मा संकीर्णैस्तु सरस्वतीत्यादीनि द्रष्टव्यानि । साधारणे च शिल्पशास्त्रे । विमानत्रयमुक्रूपव्यते । स्थान्मापरुद्धवलभेच्छकमणे
वैसत्वरजस्तमांसि । महेश्वरे विपुत्तिवेष्ववेच कांतेहरो विधाता हरिरादिदेवः अथवा परमसत्वमिति । स्वसत्वात्मासकं सत्वगुणसत्वाधिलक्ष
णमित्युक्तं । शुद्धसत्वमयाप्राकृतद्रव्यविग्रहितं तेन ब्रह्मरुद्राद्यगोचररहस्याम्नायभगवच्छास्त्रादिप्रसिद्धकल्याणतमविग्रहादियोगात्त्वे
भः परत्वमुच्यते । निस्तेष्टकं परमसत्वपंचशक्तिमयविग्रहमिति । तेन यद्यपि सत्वप्रवर्त्तकत्वोक्तिः श्वेताश्वेततरोपनिषदः पुरुषसूक्तो
दितपरमपुरुषविग्रहत्वमवगमयति वक्ष्यांतरं चात्र वेदांतसंग्रहादिषु वक्ष्यं । ननु पुरुषसूक्तोदितमादित्यवर्णं पुरुषमादित्यमंडलेतार्ह
शब्दवर्णपुरुषतया छांदोगा अधीयते । य एषोन्तरादित्ये हिरण्मयः पुरुषो दृश्यते इत्यादिना संगमं च स्थानविशेषसन्निधिसामर्थ्यो ह्यादित्य एव रु
क्मवर्णे परमपुरुषो मनुनास्मर्यते । प्रशासितारं सर्वेषामणीयांसमणीयसां । रुक्माभं स्वप्नधीगम्यं विद्यात्तं पुरुषोत्तमं परमिति स्यात् आदित्ये

स्तो॰ भा॰ १६

वैव्यापकपरमपुरुषैकदेशावस्थितत्वं व्यापयति ॥ कस्याद्भुतेति ॥ त्वदन्यस्य कस्येति योजना ॥ यस्याद्भुताद्भुतांशे च विश्वशक्तिरियं स्थिता मेरोरिवाणुर्यस्ये-
तद्ब्रह्माण्डमखिलं मुने मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव इहैकस्थं जगत्कृत्स्नं पश्याद्य सचराचरं । पश्यामि देवांस्तव देव देहे सर्वांस्तथा भू-
तविशेषसंघान् । ब्रह्माणमीशं कमलासनस्थमित्यादिभिर्भगवत्स्वरूपैकदेशे विग्रहैकदेशे च विश्वस्थितिरुच्यते ॥ अतो विष्णोरेव सर्वव्यापि-
त्वं रुद्रादेस्तदेकदेशावस्थितत्वं सिद्धं । तपसा तोषितेनैव विश्वरूपेण विष्णुना । स्वपार्श्वे दक्षिणे शंभोर्निवासः परिकल्पितः एवं स्वविग्रहांशेषु त-
दन्यापि देवता निरंकुशस्वतंत्रेण धीश्रीधुरेण निवेशिताः पुरुषसूक्तेपि पुरुष एवेदं सर्वमित्यादिभिरपरिच्छिन्नत्वं सिद्धं ॥ नत्वेतत्र परिच्छिन्नत्वो-
क्तीनां तु अर्भकौकस्त्वात्तद्व्यपदेशाच्च नेति चेन्न निचाय्यत्वादेवं व्योमवच्च ॥ अभिव्यक्तेरित्याश्मरथ्यः अनुस्मृतेरिति चेन्नोक्तं ॥ हृद्यपेक्षया
तु मनुष्याधिकारित्वात् ॥ तुष्यथैपादवत् ॥ अनेन सर्वगतत्वमायामशब्दादिभ्यः इत्यादिभिः सूत्रैस्तत्तदुपाधावच्छेदनिबंधनत्वं महापुरुषस्यै-
व सर्वव्यापित्वं च स्थापितं ॥ अत्रायुताद्भुतांशेत्यादिशक्तिभिरसंख्यातब्रह्माण्डसदावरणैरिमहत्तरविभूत्याश्रयप्रदेशातिरिक्तविभूतत्वं तदा-
श्रयापरिच्छिन्नस्वरूपवैभवसूचनार्थं ॥ एतेन प्रतिब्रह्माण्डे प्रतिब्रह्मरुद्रादीनामितरेतरानभिज्ञत्वादिकमपि सूच्यते कस्येत्यादिना ॥ महिम्नैकदेशा-
धिष्ठेयत्वं वा विवक्षितं ॥ विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितं जगत् इत्यत्र भाष्यात् महिम्नो युताद्युतांशेन विष्टभ्याहमेव स्थित इति तत्रैव
वचस्याद्भुताद्भुतांशेत्यादिकमुदाहृतं विश्वं कृत्स्नं कार्यजातं चिदचित्स्वविभागश्चेतनाचेतनवर्गयोः ॥ प्रकृष्टवैषम्यं तस्याविचित्रत्वमाश्चर्य-
त्वमवांतरविशेषो वा देवमनुष्यादिरूपभेदेन तदनुगुणज्ञानसुखादिभेदैश्च चेतनप्रविभागः ॥ अचेतनप्रविभागस्तु भूतेंद्रियादिरूपेण
च सर्वेभिर्बोध्यः ॥ प्रत्यक्षानुमानागमैर्यथासंभवं प्रत्येतव्यः एवं विभागेन कृत्स्नं व्यवस्थितं स्वरूपस्थितिव्यापारवत्तयानि व्युन्नमिसंधेः ॥ १२ ॥
अथ स्याद्यद्यपि प्रत्यक्षश्रुतिभिस्तत्र श्रुतिलिंगैर्बाधितसमाख्याविशेषैश्च भगवतः परत्वं प्रतीयते तथापि इतिहासपुराणाभ्यां वेदं स-
मुपबृंहयेदिति स्मरणाद्विरोधाधिकरणस्य च स्वदृष्टार्थश्रुतिविषयत्वात् प्रजापतिपशुपतिपारम्यस्यतत्परस्वरूपबृंहणदर्शनाच्च पुरुषोत्त-
म एव पर इति निश्चेतुं न शक्यमित्यत्र प्रपञ्चितमोपबृंहणप्रसिद्धपरावरविवेकलिंगभूतैः कृतैस्तत्रमाह ॥ वेदापहारेति ॥ अयं भावः सुपरि-
गृहीताविरुद्धार्थसात्त्विकपुराणोपबृंहिताभिः प्रत्यक्षश्रुतिभिरर्थनिर्णयसिद्धेपि विरुद्धार्थानां राजसतामसपुराणादीनां शारीरक- १६

26

गवद्गीताभाष्ये । वेदार्थविल्लोकशास्त्रोक्त इति स्मृतिर्हि अतः श्रुतौ स्मृतौ चेत्यर्थः परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते स उत्तमः पुरुष इत्यादौ
स्मृत्यपि । अंशावतारं पुरुषोत्तमस्याव्ययनादिमध्यान्तमजस्य विष्णोरित्यादावपि तिसः उत्तमपुरुष इति श्रुतौ पुरुषोत्तमत्वं फलितमिति भावः तदय
मिहत्वदन्यः कः पुरुषोत्तम इति वदतोऽभिप्रायः यद्यपि वयं पुरुषोत्तमसमाख्यामात्रेण भगवत ईश्वरत्वं साधयाम तदीश्वरादिसमाख्यावलेन
प्रबलवत्त्वात तथा । अस्माभिस्तु पूर्वैः श्रुतिलिंगादिभिरेव ह्ययमर्थः साधितः तथा सति जीवलक्षणपुरुषराशिवहिर्भूत एव अयं महापुरुषस
र्वत्र प्रसिद्धः । अतः प्रबलप्रमाणवाधिते यमीश्वरादिसमाख्यारूढस्य सर्वेश्वरत्वं साधयितुं न शक्नोति । अन्यथा इन्द्रसमाख्येव निर्विशेषणश
तमखस्य परमेश्वरत्वं साधयेत । इदि परमैश्वर्ये इति धात्वर्ययोगात् महत्वविशेषत्वात् किंपुनः स्वतःसब्रमहापुरुषसमाख्येव प्रबलप्रमाणमा
नवाधितामहेश्वरमहेन्द्रादिसमाख्याप्यत्र निष्फला । पुरुषोत्तमसमाख्यातोऽनधीतशास्त्रानुशासनादिदृत्तान्तैः केश्चित् केवलरूढ्या रूढ्यनु
कामं पुरुषोत्तमोऽस्तिति तत्र यद्यपि कर्मधारयः तत्पुरुषश्च महदित्यादिनोत्तमशब्दस्य पूर्वनिपातः न च निर्धारणे षष्ठीसमासः । तथापि सप्तमीशौं

पुरुषोत्तमः कः कस्य युतायुतत्वानेककलांशकांशो । विचित्रचिद्चित्प्रविभागहर्ता ॥

डेरिति तत्र योगविभागग्रहणादत्र निर्धारणेऽपि सप्तमीसमासः स्यात् । षोपि कषष्ठी नीचोत्तमभावसंबंधावच्छिन्नादिपदविग्रहदर्शितार्थो समस्तेत
उत्तमोत्तमादिशब्दविज्ञैरेव निरूढाः यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तम इति गीतानुसारेण तु पंचमीसः समासः प्रसिद्धः । अत्र षष्ठीपंचमीस
मासयोः पुरुषशब्दोऽवद्धमुक्तावस्थजीवमात्रपरः द्वाविमौ पुरुषौ लोक इत्यादेश्चैतत्सुगमं । अलं श्रुतिलिंगाद्यवाधितया तदनुगृहीतया गीतानिरु
क्तया पुरुषोत्तमसमाख्ययापि पुरुषसूक्तोदितसर्वकारणपुरुषस्य परमात्मत्वं सर्वव्यापनधारणनियमनस्वाम्यादिकं तदनेकधर्मत्वं च सिद्ध
मिति । इदं च क इति ब्रह्मणो नाम ईशोऽहं भगवन्परः आवां तदंगसंभूतौ तस्मात्केशवनामवान् । सर्वत्रासौ समस्तं च वसत्यत्रेति वै यतः ततः स वासु
देवेति विद्वद्भिः परिपठ्यते । नराज्जातानि तत्वानि नाराणीति ततो विदुः तान्येव चायनं तस्य तेन नारायणः स्मृत इत्यादिभिर्निरुक्तानां समाख्यांतराणां प्र
दर्शनं । अतः सर्वेश्वरः सिद्धः इति व्यासपर्विता सर्वश्रुतिसमाख्या च महेश्वरादिसमाख्यामधिकरोतीति ननु तिष्ठतु समाख्यालिंगं तु पुरुषसूक्तप्रतिपाद्य
स्य च तु व्याप्तत्वरूपं परिच्छिन्नत्वं अपरिच्छिन्नत्वया प्रातात्मरत्वादवरलांगमयेदितियोमातीतवादिनः आक्षुक्तस्मिरासायबुद्ध्यरुद्रादीनामनेकांच स

लो॰भा॰
१७

17

नकं रुद्रे। एतत्स्वयमेवोक्तं मात्स्ये। ततः क्रोधपरीतेन संरक्तनयनेन च। वामांगुष्ठनखाग्रेण छिन्नं तस्य शिरो मया। ब्रह्मा यस्मादनुपराधस्य शिर-
श्छिन्नं त्वया मम। तस्माच्छापसमायुक्तः कपाली त्वं भविष्यसि। रुद्रः ब्रह्महा कुत्सितो भूत्वा चरं तीर्थानि भूतले। ततो हं गतवान् देवि हिमवंतं शिलो-
च्चयं। तत्र नारायणः श्रीमान्मया भिक्षां प्रयाचितः। ततस्तेन स्वकं पार्श्वं नखाग्रेण विदारितं। महास्रवगवती धारा तस्य पार्श्वे विनिःसृता। विष्णुप्रसा-
दात्सुश्रोणि कपालं तत्सहस्रधा स्फुटितं वसुधायां तत्स्वप्नलब्धं धनं यथा। एवं स्वेदजजन्तूनां कपालमोचनं चान्यत्रोक्तं कल्पभेदेन रुद्रस्य पु-
नरे योज्यं। अथ शक्ते भगवद्विग्रहे युद्धादिन्यत्र च रुधिरस्वेदादिकं मायासृष्टं मंतव्यं रुद्रस्य देहपीडाविमोचनमंधकासुरसंग्रामे प्रसिद्धं। यथो-
क्तं मात्स्ये महेश्वरपशुकशस्त्रहतस्य प्रथमांधकरुधिरबिंदुभिरंधकयुद्धे संयाते ततः स शंकरो देवस्त्वंधकैर्व्याकुलीकृतः। जगाम शरणं
देवं वासुदेवमजं विभुं। ततः स भगवान् विष्णुः सृष्टवान् शुष्करेवतीं। या पपौ सकलं तेषामंधकानामसृक्क्षणादिति। एवं रुद्रस्य स्वदत्तवर-
सामर्थ्यपरीक्षोद्यतवृकासुरदौरात्म्यजनितभयविमोचनं च दृष्टव्यं।। अत्रैंद्रादीनामपि हिरण्यरावणदुर्वासःप्रभृतीजनितापद्विमोचनमुपल-
क्षेण सभापर्वणि सामान्यत उक्तं।। एवमेषो सुराणां च सुराणां चापि सर्वशः। भयाभयकरः कृष्णः सर्वलोकेश्वरेश्वर इति श्रीविष्णुधर्मे च
त्रिपुरं जघ्नुषः। सर्वं ब्रह्मणा विष्णुपंजरं। शंकरस्य कुरुश्रेष्ठ रक्षणाय निरूपितं। वाणीशेन तु शक्रस्य वज्रं हंतुं प्रयास्यते इति। नामत्रयविधाने चैते-
नैव रुद्रस्य कालकूटापविस्तारणं च दर्शितं। अच्युतानंतगोविंदनामत्रयमुदाहृतं। ॐनमः संपुटीकृत्य जपन्विषधरो हरः इति। बाणासुर-
युद्धे च भगवता वासुदेवेन योद्धुं प्रवृत्तस्यापि रुद्रस्य प्रशमनमात्रेण युद्धान्निस्तारणं कृतं। यथोक्तं वैष्णवे पुराणे। जृंभनास्त्रेण गोविंदो जृंभया-
मास शंकरं। ततः प्रणेशुर्दैतेयाः प्रमथाश्च समंततः। जृंभाभिभूतस्तु हरो रथोपस्थ उपाविशत्। न चाशाकत तदा योद्धुं कृष्णेनाक्लिष्टकर्म-
णा। श्रीमद्भागवते च। परशुरामं प्रत्याह। ओंकारेण महाबाहुः स्तंभितो यत् त्रिलोचनः। जृंभितं तद्धनुर्दृष्ट्वा शैवं विष्णुपराक्रमैः। अधिकं मेनिरे
विष्णुं देवाः सर्षिगणास्तदेति। श्रीवदरिकाश्रमे च युद्धप्रवृत्तापसवेषेण धर्मसूनुना नरसखेन नारायणेन संजिहीर्षितो रुद्रः पितुः पुत्रस्य च
मध्यप्रविष्टेन चतुर्मुखेन प्रतिबोधितः शरणमुपागत सर्वलोकशरण्येन संरक्षित इति महाभारते प्रोक्तं। प्रसादयामास भवो देवं नारायणं
प्रभुं। शरणं जगामाद्यं वरेण्यं वरदं प्रभुमित्यादिना। तयोर्मेहिष्ठफलप्रदानं च तत्रैवोक्तं तथा हि कुंडरोधरोपाराध्यातेयुगकोटिसहस्राणि विष्णु- ७

स्मृत्यधिकरणनिश्चलीकृततद्विरोधाधिकरणनयेन विधूननं युक्तं तद्विपरीतवृत्तांतास्तु तामसादिपुराणोक्तत्वात् । ब्रह्मविष्णुलं प्रसंगवामेतयाः म
न्वादिस्मृतिषु च भगवत्पारम्यं सुव्यक्तं यद्वै किंच मनुरवदत्तद्भेषजमिति श्रूयते मन्वर्थविपरीता तु या स्मृतिः सा न सम्यते इति स्मर्यते । अतः सात्विके
तिहासपुराणादिप्रोक्ता वेदापहारादिवृत्तांताः परापरतत्वविवेके नममृगलिंगादीनि भवंतीति तदिह निखिलजगदेकहेतुः स भगवान् आसीत्
अनादिवान् नदेकं तस्मादन्यतरं किंचनास इत्यादिप्रसिद्धायां सर्वोपरि हिरण्यगर्भादिप्रलयप्रागभावदशायां महदादिसृष्टिक्रमेण ब्रह्माणं सर्वं विधा
य पुनर्यतिरोहितान् वेदांश्च सर्वान् सर्वविशिष्टनाविष्कृत्य ब्रह्मणे हि लोकं । अत्र विदधातीति अहिनोतीति वर्तमाननिर्देशः प्रतिकल्पमेव निर्मि
मीत इति ज्ञापनार्थः तत्र वेदचक्षुः परदर्शिना विश्वसृष्टिं कर्तुकामेन ब्रह्मणे प्राचीनदुष्कृतफलत्वात् नायं परमपुरुषोत्तेवृत्तष्टौ मूर्तेरजस्तत्वेन ।
भगवच्छास्त्रे प्रतिपादितो महाबलौ मधुकैटभौ देहशावादिस्य ब्रह्माणममितप्रभं । सृजंतं प्रथमं वेदांश्चतुरस्वारुविक्रम । ततो विग्रहिनत्तास्त्वा
हृत्वा तंचासुरोत्तमौ वेदांश्च जग्हतुराजन् ब्रह्मणः पश्यतस्तदा सहसा अथ लोकानवश्रेष्ठौ गृहीत्वा तान् सनातनान् रसां विविशतुस्तूर्णमुदक्षणं महो
दधौ । ततो हृतेषु वेदेषु ब्रह्मा कश्मलमाविशत् । ततो वचनमीशानं प्राह वेदैर्विनाकृतः ब्रह्मा वेदा मे परमं चक्षुः वेदा मे परमं धनं वेदा मे परमं धाम वे
दापहारगुरुपातक इत्युपोद्घातपरिमोचनमहीत्तिफलप्रदानैः कोन्वः अजा पङ्क्तुपतीपरिपातिकस्य पादोदकेन सह शिवः स्वशिरोधृतेन । १२
दामे ब्रह्म चोत्तमं । मम वेदा हृताः सर्वे दानवाभ्यां बलाद्दिताः अंधकारा इमे लोका जाता वेदैर्विवर्जिताः वेदैर्विहितः किं कुर्यां लोकान् वै स्रष्टुं समुद्यतः
अहो बत महद्दुःखं वेदनाशनजं मम । प्राप्तं धुनोति हृदयं तीव्रशोकमयं मम । को हि शोकार्णवे मग्नं मामितो द्य समुद्धरेत् इत्येवं भाषमाणस्य ब्र
ह्मणो नृपसत्तम हरेः स्तोत्रार्थमुद्भूता बुद्धिर्बुद्धिमतां वर । ततो जगौ परं जाप्यं प्रांजलिरग्रतः प्रभो इत्यादि एतस्मिन्नंतरे राजन् देवो हयशिरोध
र । जगाद वेदान् निखिलान् रसातलगतान् हरिः प्रादाच्च ब्रह्मणे राजन् ततः स्वां प्रकृतिं स्थितः । ततस्तयोर्वधेनाशु वेदापहरणेन च शोकाप
नयनं चक्रे ब्रह्मणः पुरुषोत्तम इति पञ्चप्रतिरेवं गुरुपातकाद्विमोचनं । गुरुविषयं पातकं गुरुपातकं गुरुत्वेन पातकं वा विशिष्टतेन हि ब्रा
ह्मणो नमपित्नभृतब्रह्मशिरःछेदाद्धिकं पातकं संभाव्यते । विदुषोति क्रमेदंड भयस्त्वं च स्मर्यते । न च सर्वज्ञ नामासौ न जानातितदिदं स्वपा

38

मूर्द्ध्नि निभृते न शिवो ऽशिवो भूदिति तद्योग पर्व्वणि चैतदभिप्रायेणोक्तं । अत्र गंगां महादेवः पतंतीं गगनच्युतां प्रगृह्य प्रददौ लोके मानुषे ब्रह्मवित्तम
इति स्कंदे वैतदीश्वरसंहितायामाराधके न ब्रह्मणोवोक्तं । द्रवीभूतस्तथा धर्मो हरिभक्त्या महामुने गृहीत्वा धर्मपानीयं पावनाय सतु ष्टये । इत्या
त्तिं तत्परया भक्त्या पाद्यार्घादिं शिरश्च्युतं तद्दृष्ट्वा पतितं दृष्ट्वा दधार शिरसा हरः पावनार्थं जटामध्ये योग्योऽस्मीति सवधारधारणात् वृषनिश्चय
न्न मुमोच तत्र या हरइति । यद्वा गंगा यत्पशुपतेर्इशः पिपाविनी निःतश्चिन्वा गपतितं तोयं पवित्रमिति पस्पर्श इति तत्कथं इत्यं । अत्र हि स्वतः पवि
त्रत्वस्य स्पष्टत्वात्त्व हेतुत्वमुच्यते । अच्युतमज्जा कांक्षितचानुसस्वर्गमेतत्पवित्रता हेतुत्वं कल्पयतु मच्युक्तं कल्पमालोपि ज्ञापकहेतुत्वमात्रं काम
कल्पतां नवेन शिरसा धृत्वात्पवित्रमिति ज्ञात्वापस्पर्शइत्यर्थः सामान्योक्त्या च भवसान्येषां च पवित्रमित्यभिप्रेतं । अत एव हरस्य गात्रसंस
र्गात्पवित्रमुपागतेत्यत्रापि हरस्याशुद्धि प्रदत्वमुपागतेति बोध्यं । एवं तत्तत्र कैः परत्वेन कल्पितयोः प्रजापति पशुपत्यो हूर्तं तानंते तयोरनी
श्वरत्वकर्मवश्यत्वादिकं भगवत एव तत एव सर्वेश्वरत्वं चद्दृढीकृतं । अथ तयोस्तदन्येषां चानीश्वरतया समतानाम विशेषेण पारतंत्र्यस्त्रत्वसं
हार्यत्वादि प्रदर्शकैः सामसादि पुराणेषु विप्रसिद्ध तया सर्वलौकिक परीहृक समनैरशक्यापङ्कवैराश्वर्य श्रेष्ठितैः परावरत्वविवेकं प्रति शिष्ट पश्यतिक
सोदरइति । प्राकृतप्रलयदशायां हरविरिंचि प्रभृतिरूपेणास्त्र समानष्मिंद्दचिदात्मकः प्रपंचः कस्योदरेतदन्यस्य कसान्तः स्तम्भतयावस्थितइत्य

॥ कस्योदरे हरविरिंचिमुखप्रपंचः कोरक्षतीममजनिष्ट च कस्यनाभेः ॥

र्थः यस्य च ब्रह्म च क्षत्रं च उभे भवत ओदनः मृत्युर्यस्योपसेचनं क इत्था वेद यत्र सइत्यत्रोदनोसेचनशब्दवत्यसेत्संहारसमये जगत्स्थावरजंग
मजीजयाय क्त भगवानन्तं गच्छशरणं हरिं इत्यत्र ग्रसनशब्द प्रद्योरनशब्दश्चौपचारिकः उक्तं च । विश्वप्रजयवेलायां भगवत एवावस्थाने सुवा
लोपनिषदि किंचनासीन्नवेह किंचन गय आसीदमूलमनाधारा इमाः प्रजाः प्रजायंते दिव्यो देव एको नारायण इत्यादिभिरेव । महाभारते च । ब्रह्मादि
षु प्रलीनेषु नष्टे लोके चराचरे आभूतसंप्लवे प्राप्ते प्रलीने प्रकृतौ महान् एकस्तिष्ठति विश्वात्मा स तु नारायणः प्रभुरिति । क एव हि जोकानामुत्प
त्तिरपि चाप्ययइति विष्णुधर्मोत्तरे च । ब्रह्माशंभुस्तथैवार्कः चंद्रमाश्च शतक्रतुः एवमाद्यास्तथैवान्ये युक्तावैस्वतेजसा । जगत्कार्यावसाने तु वि १८

माराध्य पद्मभूः पुनः त्रैलोक्यधातृत्वं प्राप्तवानिति श्रुतमेति। उपाख्यानांतरे च। मयासृष्टः पुरा ब्रह्मा मद्यज्ञमयजत्स्वयं ततस्तस्य वरान्प्रीतो द
दावहमनुत्तमान् मत्पुत्रत्वं च कल्पादौ लोकाध्यक्षत्वमेव चेति। युधिष्ठिरशोकापनोदनेनैव विश्वरूपो महादेवः सर्वमेधे महाक्रतौ जुहाव स
र्वभूतानि स्वयमात्मानमात्मनेति। तथा महादेवस्सर्वमेधे महात्मा हुत्वात्मानं देवदेवो बभूव विश्वाँल्लोकान्व्याप्य विष्टभ्य कीर्त्या विराजते।
द्युमान्कृत्तिवासा इति। आमनंति चैतदेवं च क्रतवः असद्देवसमीदृषोद्या विद्योरेषसपद्धधेहविभिः देहि रुद्रो रुद्रायमहित्वमिति पशुपति
त्वं च रुद्रस्य वरापेक्षापूर्वकमात्मानं सोऽब्रवीद्वरं वृणु। अहमेव पशूनामधिपतिरसानीति तस्माद्रुद्रः पशूनामधिपतिरिति। श्रीनारा
यणीयाख्याने च। सर्वदेवानां भगवदाराधकत्वं तदधीनगतित्वं चोक्तं। ते देवा ऋषयश्चैव नानातनुसमाश्रिताः भक्त्या संपूजयंत्येनं गतिं चै
षां ददाति स इति। यज्ञभागग्रहणाध्याये च भगवत एव सर्वकर्मसमाराध्यत्वं ब्रह्मादीनां सर्वेषां तत्प्रसादेनैव यज्ञभाक्त्वं च प्रतिपादितं च त
तस्ते विबुधाः सर्वे ब्रह्माद्याश्च महर्षयः वेददृष्टेन विधिना वैष्णवं क्रतुमारभन्। तस्मिन्सत्रे तदा ब्रह्मा स्वयं भागमकल्पयत्। देवा महर्षयश्चैव
सर्वे भागमकल्पयन्। ते कार्तयुगधर्माणो भागाः परमसत्कृताः प्रापुरादित्यवर्णं तं पुरुषं तमसः परमिति तस्यैवं भगवद्वचः येन यः कल्पितो
भागः स तथा समुपागतः प्रीतोऽहं प्रदिशाम्यद्य फलमावृत्तिलक्षणमिति। तथा यज्ञैर्ये चापि यक्ष्यंति सर्वलोकेषु वै सुराः। कल्पयिष्यंति भागान्
ते नरा वेदकल्पितान्। यो मे यथा कल्पितवान् भागमस्मिन्महाक्रतौ स तथा यज्ञभागार्हो वेदसूत्रे मया कृत इति। कर्मकांडे च प्रथमेऽध्याये च।
नित्यमर्चयसे देवं कं देवमधिकं तव। यस्मिन्मानसमव्यग्रं कृत्वा त्रिभुवनेश्वर। जपहोमनमस्कारैस्तत्वदस्व तथा ममेत्युमया पृष्टो महेश्वर
उवाच। शृणु तत्त्वं महाभागे यथा नित्यं नमाम्यहं ब्रह्माद्या मुनयश्चैव तपोधैर्यसमाधिभिः अर्चयंति सदा यं वै नतं परं निरंतरं यः। तं वै पृथा तथा
वक्ष्ये तस्मिन्धर्मसमन्वितः। भूतानामीश्वरं मन्त्रानां सर्वेषामात्मनामयं। विष्णुधर्मोष्टपः श्रीमान् उद्धरार्थमुदाहृत। श्रीनारसिंहपुराणे चैतत्।
त्संग्रहेणोक्तं। ब्रह्मादयः सुराः सर्वे विष्णुमाराध्य ते पुरा। स्वं स्वं पदमनुप्राप्ताः केशवस्य प्रसादत इति। अथ रुद्रस्य निरीश्वरत्वे हेत्वंतरमाह क
स्य पादोदकेन स शिव इति। अत्र ईदृशमासस्य स्याविपशुपतिमात्रस्य गंगाधारणसामर्थ्यात् बुधा निष्कृष्य समर्द इति परामर्शः। यद्वा सह
ति शिवसमाख्या प्रसिद्धिपरः तथा चोक्तं श्रीभागवते। संचिंतयेद्भगवतश्चरणारविंदं इत्युपक्रम्य यच्छौचनिःसृतसरित्प्रवरोदकेन तीर्थेन।

सोमा॰ त्वाद्यामामपि। प्राजापत्यं त्वया कर्म मयि सर्वं निवेशितमिति वैष्णवे च पुराणे रुद्रं तु त्वामशेषाणां भूतानां प्रभवो हरिः यस्य नाभिसमुद्भूतात्पंक
१८ जाद्भवं जगदिति। श्रीवाराहे चागस्त्यं प्रति रुद्रः नारायणः परो देवः सरूपी जनार्दनः त्रिधात्मानं स भगवान् ससर्ज परमेश्वरः रजस्तमो॰ त
भ्यां युक्तो भूतरजः सत्वादिकं विभुं। ससर्ज नाभिकं विभुं ससर्ज नाभिकमले ब्रह्माणं कमलासनं। रजसा तमसा युक्तं सोपि मां ससर्ज प्रभु
रिति। अत्र त्रेधात्मानमित्येतत्त्रैव रूपेण रुद्रे तत्र द्रव्यविशिष्टत्वे पुनश्चेति वक्ष्यमाणानुसारेण सत्वरजस्तमोयोगश्च तद्गुणकर्तव्या
धिष्ठातृत्वेन भवति श्रीनारसिंहपुराणे तत्र सुप्तस्य देवस्य नाभौ पद्ममभून्महत्। तस्मिन्पद्मे महाभाग वेदवेदांगपारगः। ब्रह्मो
त्पन्नस्ततेनोक्तः प्रजाः सृज महामते। एवमुक्त्वा तिरोभावं गतो नारायणः प्रभुः। तथेत्युक्त्वा स तं देवं विष्णुं ब्रह्मा व्यचिंतयत्। आस्ते किंच
जगदेतन्नो धागच्छत किंचन। तावत्तस्य महारोषो ब्रह्मणोभून्महात्मनः ततो बालः समुत्पन्नस्तस्यांके रोषसंभवः सोरुदद्वारितस्तेन
ब्रह्मणाव्यक्तमूर्तिना। नाम देहीति वै तु रुक्त तस्मै रुद्रेद दाविति। एवं सृष्ट्वा नारं तोयमत्तः स्थितोहं येन तस्मान्मे नाम नारायणेति। कल्पेक
ल्पेतत्र शयामि भूयः सुप्तस्य मे नाभिजं स्याद्यथाब्जं। तत्र सुप्तस्य मे देवि नाभौ पद्ममजायते त्यादि वचनानि दृष्टव्यानि नाभेरित्येतदुपल
क्षणं मनः प्रभृतिभ्योपि हि ब्रह्मणो जन्मषट्कं स्वर्वं प्रोच्यते। यथा हयशिरोपाख्याने॥ अहं प्रसादजस्तस्य लोकधाम्ने स्वयंभुवे त्वत्तो मे
मानसं जन्म प्रथमं द्विजपूजितं। चाक्षुषं वै द्वितीयं मे आसीज्जन्म पुरातनं। त्वत्प्रसादाच्च मे जन्म तृतीयं वाचिकं महत्। त्वत्तो मे श्रावणं चापि
चतुर्थं जन्म वै प्रभो। नासिक्यं चैव मे जन्म त्वत्तः पंचममुच्यते। अंडजं चापि मे जन्म त्वत्तः षष्ठं विनिर्मितं। इदं च सप्तमं जन्म पद्मजं मे मित प्र
भो। सर्गे सर्गे ह्यहं पुत्रस्तव त्रिगुणवर्जितेति। अत्रैव मंडजसृष्टिर्महोपनिषदि स्मर्यते। एको ह वै नारायण आसीन्न ब्रह्मा नेशानो नेमे द्या
वापृथिवी न नक्षत्राणि नापो नाग्निर्न सोमो न सूर्यः स एकाकी न रमते तस्य ध्यानांतस्थस्य एका कन्या दशेंद्रियाणि तारम्भ अथ पुनरेव नाराय
णः सोन्यं काममनसा ध्यायीत तस्य ध्यानांतस्थस्य ललाटात्स्वेदोपतत्। ता इमा आपस्तत्र हिरण्मयमंडमभवत् तत्र ब्रह्मा चतुर्मुखोजायते
ति अत्रांतररुद्रोत्पत्तिश्चैवमभिधीयते। अथ पुनरेव नारायणः सोन्यं काममनसा ध्यायीत तस्य ध्यायीत तस्य ध्यानांतस्थस्य ललाटात्स्वे
दोपतत् स्वेदाद्बुद्बुदमभवत्। तद्बुद्बुदात्त्र्यक्षः शूलपाणिः पुरुषो जायतेति। मोक्षधर्मे चोक्तं एष लोकगुरुर्ब्रह्मा जगदादिकरः प्रभुः एषमा १८

युज्यते च तेजसा। वितेजसश्च ते सर्वे पंचत्वमुपयांति चेति। अत्र नारायणोऽवजीयत इति श्रुत्यादिसिद्धेर्थे तात्पर्यं। यद्वा महाप्रलयानंतरं महदादि
षु च सृष्टेषु सत्सु समानहरविरिंचादीन् भगवता सुविग्रहविशेषेण निधाय रक्षित्वात् तत्तेषां सृष्टेः पुरुषार्थविशेषतया धर्मादिपुरुषार्थविशेषस
चु स्थितिकालभावित्वात्। तत्प्राधान्यविवक्षया क्रममुल्लंघ्याह। कोऽरक्षत्त्वीममिति। उक्तमिदं वैष्णवे पुराणे न हि पालनसामर्थ्यमृते सर्वेश्वरं हरिं स्थि
तो स्थितिः महाप्राज्ञ भवत्यन्यस्य कस्यचित्। सृजत्येष जगत्सृष्टौ स्थितौ पाति सनातनः इति चैवात्मकत्वे च रजसत्त्वादिसंयुत इति। उत्तररामा
यणे च ब्रह्मणोक्तं। ततस्त्वमपि दुर्द्धर्षस्तस्मात्सनातनात्। रक्षार्थं सर्वभूतानां विष्णुत्वमुपजग्मिवानिति सोऽहं संप्रसूतो रोहित्वा तु पास्ते जग
त्पतिं। रक्षां विधत्स्व भूतेषु मम तेजस्करो भवानिति च। एकं न संप्रदांस माहारे विपन्ति विनिवर्तेन्नेः समर्थो दृष्टप्रतेकश्चित्त् तं विना पुरुषोत्तममित्या
दीनि दृष्टव्यानि। अथ वक्तुः स्वांप्रजायैयेतुक्तक्रमेण जनिहेतुत्वमाह। अजनिष्ट च कस्य नाभेरिति अस्य नेहि महोपनिषदि सर्वं सायनहीरिल्या
एपनाभिपद्मात्स्वयंभवन्महात्मा प्रजापतिर्विश्वसृड्विश्वरूपः। तमेव विदित्वाति मृत्युमेति नान्यः पंथा विद्यतेयनायेति। अथर्वेऽपि च ब्रह्मवाऽइदमग्र आसी
दित्यारभ्य ब्रह्मवे ब्रह्माणं पुष्करे ससर्जेति। एवमजस्य नाभावध्येकमर्पितं यस्मिन्निदं विश्वं भुवनमधिश्रितं विश्वकर्मा ह्यजनिष्ट देवः स प्रजापति
रेकः पुष्करपर्णे समभवदित्याद्यपि भगवन्नाभेरेव प्रजापतिसंभवोऽभिप्रेतः। उपबृंहणं सिद्धं चैतत्। अजस्य नाभावध्येकं यस्मिन्विश्वं प्रतिष्ठितं। पु
ष्करं पुष्कराक्षस्य तस्मै पद्मात्मने नम इति भृगुभरद्वाजसंवादे च। ततस्तेजोमयं दिव्यं पद्मं सृष्टं स्वयंभुवः तस्मात्पद्मात्समभवत् ब्रह्मा वे
दमयो विधिरिति स्थ्यांतरे च नारायणो महायोगी शुभाशुभविवर्जितः ससर्ज नाभिजं पुत्रं ब्रह्माणममितप्रभं। ततः सः प्रादुर्भवत्वाथैनं वाक्य
मब्रवीत्। मम त्वं नाभितो जातः प्रजासर्गकरः प्रभुः सृज प्रजास्त्वं विविधा ब्रह्मा सजडपंडितइति सभापर्वणि च। अथ क्रोधजस्य लिंगस्यो
यूपेष भगवान्प्रभुः पुरा नारायणो देवः स्वयंभूः प्रपितामह इत्यारभ्य ततः स भगवान्सृष्टोऽयेऽब्रह्माणमसृजत्स्वयमिति। अत्रापि प्रलयार्णवम
ध्येनाप्येवं ब्रह्माणमसृजदिति मंतव्यं। सुपर्णोलैकंव संवादे च। यत्तत्पद्ममभूत्पूर्वं तत्र ब्रह्मा व्यजायत। ब्रह्मणश्चापि संभूतः शिव इत्यवधार्यतां
शिवात्स्कंदः समभवत्ततः सृष्टिचतुष्टयमिति। मार्कंडेयश्च। स्वपतस्तस्य देवस्य पद्मं सूर्यसमप्रभं। नाभ्यां विनिःसृतं तस्य तत्रोत्पन्नः पितामह
ह इति। उत्तररामायणे च। संक्षिप्य च पुरा लोकान्। मायया स्वयमेव हि महार्णवे शयानोऽप्सु मां त्वं पूर्वमजीजनः पद्मे दिव्येऽर्कसंकाशे नाभ्यामु

पापादिभ्यो देव एको नारायण इति अन्यदपि निगीर्णतीति कर्मभूत ब्रह्म रुद्राद्यशक्यमाश्चर्यं व्यापारमाह संनिगीर्य पुनरुद्गिरति त्वदन्यः क इ
ति यथोक्तं श्रीसात्वते लजंतमाहरंतीत्वा सोह्यासद्येन च ॥ आब्रह्मभवनं सर्वं कर्मप्राधानिकं हि यदिति उद्गिरतीति वर्त्तमाननिर्द्देशः क्वचित्
क्वचित् । कल्पे तथा तथा प्रवृत्तिं यथोक्तं श्रीप्रवाहज्ञापनार्थः तत्र यथा सर्वत्र द्योतनाय पुनः शब्दः एवं संहार्यत्वसंहर्तृत्वरक्षकत्वजनकत्व
कनकत्वाधिष्ठेयोधिष्ठातृत्वादिवैधर्म्यवर्गैर्मुमुक्षुभिः पुरुषनिर्णयादिषु त्वप्रपंचिते हेतुभिः । तदन्येषु कश्चिदपि स्वातंत्र्यशंकावचनस्यादिति ।
निगमनाभिप्रायेणाह केन वेति ॥ त्वदन्ये नेति विशेषणीयं वाशब्दश्चकारार्थः अन्यस्य सर्वस्मात् परस्मात् संभावितत्वद्योतनार्थो वा मुक्ते
षु नित्येषु च शक्तिभूयस्त्वेपि सर्वशरीरत्वादिलक्षणं स्वातंत्र्यं नास्ति किमुत देवेषु हरविरिंच्यादिष्वित्यभिप्रायेण निर्दिशति । एवं इति श्ल
त्र सर्वेषामाधारतया नियंतृतया शेषितया च अधिकः परः तस्मान् परत्वान् प्रामाणिकानां इतरवक्तृप्रमाणसिद्धेर्विपरीतशंकापि

॥ क्रांत्वा निगीर्य पुनरुद्गिरति त्वदन्यः कः केन वैष परवानिति शक्यशंकः ॥ ४ ॥

नो सद्भूत इत्यभिप्रायेणात्र शंकातिप्रतिक्षेपः । अथवा मंदमतीनां मुमुक्षुणां तरेषु परान्तरस्य सद्भावशंकासंभवेपि सर्वोक्तैरेवन्यायैस्तन्निरा
समभिप्रेत्य केनेत्यादिकमुच्यते । उपबृंहणेष्वेतत् सिद्धं । यथा स्वमेधिके श्रीवैष्णवधर्मशास्त्रे । अनाश्रितोह्ययोनास्ति मुख्यमाश्रयमाश्रयेत्
इतरे हंसं कोते यथोक्तवान् हमव्ययमिति । श्रीहरिवंशे च रुद्रः एतदेव परं वस्तु नैतस्मात् परमस्ति च । एवमेव विजानध्वमेतद्धः परमं तप इति
ज्योमित्येवं सदा विप्राः पठध्वं ध्यात केशवमिति । उपास्यो हंस सदा विप्रा उपायोस्मि हरेः स्मृतौ विनिच श्रीवाराहे । रुद्रादित्या वसवो ये च साध्या
विश्वेश्विनौ मरुतश्चोष्मपाश्च सर्वे भवंतं शरणं गतास्म कुरुष्व दज्यानि ह विष्णुमूर्त्ते इत्येवं सततं वेदा गायंते नात्र संशय इति ॥ आदि
त्यपुराणे ब्रह्मा अहं विष्णोः स्मृतस भूतः स च सर्वमयो हरिः । न तस्मात् परमो भूतं विद्यते यत्तदुत्तमं पुराणे पुढिजश्रेष्ठा इदं शास्त्रमनन्यथा
इति तत्रैव काण्वने मिवधे । यथा रुद्रः । योसौ साक्षाद्देवमूर्त्तिर्यत्र वेदाः प्रतिष्ठिताः तं यामशरणं विष्णुं सर्वे रुद्रादिवौकस इति ॥५॥ ॥

तापितैचैवयुष्माकंचपितामहः मयानुशिष्टोभवितासर्वेभूतवरप्रदः।असाचैवानुजोरुद्रोललाटाद्यःसमुत्थितःब्रह्मानुशिष्टोभवितासो-
पिसर्ववरःप्रदः।श्रुतत्रासतस्तस्यचतुर्वक्त्रस्यधीमतःललाटप्रभवःपुत्रःशिवोगाद्यहरूपेति।छंदोगास्त्वामनंतिविरूपाक्षायधात्रंशाजा-
येतितथाविश्वदेवायसहस्राक्षायब्रह्मणःपुत्रायनमइति।शतपथब्राह्मणेसंवत्सरात्कुमारोजायतसोरोदीत्तंप्रजापतिरब्रवीत्कुमा-
रकिंरोदिषियच्छ्रमतपसोधिजातोसीतिसोब्रवीदनपहतपाप्माहमस्मिहंतनामानिमेदेहीतितस्मात्पुत्रस्यजातस्यनामकुर्यात्।पाप्मा-
नमेवास्यतदपहंतिअपिद्वितीयमपितृतीयमपिपूर्वमेवास्यपाप्मानमपहंतितमब्रवीत्रुद्रोसीतितदस्यतन्नामाकरोत्अग्निस्तद्रू-
पमभूत्।अग्निर्वैरुद्रोयदरोदीत्तस्माद्रुद्रइत्यादिसैषाश्रुतिः।श्रीपराशरेणोपबृंहिताकथितस्तामसः।सर्गोजब्रह्मणस्तेमहामुने।रुद्र-
सर्गप्रवक्ष्यामितन्मेनिगदतःशृणु।कल्पादावात्मनस्तुल्यंसुतंप्रध्यायतस्ततः।प्रादुरासीत्प्रभोरंकेकुमारोनीललोहितः।रुरोदसुस्वरंसो-
थद्रवंश्चमुनिसत्तम।किंरोदिषीतितंब्रह्मारुदंतंप्रत्युवाचह।नामदेहीतितंसोथप्रत्युवाचप्रजापतिं॥रुद्रस्त्वंदेवनाम्नासिमारोदीःस्थै-
र्यमावह।एवमुक्तःपुनःसोथप्रत्युवाचमहातपाः।ततोन्यानिददौतस्मैसप्तनामानिसप्रभुः।स्थानानिचैषामष्टानांपत्नीःपुत्रांश्चवैप्रभु-
रित्यादिना।मोक्षधर्मेचब्रह्मरुद्रसंवादे॥अहंब्रह्माचाद्यईशःप्रजानांतस्माज्जातस्त्वंचमत्तःप्रसूतः।मत्तोजगज्जंगमस्थावरंचसर्वेवेदाःस-
रहस्याश्चपुत्रेतिनिष्ठानिर्णयाध्यायेच॥उमापतिःपशुपतिःश्रीकंठोब्रह्मणः।इतिश्रीवाराहेचनारायणःपरोदेवःतस्माज्जातश्चतुर्मुखः
तस्मात्रुद्रोभवद्देविसचसर्वज्ञतांगतइति॥एवंरुद्रस्यब्रह्मानुजत्वंब्रह्मपुत्रत्वमपिकल्पभेदादुपपद्यते॥आगमवाचोविरोधेसात्त्वि-
केराद्धियंगतिःअनिश्चिताप्रमाणानानिश्चितेसादनारः॥अथैवमेवपरावरविभाजकत्रिविक्रमव्यापारमाह।क्रांत्वेति।अनेनयस्योरुषु
विक्रमणेष्वधिक्षियंतीभुवनानिविश्वाइत्यादिप्रतिपादितंवियदहमहत्वादिकंचतुर्मुखस्यतत्पदाराधकत्वंचसूच्यते।तथाब्रह्मादिसर्वदे-
वानांमनुष्यादिवत्तत्स्तोतृत्वंचोक्तंसंघैःसुराणांदिविभूतलस्थितैरित्यादिना॥अथवाक्रांत्वेत्यनेनसर्वेषामंतर्बहिश्चावस्थाययथा-
र्हंतत्तत्कार्यार्थमाक्रमणंविवक्षितंअंतर्यामिब्राह्मणेहिवःपृथिवीमंतरोयमयति।यआत्मानमंतरोयमयतिइत्यादिभिःसर्वतत्त्वाधि-
ष्ठातृत्वमुक्तंसुबालोपनिषदिचयःपृथिवीमंतरेसंचरन्नित्यादिभिःसर्वार्थउक्तः।अंतेरैश्चविशेषितंएषःसर्वभूतांतरात्माअपहत

सो॰ मा॰ २१ विधाशेषाद्ब्रह्मणोऽपि च साहिते। यस्मिन् कल्पे तु यत्प्रोक्तं पुराणं ब्रह्मणा पुरा तस्य तस्य च माहात्म्यं तत्कल्पे विधीयते। अग्नेः शिवस्य माहात्म्यं
तामसेषु प्रकीर्त्यते। राजसेषु च माहात्म्यमधिकं ब्रह्मणो विदुः। संकीर्णेषु सरस्वत्याः पितॄणां च निगद्यते। सात्त्विकेष्वपि कल्पेषु माहात्म्यमधिकं हरेः।
तेष्वेव योगसंसिद्धा गमिष्यन्ति परां गतिमिति कौर्मे च। असंख्यातास्तथा कल्पा ब्रह्मविष्णुशिवात्मकाः कथिता हि पुराणेषु मुनिभिः कालचिन्तकैः सा-
त्त्विकेषु तु कल्पेषु माहात्म्यमधिकं हरेः। तामसेषु शिवस्योक्तं राजसेषु प्रजापतेरिति॥ तदिह वैष्णवादीनि पुराणानि सत्त्वैकमूलतया कात्स्न्येनावि-
ष्णुतद्ज्ञानानि तेषां प्रावल्यं वेदविरुद्धैस्तामसतन्त्रैः परत्वापकर्षः प्रणवरत्वविपर्यासादिकल्पनं च तर्कपादे निरस्तं यच्चेदं सात्त्विकपुराणादिविभा-
21 गप्रकरणं तत्सात्त्विकमित्येवमेतस्य बाधकाभावात् गुणस्वभावोचितत्वात्। परस्परविरुद्धार्थपुराणबलाबलविवेकापेक्षत्वात्तथैवस्याप्र-
कृतयेव प्रवृत्तत्वाच्च एवं तामसे लिङ्गे पितामहपुराणान्यायः सञ्चारणीय इति। अत एव वैष्णवशास्त्रेरिति प्राचस्योक्त्या चक्तुवचनेन चानन्यप-
रश्रुतिस्मृतीनां भारतरामायणादीतिहासानां तदनुगुणानां च पाद्मवैष्णवभागवतनारदीयमार्कण्डेयवाराहवामनमात्स्यगारुडब्रह्माण्ड
नारसिंहादिपुराणानामान्योन्यसाम्यमपि युज्यते॥ दृष्टाभिः कथ्यते विष्णुः दृशाभिः शिव इति वचनं त्वनादृत्यं हस्तमानविरोधात् हिरण्यगर्भा-
दिप्रतिपादकपुराणविभागवचनैर्बाधितत्वाच्च आस्तामेतत्सर्वं महाजनो येन गतः स पन्था इत्युक्तमयत्नसिद्ध्यसाधनं भगवत्यारम्य प्रकृते-
सिद्धमित्याह प्रख्यानेति प्रवलैर्मुख्यशास्त्रैरित्यनेनैव गतार्थत्वेऽपि तदन्तर्गतेन साधितकतिपयवाक्यविशेषेणापि परतत्त्वनिर्णयसुलभत्वमिश
येन महर्षिमतानां पृथुगुणादानप्रख्यातावयत्तेदैवपरमार्थविदर्थेति कर्मधारयः प्रख्यातशब्देन वेदवैदिकपरिग्रहप्रकर्षोदाहरणम
त्वं स्तूयते॥ देवशब्द इहवेवतार्थः। नदैवं केशवात्परमित्यादिवत्। परमार्थशब्दो ह्यात्मपरः देवतापारमार्थ्यं चेत्यादिप्रमाणस्तवनार्थ-
त्वात्॥ वह्नीनां तन्मतानां भूयस्त्वं अंजनार्थमुभयत्र च वक्तुवचनं तत्र तावत् पृथिवीस्थो जन्मापितामहस्त्वन्वरो भगवान्वाल्मीकिरा-
ह। सन्निहितश्चैव सद्दीर्णः स्वराणस्य वधार्थिभिः अर्थितो मानुषे लोके जज्ञे विष्णुः सनातनः। अधिकं मेनिरे विष्णुमुत्क्रमेष महायोगी परमा-
त्मा सनातनः इत्यादि किं च। येनाहं पुरुषं वेदः सत्यो वाचं तां ततो ब्रह्मविद्यामित्यादिषु परं ब्रह्म त्वमेवेति रामावस्थं भगवन्तं प्रस्तुत्यर्न-
स्कुरस्य च सत्यत्वमित्यादि वरुणेनाभिषेको कृतं त्वं न याणां हि लोकानामादिकर्ता स्वयं प्रभुरिति। जगत्सर्वं शरीरं ते इत्यनेन घटक

एवं चतुर्भिः पंचभिर्वा श्लोकैः प्रदर्शितं भगवत्स्वरूपं यदि प्रामाणिकं तर्हि श्रुतिशास्त्रैः सर्वैरपि कीर्तितव्यं नादृश्यते कथं च लोके गिरीश्वरस्या
दविभूतिसाम्येत्यादिना प्रादुराविरित्यत्र परेषां भगवत्प्रतिपत्त्यभावे हेतुमाह । त्वांशीलेति ॥ एतेन मूढानां प्रतिशोचितान्मध्येस्य स्वभगव
दनुभवलाभात्प्रीयते त्वं महज्ञोपि महीयस्त्वेन सर्वोत्कर्षं शीलमिह महत्तरस्यापि मंदतरैः । सहनीरंध्रसंश्लेषस्वभावत्वं रामाद्यवतारेषु शबरी
गोपालादिषु शीलत्वं प्रसिद्धं । तेरैवततत्र महत्त्वमपि स्तूयते रूपं । आदित्यवर्णं तमसः परस्तात् । तस्य हवा एतस्य पुरुषस्य रूपं यथा महारज
तं वासः इत्यादिवत्स्वभावत्वाध्यायादिषु वा प्राकृतत्वेनाकर्महेतुकत्वेन विश्वाधारतया शुभाश्रयत्वेन च प्रसिद्धं । अत्र केषांचित् भगवत्स्वरूपमे
व वा तद्गुणभूतज्ञानबलादिर्वा परस्य हार्दिरूपतया प्रकाशतः इति पक्षस्तु तत्र तत्र पृथक्निर्देशस्य बाधकाभावात् निर्विकारत्वनिरवयव
त्वादिश्रुतिविरोधात् । पंचलक्ष्मत्रविषयहंसाकुलपवित्र्यहं देवमित्यादेरन्वयार्ह पदसमभिव्याहारस्य परस्परविरुद्धस्यान्यथैवोपपत्तेश्च निरस्तः
चरितानि कात्वेत्यादिना दर्शितान्यनुकानि रामहार्णवनिमग्नवसुंधरोद्धरणामृतमथनपद्मसुखान्तिमानुषदैवतानि चेष्टितशतानि । परमप्रकृष्ट

॥ त्वां शीलरूपचरितैः परमप्रकृष्टसत्त्वेन सात्त्विकतया प्रबलैश्च शास्त्रैः ॥

सत्त्वेन अधिकोत्कृष्टसत्त्वगुणेनेत्यर्थः । ननु ब्रह्मादिष्वेव सत्त्वरजस्तमसां प्रत्येकमुत्तममध्यमभेदेन नवधा गतिर्मनुनोक्ताः भगवतस्तत्सत्त्वादयो
न संतीत्येयत्रैव प्राकृता गुणा इति सत्त्वगुणोपि प्रतिषिद्धस्ते तत्कथमिह मंडूकि रित्यंच हेतुज्ञानाहि प्रकृष्टसत्त्वगुणसंपत्तिर्भगवत्कटाक्षाधी
नेति प्रागेव वृत्ति प्राकृतं तदिह स्वभावत्वेन मोक्षोपयुक्तसत्त्वेनेत्यर्थः । अप्राकृतशुद्धसत्त्वमयत्वं वा विवक्षितं । तामसपुराणादीनां तत्वप्रतिबोध
कत्वं नास्तीत्यभिप्रायेणाह । सात्त्विकतयेति । पौरुषेयशास्त्राणां स्वमूलभूतपुरुषगुणभेदेन सात्त्विकत्वादिव्यपदेशः सत्त्वादीनां कार्यभेदश्च भ
गवतैव गीतः सत्त्वात्संजायते ज्ञानं रजसो लोभ एव च । प्रमादमोहौ तमसो भवतोऽज्ञानमेव चेति । सात्त्विकराजसतामसबुद्धिभेदश्च प्रवृत्तिं च
निवृत्तिं च कार्याकार्ये भयाभये । यया धर्ममधर्मं च अधर्मं धर्ममित्यादिश्लोकत्रयेणोक्तः । मनुश्च या वेदबाह्याः स्मृतयो याश्च काश्च कुदृष्टयः सर्वास्ताः
निष्फलाः प्रेत्य तमोनिष्ठा हि ताः स्मृता इति पुराणेषु सात्त्विकादिविभागो मात्स्ये प्रोक्तः संकीर्णास्तामसाश्चैव राजसाः सात्त्विकास्तथा । कल्पाश्चतु

स्तो·भा· चसइति प्राधान्यप्रतिपाद्यं संगृह्य तदेव वक्तुं धास्याप्रयमास॥ यद्वै किंच नमनुरवदद्दिव्याद्विश्रवणात मनुर्बृहस्पतिरित्यादिवाक्यानि च सर्वमे
२२ वोपात्तानि। एतेषु मतेषु एकैकमेव तत्त्वनिर्णयाय पर्याप्तं किंपुनः सर्वोक्तैः शीलरूपादिभिः परस्परं च समुचितमित्यभिप्रायेण मतैश्चेत्युक्तं।
आसुरी नाम सी प्रकृतिर्येषां ते आसुरप्रकृतयः तामसप्रकृतित्वाद्बोद्धुं न प्रभवंतीत्यर्थः आसुरपदोपादानं राक्षसीमासुरीं चैवेति संग्रहो
क्तोपलक्षणं दर्शितश्च देवासुरसर्गविभागो भगवता द्वौ भूतसर्गौ लोकेस्मिन् दैव आसुर एव चेत्यादिना। उक्तं च शौनकेन द्विविधो भूतस
22 र्गोयं दैव आसुर एव च। विष्णुभक्तिपरो दैवो विपरीतस्तथासुर इति। आदित्यपुराणे च। देवानां च परो धर्मः सदा यज्ञरताः क्रियाः स्वाध्यायस्त
त्ववेदित्वं विष्णुपूजारतिस्तथा॥ दैत्यानां बाहुशालित्वं मात्सर्यं सत्त्वसत्क्रिया। निंदनं वेदशास्त्राणां हरभक्तिरुदुत्तमेति॥ तथा तस्मिन्न

॥प्रख्यातदैवपरमार्थविदां मतैश्च नैवासुरप्रकृतयः प्रभवंति बोद्धुं॥

पि हरौ विप्राः स्वबुद्ध्या ये न मोहिताः कीर्तयिष्यंति ते देवा मत्तश्चास्त्वितरेऽसुरा इति। बोद्धुमित्यत्र सर्वं परिहृतत्वेनेत्युपस्कार्यं न प्रभवं
तीति न तामसप्रकृतिपरवशत्वं मन्यते। अवधारणेन कालांतरेप्येतत् दृढीक्रियते। उक्तं हि मनुना यत्तु कर्मणि यस्मिन् संनियु
क्तं प्रयुंजीत। सततं देवपुनर्जेसत्र जायमानः पुनः पुनरिति महाभारते च। न गाथा गाथिनं शास्ति बहु चेदपि गायति प्रकृतिं यांति भू
तानि कुलिंगः शकुनिर्यथेति। जन्मांतरसहस्रेषु या बुद्धिर्भाविता पुरा। तामेव भजते जंतुरुपदेशो निरर्थक इति च। न हि शास्त्रे
सद्भिर्वक्तृत्वादुपदेशोपि पवित्वेति सर्वोत्कर्षनिमित्तभगवद्भक्तिरहितानां रावणदुर्योधनप्रभृतीनामत्यवसायः संपद्यते। यथाह
संजयः। विद्याराजन् न ते विद्या मम विद्या न हीयते विद्याहीनस्तमोध्वस्तो नाभिजानाति केशवं मायां न सेवे भद्रं ते न वृथा धर्ममाचरे। २२

त्वादिकं प्रागेवोदाहृतं। कृष्णद्वैपायनं व्यासं विद्धि नारायणं प्रभुं को ह्यन्यो भुवि मैत्रेय महाभारतकृद्भवेदिति स्वपित्रा पराशरेणापि स्तुतः पंच
मवेदप्रणेता शारीरकसूत्रकारो व्यासः कालस्य हि च मृत्योश्च जंगमस्य स्थावरस्य च। ईशते भगवानेकः सत्यमेतद्ब्रवीमि ते कृष्ण एव हि लो-
कानामुत्पत्तिरपि चाप्ययः कृष्णस्य हि कृते भूतमिदं विश्वं चराचरं ज्योतींषि विष्णुर्भुवनानि विष्णुर्लोकेत्र यो लोकालोकपाला स्त्रयी त्रयोऽग्नयश्चाहुतय-
श्च पंच सर्वे देवा देवकीपुत्र एवेति तं जिह्मासमानानां हेतुभिः सर्वतो मुखैः तत्त्वमेको महायोगी हरिर्नारायणः परः सत्यं सत्यं पुनः सत्यमुद्धृत्य भुजमु-
च्यते। वेदशास्त्रात्परं नास्ति न दैवं केशवात्परं। आलोड्य सर्वशास्त्राणि विचार्य च पुनः पुनः इदमेकं सुनिष्पन्नं ध्येयो नारायणः सदेति। भग-
वद्गीतासु मोक्षधर्मे च। तेषु तेषु संवादेष्विति द्वैपायनेन भगवत एव परत्वं प्रपंचितं आपस्तम्बायनेन तत्र कृतागमः शौनकायेत्याचार्यत्वेनाभि-
वंदितः श्रीशौनकोपि श्रीविष्णुधर्मे सर्वत्र भगवत्पारम्यं प्राचिकटयत्। मोक्षोपायविधाने च। एवं तस्मात्सोपादेयं भजेत। आब्रह्मस्तंबपर्यंताः
जगदंतर्व्यवस्थिताः प्राणिनः कर्मजनिताः संसारवशिनः यतस्ततो न ते ध्याने ध्यानिनामुपकारकाः अविद्यांतर्गताः सर्वे ते हि संसारगोच-
राः पश्चादुद्भूतबोधाश्च ध्याने नैवोपकारकाः नैसर्गिको न वै बोधः तेषामप्यन्यतो यतः तस्मात्तदमलं ब्रह्म निसर्गादेव बोधवत्। ध्येयं ध्यानविदा स-
म्यक् तद्विष्णोः परमं पदमिति। तथा स्वयं तां तु नरश्चाग्रे वेदवेदांतनिश्चयः यत्तेजोयं पुरुषः पुंडरीकाक्षसंज्ञितः स विष्णुः परमं ब्रह्म यतो
नावर्त्तते पुनरिति भगवदर्चावतारमाहात्म्यमप्येवमाह। यादृशो वा मनः स्थैर्यं रूपे वद्भाति चक्रिणः। नृसिंहवामनादीनां तादृशीं कारये-
द्बुधः सुरूपां प्रतिमां विष्णोः प्रसन्नवदनेक्षणां। कृत्वा मनः प्रीतिकरीं सुवर्णरजतादिभिः तस्यां ब्रह्म समारोप्य मनसा तन्मयो भवेत्। ता-
मर्चयेत्तां प्रणमेत्तां यजेत्तां विचिंतयेत्। विशत्यपास्तदोषस्तु तामेव ब्रह्मरूपिणीमिति। अत्र प्रतिष्ठावशात् मुख्यावतारस्वरूपत्वं विवक्षि-
तं। उक्तं हि भगवच्छास्त्रे सर्वातिशायिषाड्गुण्यं संस्थितं मंत्रबिंबयोः तेनार्च्यो भगवान् साक्षान्नोपचारधिया क्वचिदिति जितंतादिस्तो-
त्रेण च भगवतज्जगत्कारणत्वं मोक्षप्रदत्वादिकं च प्रदर्शयति। देवतापारमार्थ्यं च यथावदेतस्मात्ते भवानिति वैष्णवे पुराणे पुलस्त्यवशि-
ष्ठाभ्यां लिंगे च ब्रह्मणस्तत्त्वरहतिप्रसिद्धः पराशरश्च विष्णोः सकाशादुद्भूतं जगत्तत्रैव च स्थितं। स्थितिसंयमकर्त्तासौ जगतोस्य जग-

स्तो॰ भा॰
२२

23

निगृह्यमाणं नितरां प्रच्छाद्यमानं पश्यन्ति शास्त्रतः प्रथमं विशदमधिगच्छन्ति पश्चाद्योगबलेन साक्षात्कुर्वन्ति च। यथाह सनत्सुजातः योगिनस्तं प्रप॰
श्यन्ति भगवन्तं सनातनमिति केचिदिति दुर्लभत्वस्य वचनार्थं। गीयते हि स महात्मा सुदुर्लभ इति श्रीपौष्करे च॥ दुर्लभा भगवद्योगभाविनो भुवि मान
वाः तद्दर्शनदानाभावात् स्तुवन्तं शाश्वतं परमिति। अनिशं सर्वजनमोहनेऽकलियुगेऽपीति भावः उक्तं हि भगवता शौनकेन कलौ कृतयुगं तस्य
कलिस्तस्य कृते युगे। यस्य चेतसि गोविन्दो हृदये यस्य नाच्युत इति। त्वदनन्यभावाः त्वदेकविषयचित्तवृत्तयः प्रयोजनान्तरव्यारणान्तरला
गिन इत्यर्थः स्मर्यते। यत्तदद्रेश्यमग्राह्यमित्यारभ्य यद्भूतयोनिं परिपश्यन्ति धीराः। ज्ञानप्रसादेन विशुद्धसत्त्वस्ततस्तु तं पश्यति निष्कलं ध्या
यमानः नायमात्मा प्रवचनेन लभ्यो न मेधयेत्यारभ्य तस्यैष आत्मा वृणुते तनूं स्वां तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितं गह्वरेष्ठं पुराणं। अध्या
त्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहाति। एष सर्वेषु भूतेषु गूढोत्मा न प्रकाशते। दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः। स्वाध्या
यश्चक्षुर्भूतमेकमस्य योगो द्वितीयमभिवीक्षणाय। अध्ययनमननमयनो सद्दर्शनमांसचक्षुरभिवीक्षते नमिति सार्धेन च येनमेव प्रपद्यन्ते सुहृं

यदण्डमण्डान्तरगोचरं च यद्दशोत्तराण्यावरणानि यानि च॥ गुणाः प्रधानं पुरुषः परं पदं परात्परं ब्रह्म च ते विभूतयः॥१७॥

तिमानवाः भक्त्या त्वनन्यया शक्यो ह्यहमेवंविधोऽर्जुन ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परन्तपेति।१८। उक्तप्रकारपरिदृढत्वमनितरसाधारणे
न विभूतिमहिम्ना स्थिरीकरोति। यदण्डमिति यत् पितामहोत्पत्तिस्थानं तथा ब्रह्माण्डं चतुर्दशभुवनावरणहेतुकटाहरूपमण्डमेकवचन
मिह समुदायाभिप्रायं मण्डानां सहस्राणां सहस्राण्ययुतानि च। ईदृशानां तथा तत्र कोटिकोट्ययुतानि चेति पुराणोक्तेः। अण्डान्तर एव गोचरो
यस्य तदण्डान्तगोचरं। उदेवरदशकवर्षबाह्यप्रदेशमण्डाधिपतिप्रभृति चतुर्विधजन्तुजातं तद्भोग्यभोगोपकरणभोगस्थानादिकं द
शोत्तराण्यावरणानि यानि तोयप्रभृतीनि। उक्तं हि। दशोत्तरेणापयसामेत्रेयाण्डं च तत्कृतं। सवायुपरिधानोसौ वह्निना वेष्टितो बहिः। वह्नि
श्च वायुना वायुर्नभसा मैत्रेय नभसा वृतः भूतादिना नभः सोपि महता परिवेष्टितः दशोत्तराण्यशेषाणि मैत्रेयैतानि सप्त वै। महान्तं च समावृ
त्य प्रधानं समवस्थितं। अनन्तस्य न तस्यान्तः संख्यानं चापि विद्यते। तदनन्तमसंख्यातप्रमाणं चैव यत्ततः हेतुभूतमशेषस्य प्रकृतिः सा परा मुने। २२

स्थूदंगतो मन्माया शास्त्रादेर्ययि जनार्दनमिति जगत्तत्त्वबोधद्वारेण संतीर्णेतावता प्रमाणसिद्धोर्थेन स्यादन्यथा स्यादिति भावः। १५। अथ सर्वश्रुति
पन्नभावनिबंधनं चोद्यं तत्सद्भावेन परिहरन् परसमृद्धिप्रयोजनतया सतत्स्थानां भगवदनुभवलाभेन संतुष्यति। उक्तं घितेति। यस्मात्
त्रिगुणमयैर्भावैरेभिः सर्वमिदं जगत् मोहितं नाभिजानाति मामेभ्यः परमव्ययमिति। सर्वैरवेद्यतया स्वेनैव बोद्धव्यं भगवत्तत्कथं केचिज्ज्ञा
नी सुरिति शंकायां तत्त्वबोधहेतुरिहोच्यते। सर्वलोकपरिजिहीर्षार्थं भगवत्स्वानवगमहेतुरुक्तः अत्र त्रयादित्सार्थेन ज्ञानकारलोकिः सीमपरिछि
न्निसाचात्र देशतः कालतो विषयतश्चत्रिविधासमभ्यातिशायी। च समातिशायिनोत्रिविधसीमसमातिशयिनोप्य संभावनोक्तं घितायेन तस्मात
थोक्तः अन्ये यां हि प्रभुत्वं देशादिभिः परिच्छिन्नं अत एव समाधिकसंभावनायुक्तं तत्व सत्यं ज्ञानमनंतं ब्रह्म। न समोनेन कश्चन न तत्समस्ता
भ्यधिकश्चदृश्यते। न त्वत्समोस्त्यभ्यधिकः कुतोन्यः। नास्ति नारायणसमं इत्यादि प्रसिद्धस्य परिच्छेदिमस्वभावं प्रभुत्वरूपं यावत्स्वरूपभाविनं
धर्मं प्रलोपयितुमिति पातो तेमायावलेन गुणमयप्रकृतिसामर्थ्येन सूयते चाहिः अस्मान्मायी सृजते विश्वमेतत्तस्मिंश्चान्यो मायया संनिरुद्धः

उक्तं घितत्रिविधसीमसमातिशायिसंभावनं तत्र परिछेदिमस्वभावं मायावलेन भवतापि निगुह्यमानं पश्यंति केचिदनिशं त्वदनन्यभावाः। १६।

मायां तु प्रकृतिं विद्यान्मायिनं च महेश्वरमिति। स्वयं चाह। दैवी ह्येषा गुणमयी मम माया दुरत्यया इति जितं ते स्तोत्रे चोक्तं। अथ कृष्णानुमंताव
गुणमायासमावृत इति उक्तं च चतुःश्लोक्यां। यवनिका माया जगन्मोहिनीति। यद्वा अत्र माया वजशब्देन स्वासाधारणप्राकृतविग्रहे कर्मवश्य
मनुष्यकर्मादिसाजात्यभ्रमजनन शक्तिप्रकर्ष उच्यते। यथोक्तं। अवजानंति मां मूढा मानुषीं तनुमाश्रितं परं भावमजानंतो मम भूतमहे
श्वरमिति। ईशानपि महायोगी सर्वस्य जगतः प्रभुः स्वकर्मणा पराभूतेकर्तुकीनाश इव दुर्बलः स्वेनैव च यतेलोकान् मायायोगेन केशव इति च।
नवृताणि। आत्मा मम मानुषं मन्ये रामं दशरथात्मजं। अहं वो बांधवो जात इति स्ववाक्येनापि मोहयता सर्वेषां न शर्वशक्तिनापीति भावः। भवता
वलेनेति। तत्कृत्यमेव स्वरूपमुपादाय तत्सेवायां प्रवृत्तास्त्वामपि स्ववशीकृतास्त्वत्तोपि वलीयांसो भवंतीति भक्तानां पश्यावातिशयव्यंजनार्थोपि शब्दः

वाचिनां शब्दानां परमात्मस्वरूपपरत्वप्रतिक्षेपायोक्तं षड्र्थसंक्षेपे व्यतिरेकाधिकरणनिवासशब्दैरिति । अस्य च स्थानस्याप्राकृतत्वं क्षयंत
मसरजसः । पराके ऽप्यादित्यवर्णं तमसः परस्तादिति रजस्तमोमयप्रकृतिः सीमातिक्रांतत्वश्रुत्या भगवच्छास्त्रे प्रसिद्धं । प्रकृतेरेवाक्षराख्यप
रिणतिविशेष ईश्वरस्य मुक्तानां नित्यानां च भोगस्थानमिति केचिद्वदंति । तन्निरासार्थमिह प्रधानपुरुषाभ्यां पृथ्वात्परमपदस्य पृथगुपाद
नं च । अयं च पुरुषः कालं स पचते तत्र न कालस्तत्र वै प्रभुरित्यादिभिश्च निरस्तः । यद्वा ते भगवत्स्वरूपमेव वा तत्र षाड्गुण्यविचित्रशक्तिवश्यात्तदि
त्यलोकत्वेनावस्थितमित्याहुः । तदपि श्रुत्यादिषु दृष्टपृथगुक्तेर्बाधाभावात् । अन्यथा निर्विकारत्वादिश्रुतिविरोधप्रसंगाच्च निरस्तमित्यभिप्रा
येणाविभूतय इत्युक्तं ॥ प्रधानादिसाधारण्यव्यतिरेकनिर्देशः कश्चित्तद्विरुद्धनिर्देशस्तु यथाहमुपचारेणनेत्यद्य इति परात्परमित्यत्रयं च मंत्रः
परशब्दः प्रधानात्परतः क्षेत्रज्ञवर्गोऽपरभूतमुक्तमाह । प्रथमात्तस्त्वनादिमुक्तजीवं यद्वा । प्रकृतेः परात्क्षेत्रज्ञात्परमिति बद्धमुक्तनित्यजीव
जातस्य सामान्येनोपादानं । अत्र ब्रह्मशब्देन च भाष्यमिति विग्रहरूपं चर्यते स्वरूपपरत्वे विभूतित्वोक्तेरनौचित्यात् । आत्मेश्वरत्वादिना यस्त्वग
त्यभावे हि स्यात् इह तु सालंबनो महायोगः सर्वज्ञो यत्र संस्थितः मनसस्त्वाहते सम्यक् युंजतां जायते मुने स योगः सर्वशक्तीनां ब्रह्मणः
समनंतरं । मूर्तं ब्रह्म महाभाग सर्वे ब्रह्ममयो हरिरिति । वैष्णवे पुराणे प्रोक्तं ॥ चतुःश्लोक्यां च मूर्तं ब्रह्म ततोऽपि यस्मिन्स्थितं रूपं यदस्य तु
नमिति ॥ तत्र ब्रह्मशब्दोपचारनिमित्तं जीवकोत्तरबृहत्त्वं कृष्णत्वे च कारेणादिव्यभूषणायुधादेरपि संग्रहः ते सर्वोत्तरात्मत्वेनधिष्ठापतित्वेन च
श्रुतं सविभूतयः नियंतव्याः शेषभूताश्च एतेषु द्रव्याणां न तदस्ति विना यत्तस्मान्मया भूतं चराचरमित्युक्ता पृथक्सिद्धिमत्तया शरीरत्वेन विभू
तित्वं अद्रव्याणां तु व्यवहितप्रकारतया हिरण्यगर्भादीनां तु विशेषतः सृष्ट्यादित्रयोपयुक्तविभूतित्वं विभज्योक्तं । वैष्णवे पुराणे ब्रह्मा दक्षाद
यः कालस्तथैवाखिलजंतवः विभूतयो हरेरेता जगतः सृष्टिहेतवः विष्णुर्मन्वादयः कालः सर्वभूतानि च द्विज स्थितेर्निमित्तभूतस्य विष्णोरेता
विभूतयः रुद्रः कालांतकाद्याश्च समस्ताश्चैव जंतवः । चतुर्धा प्रलयायैता जनार्दनविभूतयः इति । अत्र विष्णोरेव विष्णुविभूतित्वोक्तिर्विभूति
सजातीयत्वावताराभिप्राया ते विभूतय इत्यनेन विभूतित्व । स्वाभाविकत्वव्यतिरविभूतित्वं त्वदिद्मय यत्तत्तदात्मधारापि तत्र विभूतित्वस्थितमे
वेति व्यज्यते ॥ ७ ॥ एवं भगवतः परत्वं प्रपंचितमनंतरमाभिगामिकगुणमुखेन सौलभ्यमनुच्यते । यद्वा विभूत्यानंत्यमुक्तं । अथ गुणानंत्यो । २४

इति यच्छब्दानामिह श्रुतिनिर्दिष्टत्वेन यथाऽऽह मध्याह्ने ऽमः गुणाः बंधकारणत्वेन चतुर्दशाध्याये गीताः सत्वादयः प्रकृतिधर्माः अत्र गुणानां पृथगुक्त्या सा
म्यावस्थं गुणत्रयमेव प्रकृतिरिति सांख्यमतं निरस्तं प्रधानं महदादिविकाररहितं त्रिगुणद्रव्यविभागः। अंडांतरगोचरमिति रुद्रव्यष्टीनाम प्रकृत।
या पुरुषश्चाष्टदशदारुरूपमस्ति तेनैतलं यथा तस्युमानपि प्रधाने च स्थितो व्यापीत्यादिभिः प्रकृतिव्याप्तत्वेन प्रतिपादितं रुद्रसमुदायमाह। प
रं पदं प्रपद्यत इति पदं प्राप्यस्थानं स्थानांतरेभ्यः परं पुनरावृत्तिरहितम प्राकृतं मुक्तिस्थानमित्यर्थः। श्रूयते हि यो स्याध्यक्षः परमे व्योमन् हिरण्मये
परे लोके विरजं ब्रह्म निष्कलं पादोस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि। ते ह नाकं महिमानः सचंते यत्र पूर्वे साध्याः संति देवाः यथा पादोदरस्त्वचा वि
निर्मुच्यते। एवं ह वै स पाप्मना विनिर्मुक्तः सामभिरुन्नीयते ब्रह्मलोकं विद्वान् सारथिर्यस्य मनः प्रग्रहवान्नरः सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं प
दं स खल्वेवं वर्तयन् यावदायुषं ब्रह्मलोकमभिसंपद्यते न च पुनरावर्त्तते इत्यादि। भारते च। रम्याणि कामचारीणि विमानानि सभास्तथा आक्री
डा विविधा राजन् पद्मन्यश्चामलोदकाः एते वै निरयास्तात स्थानस्य परमात्मन इति। अपुनरावर्त्तिस्थानं तथोक्तं। ज्ञानविज्ञानिनः केचित् पर
पारमितितीर्षवः। अतीव तत्पदं पुण्यं पुण्याभिजनसेवितं। यत्र गत्वा न शोचंति न च्यवंते व्यथंति च। ते तु तद्ब्रह्मणः स्थानं प्राप्नुवंतीह सात्त्विकाः। ने
वते स्वर्गमिच्छंति न यजंति यशोधनाः सतां वर्त्मानुवर्त्तंते यथावलमहिंसया इति भगवंतं प्रति च देवा ऊचुः। दिव्यं स्थानमजरं चाप्रमेयं दुर्विज्ञे
यं चागमैर्गम्यमाद्यं गच्छ प्रभो रक्षास्मान् प्रपन्नान् कल्पे कल्पे जायमानः स्वमूर्त्त्येति अरण्यपर्वणि च। धर्मसुतं प्रति आदिशेषेण आह। यथा
कः सर्वभूतानां प्रकृतेः प्रकृतिं ध्रुवां। अनादिनिधनं देवं प्रभुं नारायणं हरिं। ब्रह्मणः सदनात्तस्य मैत्र्यैतिपरं स्थानं प्रकाशते। देवाश्चयं।
न प्रपतितिद्दिव्यं तेजोमयं पदं। अत्यर्कानलसद्दीप्तस्थानं विष्णोर्महात्मनः स्वयैव प्रभया राजन् दुःप्रेक्ष्यं देवदानवैः यतयस्तत्र गच्छंति देवं ना
रायणं हरिं। परेण तपसा युक्ता भाविताः कर्मभिः शुभैः योगसिद्धा महात्मानस्तमोमोहविवर्जिताः तत्र गत्वा पुनर्नेमं लोकमायांति भारत स्था
नमेतन्महाराज ध्रुवमक्षयमव्ययं। ईश्वरस्य सदा ह्येतत् प्रणम युधिष्ठिरेति। एतत्कार्ये भगवल्लोकविषयमिति केचित्। अपुनरावृत्तिस्थानं।
त्वाक्षयत्वादिव्यपदेशात्परममेव पदमित्यन्ये युधिष्ठिरादिभ्यस्तत्प्रकाशनं तु व्यासप्रसादादाश्रुतवानित्यादिवत्। ऋषिप्रश्नादुपपद्यते शेषम
प्यविरुद्धं ज्ञेयं। योगयाज्ञवल्क्यस्मृतौ चोक्तं। ॐकाररथमारुह्य मनः कृत्वा तु सारथिं ब्रह्मलोकपदान्वेषी याति विष्णोः परं पदमिति। अत्र स्थान

वीरत्वसंपूर्णाय: कृष्णायप्रयच्छति। तस्याप्यनन्यमनस्कस्य सुलभोनजनार्दनः अनन्यपूर्णोदपांकेनात्। अनन्यपादावनेजनात्। अनन्यकुंचालसं
पृक्तात् नवेच्छेतिजनार्दनइतिपावनत्वंशुचित्वंवा यथापावनः सर्वभूतानांत्वमेवरघुनंदन। पवित्राणांहिगोविंदः पवित्रंपरमुच्यते। पवित्रा
णांपवित्रंयोमंगलानांचमंगलं। शुचिर्भवतिसंस्मृत्यास्मात्लोभुवतिदर्शनात् प्रणिपातेनहृतात्मात्रयः कृष्णमहापुण्यः स्नातोवायद्विवास्ना
तः शुचिर्वायुद्दिवाशुचिः। यः स्मरेत्पुंडरीकाक्षं सबाह्याभ्यंतरः शुचिरिति। मृदुः सापराधैरपिसंजातभयैः सहसाश्रयितुंशक्यः यथोक्तंविदि
तः सहिधर्मज्ञः शरणागतवत्सलः। तेनमैत्रीभवतुतेयदिजीवितुमिच्छसि। अप्रसादस्य समिमंलोककर्त्तास्मिनिशितैः शरैः। नचेच्छरणंशरणं
मन्वेषिमामुपास्यामेथिलीमिति। आश्रितविश्लेषासहत्वंवामृदुत्वंतद्भवकृति। कृणेपितेयद्विरहोतिदुःसहइति। शासनप्रवृत्तस्यापि।
सामोपहितयावाचेति। क्रमेणसामप्रधानत्वंवादयालुः स्वप्रयोजनांतरमनपेक्ष्य परदुःखनिराकरणेच्छावानतदप्युच्यते। आनृशंस्यम
नुक्रोशः श्रुतंशीलंदमः शमः राघवंशोभयंत्येतेषड्गुणाः पुरुषोत्तममित्यादिभिः नचदुःखमयविषमसृष्ट्यादिनानैघृण्यादिदोषोवैषम्यनैर्घृ
ण्येनसापेक्षत्वात्। तथाहिदर्शयतीतिसूत्रकारैस्तत्सूतिकेपात् अतएवमोहोपिकस्यचित्। कदाचिदुपपद्यते। मधुरः रसोवैसः आनंदोब्रह्म
केब्रह्मआनंदत्वंब्रह्मेत्यादिश्रुतिसिद्धनिरतिशयानंदः स्वरूपः अतएवोपायदशायामपिमाधुर्यमुच्यते। प्रियोहिज्ञानिनोत्यर्थमहंसचममप्रियः
कथयंतश्चमांमन्याःतुष्यंतिचरमंतिच। कनाकदृष्ट्वामनपुनरावर्गितरूपा। कजयोवासुदेवेतिमुक्तिबीजमनुत्तममितिवाचिकंकायिकं
माधुर्यकथयंप्रियवादीचभूतानांसत्यवादीचराघवः। सोमवत्प्रियदर्शनः। रूपौदार्यगुणैः पुंसांदृष्टिचित्तापहारिणी। साक्षान्मन्मथमन्मथइत्या
दिषुप्रसिद्धं अतएवजिघांसावस्थायामपिहृद्यत्वंनकदुष्टयोर्भीष्मचैद्ययोः प्रसिद्धं। स्थिरः आश्रितापराधैस्तत्सदर्शकैरप्यक्षोभः यथाह
सुग्रीवाद्वालीन्यातिमित्रभावेनसंप्राप्तंनत्यजेयकथंचन। दोषोयद्यपितस्यस्यात्सतामेतदगर्हितमिति। समः जातिगुणवृत्ताद्विशेषमपवनामपि
शरणत्वेपिविशेषरहितः श्रूयतेहिसर्वस्यशरणंसुहृदितिस्मर्यतेच। सर्वलोकशरण्यायसुहृदंसर्वभूतानांसमोहंसर्वभूतेष्विति। कृतीस्वा
श्रेकर्त्तव्यविशेषरहितस्तदाह। नमेपार्थास्तिकर्त्तव्यमिति। यद्वाआश्रितरक्षणेकृतकृत्यः तदप्युक्तंअभिषिच्यचलंकायांराक्षसें
द्रंविभीषणं। अथवाकृतमुपकारः कृतंतदइत्यत्रतथाहृष्टः तदानकृतीधर्मप्रवर्त्तनार्थोनुष्ठानवान्वादेधापिविस्रोपकारइत्यर्थः। आश्रिते।

किः। वशीति वशः स्वतन्त्रत्वं आयत्तत्वं वा तद्वान् वशी। तथा च नैघण्टुकाः वशो जनस्पृहायत्तत्वप्रभुत्वयोरिति तत्र प्रभुत्वार्थे शार्वे सर्ववशी
सर्वेशानः जगद्वशी वशी ते रुद्रस्य सचराचरमित्यादिषु प्रसिद्धः तथा सर्वेभ्यो लोकोपकृत्परिदृष्टत्वं गुणान्तरविधानार्थे मनुष्यते तस्मिन् सतिवश
माणगुणभृशशोभते स्वायत्तत्वार्थे तु संश्रिताधीनतया सौलभ्यातिशयः कथ्यते यथाह स्वयमेव। ये भजन्ति तु मां भक्त्या मयि ते तेषु चाप्यह
मिति। इमौ स्म मुनिशार्दूल किंकरौ समुपस्थितौ। आज्ञापय यथेष्टं वै शासनं करवाव किमिति। पाण्डव इत्यत्र पार्थसारथित्वादिष्वेतत्
स्य प्रसिद्धः वदान्यः प्रियवाक्दानशीलश्च वदान्यः परिकीर्तितः। अर्थिषु प्रियवाक्त्व उदारदाराः सर्व एवैते ज्ञानी त्वात्मैव मे मतमिति स सर्वान
र्थिनो दृष्ट्वा समेत्य प्रतिनन्द्य चेत्यादिषु दृष्टः स्वात्मपर्यन्तसर्वदानशीलत्वं च। य आत्मदाः धनदा बलदाः एको बहूनां विदधाति कामान्। एतच्छे
म वा कुरुतां त्वा यो ऽर्थिष्ठ तिष्ठति तस्याद्दिष्टादिष्ठक्तं नारदस्य पुण्डरीकं प्रत्याह। तस्मात्त्वमपि विप्रेन्द्र नारायणपरो भव। तदन्यः को महोदारः प्रार्थितुं द
तुमीश्वर इति। उक्तं च श्रीविष्णुधर्मे सकलफलप्रदो हि विष्णुरिति। रत्नपर्वतमारुह्य यथा रत्नं नरो मुने। सत्त्वानुरूपमादत्ते तथा कृष्णान्मनो
रथानिति। इतिहासोत्तमे च। यथा कल्पद्रुमात्सर्वं प्राप्यते मनसेप्सितं। तथा संप्राप्यते विष्णोरपि स्मात् दुष्प्रेप्यं द्विजेति। स्वयमप्याह। अश्वमेधस
हस्राणां सहस्रं यः समाचरेत्। नासौ पदमवाप्नोति मद्भक्तैर्यदवाप्यत इति गुणशाली त्र न गुणसामान्यपरः गुणविशेषमध्यपतितत्वात् समस्त
कल्याणगुणामृतोदधिरिति निगमनचरितार्थत्वाच्च अप्रधानविषयत्वं पारिभाषिकगुणपरत्वं सत्वादिगुणविशेषार्थत्वमत्र संगतमयुक्तं च
अत उचितः कश्चिद्गुणविशेषोऽत्र विवक्षितः गुणप्रतेगुणः श्रमसनीयः अनरूपसमत्वेन शीलनीय इत्यर्थः ईदृशत्वं च शेषाशीलस्य गुणान्तरे
भ्यः समधिकं। इदं च महतो मन्दैः सह नीरन्ध्रसंश्लेषस्वभावत्वं तच्च गुहशबरीगोपालादिवृत्तान्तेषु प्रसिद्धं ऋजुराश्रितेषु वाङ्मनःकाय
वृत्तीनामेकरूपतया कौटिल्यरहितः एतेन विश्वसनीयत्वमुच्यते तथा चाह। अप्यहं जीवितं जह्यां त्वां वा सीते सलक्ष्मणां। न तु प्रतिज्ञां संश्रु
त्य ब्राह्मणेभ्यो विशेषतः। द्यौः पतेत् पृथिवी जीर्येत् हिमवान् शकलीभवेत्। शुष्येत्तोयनिधिर्वाक्यं मे मोघं वचो भवेदिति। आश्रितच्छन्दा
नुगुणो वा स्यात् पित्रा वा ऋजुत्वं श्रुतिरपहतपाप्मत्वादिगुणकः भावशुद्धिर्वा विवक्षिता सा चाश्रितरक्षणोपकारादिनिरपेक्षताऽन्यता
रतम्यानादरेण भक्तिमात्रप्रसाध्यत्वं चायथोच्यते। भक्तैरल्पमुपानीतं प्रेम्णा भूर्येव मे भवेत्। भूर्यप्यभक्तोपहृतं न मे तोषाय कल्पते। ४१

स्तो॰ भा॰ २६ प्रकर्षत्वेन समानाधिकरणं वा। अब्जभूशब्देन कृष्णीनःप्रोवाच भगवानब्जयोनिः पितामह इत्यादिप्रसिद्धमौलात्रिकं वैभवं सूच्यते। एतेना
नंदवत्त्वं प्रजापतिशब्दविवक्षितं व्याख्यातं। अपिशब्दो संभावितमक्लिमिश्योतकः हिरण्यगर्भसार्वभौममनुष्यस्थानेनिवेशपतत्वमती
प्य चतुर्मुखपर्यंतान् विद्यमानानपि पुरुषान् सर्वोपेक्ष्याप्रकर्षेणैककल्पयित्वेत्यर्थः। ते येशानमित्यनुक्रमात् प्रत्यस्मृतिपठितानुक्रमेणवि
द्यमानानां संख्यातपरिपर्यायतया न्यूहं कृत्वेति भावः। गिर इत्यनेन यथावद्धर्माभिधानसामर्थ्यं सूच्यते। ते येशानमित्यादिसमभिव्याहाराद्
गिर इति विशेषः सिद्ध्यति। यद्वा व्यानंदवत्त्वं सैषानंदस्य मीमांसेत्यारभ्यानंदाख्य एक एव गुणः परिच्छेत्तुमशक्य इत्युक्तं तथापि युवा स्या
दित्याद्विना गुणविभूतिप्रकर्षनिबंधनस्यानंदप्रकर्षस्योपक्रांततया परस्मिन्नपि ब्रह्मण्यनंतगुणविभूतिनिबंधनस्य विवक्षितत्वात् ता
२६ वांतरीयकतया सर्वगुणानां निरवधिकत्वं सिद्ध्यतीत्यभिप्रायेणाह। त्वदेकगुणावधीप्सयेति अत्र गुणगुणिभेदव्यपदेशात्। भगवत्स्व
रूपेणात्वद्गुणनामभेदं वदद्वदंतः प्रयुक्ताः समानाधिकरण्यं तु धर्मधर्मिभावादेवोपपद्यते॥ अन्यथात्वन्मतेपि स्वयं गिरा विकीर्षितनिर्गु
णवादपविशेषः स्यात्॥ अपिशब्दः सदास्थित इत्यत्रवान्वेति सर्वदाप्युक्ताऽपीत्यर्थः यद्वा सदास्थिता गिर इति मिलतयावत्ककदोषोक्ति
उपर्युपर्यब्जभुवोपि पूरुषान् प्रकल्प्य ते ये शतमित्यनुक्रमात्। गिरस्त्वदेकैकगुणावधीप्सया सदा स्थिता नोद्यमतोऽतिशेरते॥ १९॥
नत्वं व्यजतेतद्याप्रकल्पाविनोद्यमतोव्यतिशेरत इत्यन्वयः पुनः पुनरुपक्रमावस्थैव परिशिष्यत इति भावः तत्र तस्येयं पृथिवी स
र्वा वित्तस्य पूर्णा स्यादित्यसंभावितकल्पनैवोपक्रमः। अतः समानन्याय्यतयाऽतादृशकल्पनाप्रवाहेपि श्रुतेस्तात्पर्ये सुष्ठितं सर्वं नाराय
णशब्देन संबोधित एवानंदवत्त्वं श्रीस्यवब्रह्मशब्दार्थतया अत्र त्वच्छब्देन निर्दिश्यते। सयश्चायं पुरुषे यश्चासावादित्ये स एक इति पु
रुषवर्तिनः सर्वांतर्यामिनः सवितृमंडलवर्तिपुंडरीकाक्षपुरुषेणैक्योपदेशाच्च अत्र विज्ञानमयादप्यंतरमानंदमयं स्वात्मानं
नारायणमेवव्यनक्ति॥ १९॥ नन्वेवंविधनिरतिशयानंदस्य भगवतो न तावत्स्वार्थो जगद्व्यापारः। अवाप्तत्वप्रसंगात्। नापि परार्थः सं
सारस्य दुःखमयत्वादित्यत्र केन चिदाकारेणोन्नयार्थत्वं विम्बाप्रकारव्यापारानंतं वदन् सर्वोक्तगुणप्रकर्षमेव स्थिरीकरोति। त्वदाश्रि २६

पुविशेषतस्य गीयते योगक्षेमं वहाम्यहं । ददामि बुद्धियोगं तमित्यादिपरैः परकृतं जानातीति कृतज्ञः उपकारस्तेशमपि बहुमन्यत इति तात्पर्यं तदु
च्यते । न स्मरत्युपकाराणां शतमप्यात्मवत्तया । कथंचिदुपकारेण कृतेनैकेन तुष्यति । स्वयं चाह । गोविंदेति । यदाक्रंदत्कृष्णा मां दूरवासिनं कृ
ष्णा ऋणं प्रवृद्धमिव मे हृदयान्नापसर्पतीति । यद्वा कदाचित्स्वकृतमाश्रितप्रार्थनाभंगं शाखामृगवानरे लेन स्वपेक्षितमरणाय संतापेन जानातीति कृ
तज्ञस्तदाह । शिरसा याचतस्तस्य वचनं न कृतं मयेति । त्वमासीति मध्यमपुरुषेणार्थसिद्धावप्याधिकेन त्वंशब्देन हेमारविंदपरिमलन्यायात् गुण
नां गुणाधीनोत्कर्षः सूच्यते । तदुक्तमभियुक्तैः । गुणवत्तमिति पारम्यगुणाः सत्यज्ञानप्रभृतयस्तत्त्वकृतया सुरभिभावजाता इति निर्णयसीवहिश्रु
तिवशादिति । असीति वर्तमानव्यपदेशः कालभेदेन स्वभावभेदशंकामपनुदति स्वभावतः न तु गुणविशेषविवर्त्तपरिणामैरित्याशयः । नित्या
नां मुक्तानां च गुणास्त्वदधीनाः त्वत्तु न पराधीनत्व इति भावः । श्रूयते हि स्वाभाविकी ज्ञानबलक्रिया चेति तत्त्वधिया विद्यमानः कश्चित् कल्याण
गुणो नास्तीत्यभिप्रायेण सामान्यतः संगृह्योपसंहरति । समस्तकल्याणगुणामृतोदधिरिति समस्तकल्याणगुणात्मकोसौ तेजोबलैश्वर्यम

वशी वदान्यो गुणवान् ऋजुः शुचिर्मृदुर्दयालुर्मधुरः स्थिरः समः । कृती कृतज्ञस्त्वमसि स्वभावतः समस्तकल्याणगुणामृतोदधिः ॥ १९ ॥

हावबोध इत्यादिकमिहानुसंधेयं । अत्र कल्याणगुणशब्देन निर्गुणश्रुतीनामुत्सर्गापवादादित्याहेयगुणराहित्यपरत्वसूचनात् कल्याण
गुणकात्स्न्र्यवचनाच्च निर्गुणवादः परिमितगुणवादश्च निरस्तः । यथा रत्नानि जलधेरसंख्येयानि पुत्रक । तथा गुणा ह्यनंतस्य संख्येया महात्मन इ
त्यादिकं सूचयता गुणामृतोदधिरित्यनेन गुणानामपरिच्छेद्यत्वं कात्स्न्र्येन भोग्यत्वं च व्यज्यते । ब्रह्मस्वरूपवत्तद्गुणानामपि भोग्यत्वं श्रूयते । सो-
श्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चितेति । इहात्मानमनुविद्य व्रजंत्येतांश्च सत्यान्कामानिति दहरविद्योक्तन्यायात् कामशब्दस्य कमनी
यकल्याणगुणगणपरः ॥ १९ ॥ उक्तानामसंख्यातानां गुणगणानामेकैकस्यानवधिकातिशयत्वमभिप्रेत्याह । उपर्युपरीति । उपर्यधः सामी
प्ये च अभिसर्वतसोः कार्याधिगुपर्यादिषु त्रिषु द्वितीयाम्रेडितांतेषु ततोन्यत्रापि दृश्यत इत्यनुशासनान्नात्र द्वितीया पंचमी त्वतसर्थप्र
त्ययांते उपरिशब्दयोगादत्रापि षष्ठी चाम्रेडितो उपरिशब्दः युक्तेति विशेषतो द्वितीयाविधानादिहान्यासा । अब्जभवपुरुषानिति ब्रह्मेक्ति

२७

स्तो॰भा॰ २६

स्यादिति चेन्मैवं तत्रापि तच्छरीरित्व इति अभ्युपगते सर्वशरीरित्वानुगुणत्वेनैवैकस्य प्रदेशस्य श्रुतिस्मृतिप्रसिद्धयर्थं समन्वितस्यार्थस्य नेतव्यत्वा
त् रामसुग्रीवयोरैक्यमित्यादिनाप्यायाच अन्यथान्यथाहं विहरामीत्यादिना दृष्टान्तदार्ष्टान्तिकभावेनाप्यन्वयोन घटेत तदिह मुक्तानां विहारस
म्प्रवचनयस्तु नश्रोतुत्वमप्रमाणः सकलमादेवास पितरः समुपतिष्ठन्ती सुपनिषदुक्तपरिच्छिन्नव्यापारविषयत्वदेवहितत्वांति मेपुरलेदर्शितं सा
युज्यं प्रतिपन्ना ये तीव्रभक्तास्तपस्विनः किंकरा मम ते नित्यं भवन्ति निरुपद्रवा इति एवं मुक्तानां जगद्व्यापारशक्तिरस्ति तत्प्राप्तिर्नास्तीति प्रश्नेन
विचार्ये नहि मुक्तानां सर्वशरीरित्वं अश्रुतत्वादनुपपन्नेश्च तद्भावे कथं वक्तुं स्यादिति संकल्पशक्तिः तथाविधशक्तिशालिनस्तत्प्राप्तिश्च
त्रद्वर्वचातथैव नित्यानामपि उक्तं नाणे अनन्तपदमाख्याने सातिशयस्वरूपगुणनित्याप्राप्त्याऽनि अतो यथोक्त एवार्थः २६ एवं प्रति
पादितप्रकारेण निरुपाधिकस्वामिनि निरपेक्षस्वतन्त्रे निरवधिकसौलभ्ये भगवति स्वात्मनः स्वरूपनिबंधनं गुणकृतं दास्यमनुभवत स्तद्वि
तां वाहमस्मी त्येवं ममतां योजयस्त तो न ममेति इममेवार्थमभिप्रेत्योक्तं महाभारते अक्षरं स्तम्भवेन्मृत्युः अक्षरं ब्रह्मणः पदं ममेति अक्षरम्
तुर्नममेति च शाश्वतमिति नमस्कारप्रभावश्च श्रीविष्णुधर्मादिषु प्रसिद्धः प्रणम्य सह सा कृष्णं पापमुक्तिमेष्ट महीतले निः क्लमषो भवेत्सद्योन

नमो नमो वाङ्मनसातिभूमये नमो नमो वाङ्मनसैकभूमये नमो नमोऽनन्तमहाविभूतये नमो नमोऽनन्तदयैकसिन्धवे ॥ २७ ॥ श्री ॥ श्री

तारे पांसुर्भेद्यरः दुर्गसंसारकान्तारमपारमभिधावतां एकः कृष्णनमस्कारो मुक्तितीरस्य देशिकः एकोपि कृष्णस्य सकृत्प्रणामो दशा
श्वमेधावभृथेन तुल्यः दशाश्वमेधी पुनरेति जन्म कृष्णप्रणामी न पुनर्भवाय नमस्कारस्मृतो यज्ञः सर्वयज्ञोत्तमोत्तमः नमस्कृत्वा महाय
ज्ञ अश्वमेधफलं लभेत् प्रणम्य दण्डवद्भूमौ नमस्कारेण यो र्चयेत् स यां गतिमवाप्नोति न तां क्रतुशतैरपि नम इत्येव यो ब्रूयात् मद्भक्तः
श्रद्धयान्वितः तस्याक्षयो भवेल्लोकः श्वपचस्यापि नारद हरिममरगणार्चितांघ्रिपद्मं प्रणमति यः परमार्थतो हि मर्त्यः तमपगतसमस्तपाप
बन्धं व्रज परिहृत्य यथाग्निमाज्यसिक्तं एकोपि कृष्ण निपुरितानि सुदुस्तराणि अर्हन्त्याशु मुक्तं इह चक्रधरप्रणामः इत्यादिभिः अत्र नमःशब्दस्यावी
सा पुनः पुनरावृत्तिश्च नित्यानां जितपुरूषाहं स्थानमहसे वचनादिना इतिवत् परत्वसौलभ्यानुभूतिविभूतिगुणानन्त्यानुभवजनितभक्तिप्रकर्षमन
क्तिप्रसूत्यादिषु चैव ब्रवीषादिकं दृश्यते आकृष्टप्रज्ञासायां प्रज्ञापेत जनेनापि चैवास्मये चैव यो नः पुनः प्रजं कृतिरिति वाङ्मनसातिभूमये इत्या
दिषु चतुर्षु पिपासुर्वोपरसं चतुर्थ्यादि सामर्थ्योन्नु ... यतो वाचो निवर्तन्ते यद्वावानमुदितमि

प्रतिज्ञा ख्यां २६

तानामिति। त्वदाश्रितानां कृते तद्रक्षणसिद्ध्यर्थं तद्भोगार्थं चेति भावः एतेन सर्वोक्तापरिमितगुणविभूतिविशेषभवस्य भोक्तृणामसावादरणं च
ङ्कितत्वप्रसंगोपि निरस्तः। भगवत्सृष्टेर्भगवदर्थत्वं सर्वेस्मै देवा बलिमावहंति। सर्वं ह पश्यः पश्यति सर्वमाप्नोति सर्वशः इत्यादिभिः श्रुतिभि
रभिव्यज्यते। जगदुद्भवस्थितिप्रणाशशब्दाणिजर्थगर्भप्रयोजकव्यापारपरा विश्वोपादानभूतस्य स्ववर्तियोभिनोजगच्छरीरकत्वाकारेणो
त्पत्त्यादिकमेव वा विवक्षितं। अत एव गात्रविकृत्पकृपन्नस्य वत्। लीलात्वमपि घटते तेन स्वार्थत्वमपि सिद्धं। आदिशब्देनानुप्रवेशनियमना
दिकमवतारणादिकं च गृह्यते। भवंतीत्यनेन तादृशलीलायाः नित्यत्वं प्रतिकल्पानुवृत्तिश्च व्यंजितः। अत्र तेवेत्यध्याहर्तव्यं। त्वदिति पदच्छे
देन त्वत्तो भिन्नं निमित्तोपादानभूतादवंतीति वा योज्यं। वैदिका विधयः वेदसंबंधिनो विधिभागाः त्वदीयगंभीरमनोनुसारिणः। तवैव खेत
व र कुरंगाहाक्षोभसंकल्पानुविधायिन इत्यर्थः। यथाहः श्रुतिस्मृती ममैवाज्ञा इति एते च त्वदाश्रितार्थाः एवं वा योजना त्वदाश्रितानां चतुर्मुखमु
खानां श्रेति सर्वोक्तानां ब्रह्मरुद्रादीनामित्यर्थः। जगच्छब्द इह यथा हे मंडांतर्वर्तीतत्कार्यविशेषविषय एषां संसारविमोचकत्वं शंकरस्य तु योग

त्वदाश्रितानां जगदुद्भवस्थितिप्रणाशसंसारविमोचनादयः। भवंति लीलाविधयश्च वैदिकास्त्वदीयगंभीरमनोनुसारिणः॥२०॥ ॥

कः समनज्ञरिकः। अन्यांतरं नरः तस्यैव तु प्रसादेन विमुच्यते। प्रमाय इत्यादिनायात्। अनुग्रहोपदेशधर्मप्रवर्तनादिद्वारा लीलात्वोक्ति।
रिह तेषां भगवदनुग्रहेन स्रष्टारः प्रियत्वसुकरत्व स्तच नार्थः त्वदाश्रितानामप्येवं तवतु किंपुनरिति चाभिप्रेतं। वैदिकविधीनां तु भगवदा
श्रितमनोनुसारित्वं च। अथ यदि ते कर्मविचिकित्सा वृत्तविचिकित्सा वा स्यात्। तत्र ब्राह्मणाः संमर्शिनः युक्ता आयुक्ता अर्थधर्मकामासुः यथा
ते तत्र वर्तेरन् तथा तत्र वर्तेथाः एष आदेश एष उपदेश इत्यादिश्रुतिस्मृतिसिद्धं स्मर्यते च श्रुतिस्मृतिः। सदाचारः वेदोऽखिलो धर्ममूलं
स्मृतिशीले च तद्विदामिति विधिशब्द इह वैदिकानुष्ठानपरो वा सर्वयोजनायां च भगवता धर्मसंस्थापनार्थं क्रियमाणानि वैदिककर्मानुरू
पाणि ग्राह्याणि। नान्विह भगवता परमसाम्यमापन्नानां लोपात्स्वजगद्व्यापारादेरुक्तिः एतदाच्च कर्मे देवगुह्यात् गुह्यतमं परमिति। ब्रह्मण
इष्टेन प्रयुक्तं। अहमेव स्वभवतो तेन भेदस्तत्र कश्चन। यथाहं विहरामेवं तत्र मुक्तास्वदेहिन इति। अतो मुक्तस्य भगवदैक्याज्जगद्व्यापारः।

नपरिशुद्धात्मवेदनशीलः ज्ञानयोगरूपं तदपेक्षितं वा शुष्कं ज्ञानं मेनास्तीत्यर्थः तदुभयाभावादेव

स्तो·भा·
२८

त्वं प्राप्य सशरणस्य आसुभ्यं शरणार्थिनः स्वरूपादिषु भगवत्ताप्रकाशितेषु तद्विश्लेषमसहमानस्तस्मिन्नेव स्वरूपानुरूपपुरुषार्थविरोधि।
निवृत्त्यर्थं स्वाधिकारोचितां प्रपत्तिं विप्रादं प्रयुंक्ते। नधर्मेति। धर्मे निष्ठा स्थितिर्यस्य स धर्मनिष्ठः धर्मरूपानिष्ठाय स्येति वा धर्मे तिष्ठतीति वा अ
हं धर्मनिष्ठो नास्मि तथावस्थितकर्मयोग न सात्त्विकरानहं इत्यर्थः। अतएव न चात्मवेदी कर्मसाध्यं नं भक्तिमान् च रूपात्वनन्ययाशक्तो।
ऽहमेवं विधोऽनुनेत्याद्वि सक्ता भक्तिर्मे न विद्यते। अत्र शरणं त्वां प्रपन्ना ये साध्यानयोगविवर्जिताः तेऽपि मृत्युमतिक्रम्य याति तद्वैष्णवं पदमि-
ति। ब्रह्मवचनमनुसंधेयं। त्वच्चरणारविंदे इत्यनेन पवित्रत्वभोग्यत्वे व्यज्येते। अत्रायं क्रमः। शास्त्रार्थतत्त्वज्ञानतः कर्मयोगस्तेन जितस्वांतस्य प
रमपुरुषात्मभावनारूपो ज्ञानयोगः सोऽतद्द्वारा साक्षात्कर्मयोगेनैव वा आत्मावलोकनं तेन जद्व्याधिकारस्य भक्तियोगस्तत्वाप्तिरिति अस्मिन्जन्मनि
कर्मयोग्यभावे पूर्वजन्मकृतेन ज्ञानयोगः स्यात्। इदानीं तदुभयाभावेऽपि जन्मांतरसहस्रेष्वित्यादि प्रतिपादितक्रमेण भक्तियोगः स्यादित्यनुचरोऽन
रनिषेधः इत्यपि गमनिका एवमनन्यसाधनोऽहमित्यभिप्रायेणाह। अकिंचन इति। यद्वा कर्मयोगादिहेतुभूतगुणक्रियाद्विसंपादने दौष्कर्यमभिप्रा

नधर्मनिष्ठोऽस्मि न चात्मवेदी न भक्तिमांस्त्वच्चरणारविंदे। अकिंचनोऽनन्यगतिः शरण्य त्वत्पादमूलं शरणं प्रपद्ये॥२२॥

ये नाकिंचनत्वोक्तिः। ईदृशस्य सत्ते मया किं शरण्यांतरं प्रयोजनांतरं परिगृह्यतामित्यत्राह। अनन्यगतिरिति। शरण्यांतरप्राप्यांतररहित इ
त्यर्थः। तत्र हेतुमभिप्रेत्याह। शरण्यत्वत्पादमूलमिति। शरण्येति संबुध्याममैकं शरणं व्रज मामेकमेव शरणमात्मानं सर्वदेहिनां या
हि सर्वात्मभावेन यास्यस्य कुतो भयमित्यादिस्ववाक्यानि स्मार्यंते यथा सर्वलोकशरण्याय शरणं च त्वामागुरित्यामहर्षय इत्यादयपि। तथाऽजि-
गेऽपि यथैकः पुरुषः श्रेष्ठः परमात्मा सनातनः यस्माद्धुत्यातः सर्वे समाश्रित्यैव मुच्यते। पुराणसारसमुच्चये नारदं प्रत्युपासीत विष्णोः परमकार
णात्। मायामुत्तर्तुकामो वै मायी यो देवतागणः न चान्यस्तानकर्मभ्यां नान्यभक्त्या परं पदं। प्राप्नोति पुरुषस्तस्मात्तमेव शरणं व्रजेत्। संकर्षणसं
हितायां च सर्वधर्मान्परित्यज्य तमेव शरणं श्रयेत्। भगवंतं वासुदेवं प्रपन्नं दविष्णुस्तितिरमिति ज्याख्यसंहितायां च। तमेव हि सर्वभावेन संश्रया
हि महामुने। अन्यत्सर्वं परित्यज्य तमेव शरणं व्रजेदिति विष्वक्सेनसंहितायां सर्वधर्मान्सर्वकामान् ऐहिकामुष्मिकानपि संत्यज्य विधिना निस्व २८
ह्णुधीः शरणागतिः। आचार्याननुसृत्याकुर्यान्नास्तरं एव नवर्त्मनेति कालेश्वपि च सर्वेष्वित्यादिषु सिद्धं ततोऽन्यत्र सर्वत्र भयातिशयं यमपि तुलस्य

४८

स्वादिष्वभिप्रेतं परमयोगिनामपि वाग्मनसामपरिच्छेद्यत्वमिह विवक्षितं । कुदृष्टिसंमतात्प्रतागोचरत्वविवक्षायां श्रुत्यंतरस्ववचनादिविरोधम
भिप्रेत्याह ॥ वाग्मनसैकभूमय इति श्रूयते हि सर्वे वेदा यत्पदमामनंति । सर्वे वेदा यत्रैकं भवंतीति स्मर्यते च वेदैश्च सर्वैरहमेव वेद्यो । न तास्मसवेव
चसां प्रतिष्ठा यत्र शाम्यतीति । यद्वा स्वप्रसादभाजां गोपगोपिकादीनामपि वाग्मनसयोरेकविषयभूतायेत्यभिप्रायः विषयांतरवैमुख्यमजना
र्थ एकशब्दः उक्तं वाग्मनसातिभूमित्वं स्थापयति । अनंतमहाविभूतय इति । अनंता अनवधिका अतएव ब्रह्मादिविभूतिभ्योपि महती विभूतिर्य
स्य स तथोक्तः । नेति नेतीत्यादिभिः प्रतिषेधश्रुतिभिः एतावत्त्वं हि प्रतिषेधतीति स्तावितं विभूतिप्रकर्षवचनं सर्वोत्कृष्टगुणप्रकर्षस्योपलक्षणं
अनंतदयैकसिंधव इति । अनेन वा सर्वगुणप्रकर्षोपलक्षणं । दयानंत्यमाश्रितानां वाग्मनसभूमित्वे हेतुः । अक्षोभ्यत्वादिविवक्षया सिंधु
शब्दः स्वभावतस्तावद्दयाया एवाश्रयः । एतस्मै इत्यादिभिः प्रहितत्वमप्याश्रितेषु दयातिशयाद्रक्षणे विश्रांत इति भावः तदेवमत्र चतुर्थ्यं
तैः प्रागुक्तपरत्वसौलभ्यनिगमनप्राप्यत्वशरणत्वसंग्रहश्च । अत्र नमः शब्देन वक्ष्यमाणानन्यप्रयोजनप्रपत्त्यधिकारिणः प्राप्यपरत्वोप
नैकरसतदधीनस्वरूपादिबोधनमपि सिध्यति ॥ अधिकारापेक्षितानामुपायोत्तरकृत्ययोः फलेन पारतंत्र्यं बोध्यमत्र नमोष्टके किं च सर्वेनि
वृत्तिधर्मसाधारणापेक्षितं तत्त्वज्ञानं निर्ममत्वं च चतुर्थ्यंतैर्नमोभिश्च स्थिरीक्रियते । अनुकूलाभिसंधिः प्रतिकूलनिवृत्तिश्चात्र हृद्गत इति
तन्मुखे न तदंगीकारणं शरणागतिरप्युपेक्षिता भवति ॥ अथवा मरणे सरूपाप्रपत्तिरेवात्र नम इति संग्रहेण प्रत्युच्यते । आवृत्तिरिह सत्
सत्यं पुनः सत्यमित्यादिवदुक्तस्थिरीकरणार्थं नमः शब्दस्य शरणागतिविषयत्वं दर्शयंती वृत्तांते पुक्तं शरणं प्रतिदेवानां प्राप्तकालम
मन्यते तदुक्तेर्थे वाचा मनसा चैव नमस्कारः प्रयुज्यते तेनाभिधानात् ॥ तथा सर्वेषामेव लोकानां पिता माता च माधवः गच्छध्वमेनं शरणं शरण्यं
पुरुषर्षभ च इति मार्कंडेयोक्तशरणागतिविषयश्च नमः शब्दः प्रयुज्यते । एवमुक्तास्त्रयः पार्था यमौ च भरतर्षभ द्रौपद्या सहिताः सर्वे न
मश्चक्रुर्जनार्दनमिति ॥ एतत्प्राशस्त्यं च वदंत आमनंति । यः सन्निधाय्याकृतिर्यो देवो दानवदसमर्थो ज्ञानमेरयो नमसा सध्वर इति । उपबृंहि
तं चैतदहिर्बुध्न्येन समित्साधनकादीनां यज्ञानां न्यासमात्मन इति नमसा यो करोति देवे स स्वध्वर इतीरितमिति । यद्वा स्वाधीनस्वार्थकर्तृत्वभोक्तृ
त्वभ्रमरहिततया प्रार्थयितव्याभावान्न परमफलोपकरणोपार्ध्यं नमः शब्दः अत्र भवति समाहार्यमुपायप्रयोगात् सर्वमेव फलार्थितं । एतदुपजी

मूलेशरणं प्रपद्य इत्यनेनैव गोप्तृत्ववरणात्मनिक्षेपो सिद्धो प्रार्थनान्वितो हि उभयस्मात्सः प्रपत्तिः रक्षादिमात्रप्रार्थनायामाज्ञापनादिपूर्वकं तस्मा
से च प्रपत्तिशब्दप्रयोगदर्शनात्। न चात्र गुरुलघुविकल्पानुपपत्त्या प्रपत्तेर्भेदस्यांगत्वं शंकनीयं। स्नात्वादिविकल्पवदधिकारभेदेन व्यवस्थाप
नात्। प्रणवादिनयादत्र प्रपत्तेस्तत्वदर्शिभिः यथाधिकारमंगत्वस्वतंत्रत्वं च दर्शितं अत्र प्रपद्य इति वर्तमानव्यपदेशस्त्ववहितैव सद्यनं हा
स्याद्यमीत्यादिवदनुष्ठानकालाभिप्रायः॥२१॥ अथ सप्तश्लोकाः प्रस्तुतोपायप्रयोगस्थिरीकरणार्थास्तेषु क्रमात्। परस्य सर्वविशेषविषयेणो
चितगुणविशेषत्वं रक्ष्यरक्षकयोरितरेतरत्वलाभः स्वपरित्यागे परस्यानिष्टप्रसंगः स्वस्यानन्यगतित्वेन तस्य हानानर्हत्वं शरण्ये स्वोगपत्तमवीन
प्रयोजनातरत्वे मुख्यमुपायस्य सौकर्यं स्वाङ्गतमत्वं च तासमर्थनं स्याप्यते। तत्रादिमे पद्यपंचकेप्येवमुपायवरं परानास्ति तयाप्यपायानसंति
चेतनत्वनतस्यादवलंवतेन कमात्कर्मयोगादिकमुत्पाद्य मोक्षं लब्ध स्वकिंतदर्थं प्रपत्तेस्तत्र स्वस्याकिंचनत्वमेव स्थिरीकरोति॥ न निंदिता
भिमर्थेन न निंदितं गर्हितं यस्यार्थाः क्रियमाणं प्रशंसति स धर्मः य कर्हंति सोऽधर्म इत्यापस्तंवः अत्र निंदितशब्देन काम्यकर्मापि संगृह्यते तेषु च स्वा

॥ न निंदितं कर्म तदस्ति लोके सहस्रशो यन्न मया व्यधायि। सोऽहं विपाकावसरे मुकुंद क्रंदामि संप्रत्यगतिस्तवाग्रे॥२२॥

पेक्ष्यात्तस्यापि निंदितत्वात्। लोके सर्वस्मिन्संसारिजने अथवा लोक्यतेनेनेति लोकः प्रमाणं तस्मिन्नास्ति प्रामाणिकमित्यर्थः। अत्र शास्त्र
रूपप्रमाणविशेषविवक्षातः सहस्रशः इति असंख्यातानन्तपर्यायं तत्सहस्रमयुतं सर्वेषामनंतवाचकमित्याचक्षते। यच्छरणागतपरित्यागादापि भ
विक्षे निंदितं। यथाहमनुः शरणागतं परित्यज्य वेदं विप्लाव्य च द्विज संवत्सरं यवाहारः तत्पापमवसीदतीति वाल्मीकिश्च कृतघ्नांश्चैव विशुद्धानपि
धमेतः शरणागतहंतं स्त्रीहतं च न संवदेत्। रघुश्च राक्षसं प्रत्याह शक्तोपि रक्षणे लोभात् यथा वा शरणागतं। यस्तु त्यजेत्तु रूपो लोके ब्र
ह्महत्यां स विंदति। प्रायश्चित्तेन शुध्यंति महापातकिनोपि हि। शरणागतहंतृणां शुद्धिः कापि न विद्यते। हयमेधेन महापातकिनोपि हि शर
णागतहंतारो न त्वेवं रजनीचर। अपि चेत्सुदुराचारः केनापि नरकान्मुमानू मुच्यते न तु पापात्मा शरणागतहिंसक इति। ब्रह्मगीतं ब्रह्मसतिरुवा
च। न चास्य वीजं रोहति निरोहति कालेन चास्य वर्षं वर्षति वर्षकाले भीतं प्रपन्नं प्रददाति शत्रवे न मोक्षारं लभते त्राणमिच्छन्। मोघमन्नं विंदते अप्रचे
ताः स्वर्गालोकान् च्यवति नष्टचेता भीतं प्रपन्नं प्रददाति शत्रवे सेंद्रा देवाः प्रहरंत्यस्य वज्रमिति। एवं शास्त्रेषु निष्कृतिर्दृष्टा महापातकिनामपि शरण २९

दश्रूलमित्युक्तं परमप्राप्यस्य तस्यैवं पादमूलं प्रविष्टानामेव पुनरावृत्तिः अतस्तच्छरणं फलमित्यपि सूच्यते । अनन्यगतिरित्येतत्सामर्थ्या
च्चातत्सिद्धिर्मुमुक्षुर्वै शरणमहं प्रपद्ये इति । मुमुक्षोऽहमित्याह । शरणं प्रपद्ये इति । एतावतास्वनिष्ठामंत्रस्य सर्वखंडशब्दार्थाः प्रदर्शितः प्रपत्तिकर
णे शरणशब्द उपायपरः रहस्याहिर्बुध्न्यसंहितायामुक्तं । उपाये गृहरक्षित्रोः शब्दः शरणमित्ययं वर्त्तते सांप्रतं त्वेष उपायार्थैकवाचक इति प्रपत्ति
प्रयोगश्चैवं प्रदर्शितः । अहमस्म्यपराधानामालयोऽकिंचनोऽगतिः । त्वमेवोपायभूतो मे भवेति प्रार्थनामतिः शरणागतिरित्युक्ता सा देवेऽस्मिन् प्र
युज्यतामिति तन्माहात्म्यं चैवं प्रकाशितं । अनेनैव प्रपन्नस्य भगवंतं सनातनं । तस्यानुबंधाः पाप्मानः सर्वे नश्यंति निष्कृतात् कृतान्यनेन सर्वा
णि तपांसि तपतां वर सर्वतीर्थं सर्वयज्ञ सर्वदानानि च कृतान्यनेन मोक्षश्च तस्य हस्ते न संशय इति । सकलफलसाधनत्वं चोक्तं यद्येन
कामकामेन संसाध्यं साधुना तरैः । मुमुक्षुणा यत्सांख्येन योगेन न च भक्तितः प्राप्यते परमं धाम यतो नावर्त्तते यतिः तेन तेनाप्यते तत्तु न्यासेनै
व महामुने । परमात्मा च तेनैव साध्यते पुरुषोत्तम इति । अत्र अनन्यसाध्ये स्वाभीष्टे महाविश्वासपूर्वकं तदेकोपायतायाचना प्रपत्तिः शरणागति
रिति । भरतमुनिप्रणीतं लक्षणमपि सुसंगतं इहवानन्यसाध्य इति । प्रपत्त्यतिरिक्तेन स्वेनान्येन वाचत्वं विवक्षितं स्वाभीष्ट इति सुखदुःखनि
वृत्तिस्तत्साधनानां च संग्रहः तत्र प्रमाणविरुद्धं फलं शरण्येऽविरुद्धं चानुकूल्यस्य संकल्प इत्यादिना न संगच्छते । स्वाधिकारविरुद्धं तु पुरुषस्य स्वा
भीष्ट इत्यनेनैव निरस्तं उपायलाघवादिभिरकंपनीयो विश्वासो महाविश्वासः । तदेकोपायताशब्देन प्रपत्त्यास्वयत्ननैरपेक्ष्यं च व्यज्यते । प्रपत्तिः श
रणागतिरिति पर्यायपाठः । आनुकूल्यस्य संकल्प इत्यादौ तु षाड्विध्योक्तिरंगांगिसमुच्चयाभिप्रायात् षडंगत्वमुपायं चेत्यत्र षडंगत्वोक्तिरष्टांगयोगव्यप
देशावत् । अन्यथानिक्षेपापरपर्यायो न्यासः पंचांगसंयुतः प्रपत्तिं तां प्रयुंजीत स्वांगैः पंचभिराहृतामित्यादिभिर्विरोधप्रसंगात् । शाश्वतीममसं
सिद्धिरियं प्रकीर्तिता इति यत् पुरुषं परमुद्दिश्य प्रमेयसिद्धिरतोऽन्यथा इत्यंगमुदितं स्वेष्टफले प्रमातद्विरोधिनो अर्हिर्वध्योऽक्रमंगानंतरं तु निःश्रेय
सार्थप्रपत्तिनियतं अंगिनः स्यात्र भरन्यासरूपत्वं । आत्मात्मीयभरन्यास इत्यात्मनिक्षेप उच्यत इति निर्धारितं तदिह पूर्वश्लोकोक्तनमः प्रयोगेणा
नुकूल्यसंकल्पप्रातिकूल्यवर्जने प्रदर्शिते न धर्मनिष्ठ इत्यादिभिरकिंचनाधिकारत्वं कार्पण्यरूपमंगं रक्षिष्यतीति विश्वासस्तु शरण्येति संबुध्या
व्यज्यते रक्षणसमर्थः कारुणिकश्च शरण्यः स च प्रपन्नं मा रक्षिष्यतीति विश्वसनीयः सोपसर्गधातुविशेषस्य प्रार्थनावसायवैशिष्ट्यं भक्तित्वसार

स्तो·भा· वति। तदिह दुर्विषहसंसारनिवर्त्तनोपायनैराश्यजनितशोकाविष्टः शरण्यजन्मगुणाध्यवसायवान् पर्वोर्थप्रपत्त्यधिकारीति दर्शितं भव
२० ति। तथा चोक्तं॥ अहं भीतोऽस्मि देवेश संसारेऽस्मिन् भयावहे। पाहि मां पुंडरीकाक्ष न जाने शरणं परं। इत्थैवं भवतो जाता भूयसी जन्मसंततिः त
स्यामन्यतमजन्मसंचिंत्यशरणो भव। अथ पातकभीतस्त्वं सर्वभावेन भारत विमुक्तान्यसमारंभो नारायणपरो भव। सर्वयोगमनन्यायासमप्रसादम
नोपमं। प्रणतार्त्तिहरं विष्णुं शरणं गंतुमर्हसीति॥२२॥ नन्वनादिसंसारे संप्रति केन विशेषेणोक्तं दसरित्यत्र अनन्यगतिशरण्ये तु भाग्यास्त्वचित
रत्नाकयोरितरेतरलाभप्रतिबाधसाध्यनत्वमाह। निमज्जत इति। अनादिप्रवर्त्तं निमज्जनमिदानीमप्यनुपरतमित्यभिप्रायेण वर्त्तमाननिर्देशः।
अनंतस्वरूपगुणविभूतिभिरपरिच्छेद्यसर्वत्रसर्वदासंनिहितेत्वयि एष ब्रह्मप्रविष्टोऽस्मि श्रीभूश्रीतमित। हृदं। शाम्याम्मि परिनिर्यामि सुखमासाद्य
30 सर्वदेत्युक्तं। सर्वेषां शरण्यानां सामान्यतो निमज्जनं प्राप्तं। अहं तु भवार्णवे निमज्जामीय द्या अनंतत्वं भवार्णवविशेषणं निवर्त्तकस्य तव माहात्म्यमिव
निवर्त्तनीयस्य संसारोऽपि मे निरवधिरिति भावः। भवस्यार्णवत्वरूपणेन संसारार्णवमग्नानां विषयाक्रांतचेतसां विष्णुपोतं विना नान्यत्किंचिदस्ति प
रायणं संसारसागरत्वमित्यादिप्रमाणानि सूच्यंते। सनकादिवज्ज्ञानतिसंपन्नब्रह्मदेशस्योऽहमित्यभिप्रायेणांतःशब्दः। इतःपूर्वमनादौ काले नल
ब्ध इति निर्देशाभिप्रायेण वा अद्य लब्धलाभसंतोषाभिप्रायेण वा चिरायेत्युक्तं मे कमपराहैरित्वं पूर्वमुत्तरोपायानभिज्ञस्य मामेकं शरणं जाने

॥निमज्जतोऽनंत महार्णवांतश्चिराय मे कूलमिवासि लब्धः॥ त्वयापि लब्धं भगवन्निदानीमनुत्तमं पात्रमिदं दयायाः॥२४॥

तिवादिने त्वामुपेक्षितवतः। इदानीं मज्जनहेतुत्ववर्जितवतः। त्वयैव त्वदाश्रयणाय संकल्पितस्येति भावः। अत्र मे लब्ध इति संबंधसामान्ये षष्ठी
मे कूलमिवेति वा अन्वयः। अर्णवान्निमज्जतः कूलमिवेत्यासुर्यं परं अनंतत्वात्तत्राप्यसौ संन्निहित इति शरण्यसौलभ्यं जनेन लब्धोऽसि उपायतया
लब्धव्यशेषं नास्ति॥ न च लब्धस्य प्रच्युतिरिति भावः। न केवलं ममैव लाभः किंतु त्वयापि लब्धं सर्वसमत्वरक्षणाय सदा चार्थयेवीक्षणादिव्याजवि
शेषापेक्षिणा त्वयाऽति संतुष्टेनेति तात्पर्यं। अत्र भगवन्निति संबुध्यातः सेकसेव सर्वहितवेदित्वं तन्निष्पादनशक्त्यादिकं च ध्यज्यते ज्ञानबला
दिपूर्णस्य तव पुनः पुनरयं महोदयलाभः। एतत्त्वमेव वेत्सि त्वयापि दुरपकमिति च इदानीं नाथमुनिप्रभृतिसद्गुरुसमीक्षणदशायामित २०

न गतहंतुः स्वाँ दृष्ट्वा निष्कृतिः क्वचित्। लोभाद्द्वेषाद्भयाद्वापि यस्त्यजेत् शरणागतं। ब्रह्महत्यासमं तस्य पापमाहुर्मनीषिणः। इत्यादि दृष्टवां। आहच
रघुपतिरभयप्रदानप्रकरणे। कृपेः कन्वस्य पुत्रेण कण्डुना परमर्षिणा। शृणु गाथां पुरा गीतां धर्मिष्ठां सत्यवादिना। बद्धांजलिपुटं दीनं याचंतं शरण
गतं। न हन्यादानृशंस्यार्थमपि शत्रुं परंतप। आर्तो वा यदि वा दृप्तः परेषां शरणागतः। अरिः प्राणान्परित्यज्य रक्षितव्यः कृतात्मना। स चेद्भयाद्वा मोहाद्वा
कामाद्वापि न रक्षति। स्वया शक्त्या यथाशक्यो वै लोकगर्हितः इति विनष्टः पश्यतस्तस्य रक्षिणः शरणागतः। आदाय सुकृतं तस्य सर्वं गच्छेदरक्षितः।
एवं दोषो महानत्र प्रपन्नानामरक्षणे। अस्वर्ग्यं चायशस्यं च बलवीर्यविनाशनमिति। एवंविधशरणागतपरित्यागाद्यपि यन्मया न कृतं तन्नास्ति मया
रागादिदूषितचित्तेन भोगमरुकान्तारपाथेनेति भावः एवमनंतप्रतिबंधकाक्रांतस्यावस्थामनुवदन् भगवतो शरण्यं शरण्यत्वं च स्वाध्यवसितमु
पराईं न च मनः किं सोऽहमिति॥ अथापि तादृशस्वभावः प्रायश्चित्तावसरे त्वन्योदितेषु तत्प्रायश्चित्तेष्वप्रवर्तनं तदधिकारशकनानुशया न निदृष्टे
निभावः। संप्रति विपाकावसर इत्यन्वयः प्रायश्चित्तकालातिक्रान्तदुर्निवारोऽस्मानां कलानां भोगादन्येन क्षपयितुमशक्यावस्थायामित्यर्थः मुकुं
द प्रपन्नानामनादिप्रवृत्तमपराधजातमनाहृत्य मुक्तिभूमिप्रद। यथोक्तं श्रीसात्वते दुराचारोऽपि सर्वाशी कृतघ्नो नास्तिकः पुरा समाश्रयेदादिदेवं
श्रद्धया शरणं हि यः निर्दोषं विद्धि तं जंतुं प्रभावात्परमात्मन इति श्रीपुंडरीकाख्याने च। अश्वमेधशतैरिष्ट्वा वाजपेयशतेन च। न प्राप्नुवंति यां ग
तिं नारायणपराङ्मुखाः येनृशंसा दुरात्मानः पापाचाररतास्तथा। तेपि यांति परं धाम नरा नारायणाश्रया इति। क्रंदामि चाक्रोशामि अनेन गोविं
देति यदाक्रंदत् कृष्णा मां दूरवासिनं। ऋणं प्रवृद्धमिव मे हृदयान्नापसर्पति इति शरण्यवाक्यं सूच्यते। अगतिः पुण्यविपाकादपि नृशंसीनस्तया पूर्वो
क्तानन्यगतिः तस्मादपि वयं प्रपन्नेन प्रयच्छतीति सर्वेषां शरण्यानां प्राप्तेः किं पुनः विभीषणो वा सुग्रीवो वा यदि रावणः स्वयं इत्यादिवादिनो भगव
त इत्यभिप्रायेणाह नवेति अत्रापि प्रसादाकारिणस्तव सार्वत्रिकसन्निधावपि सर्वथैः सविग्रहस्य वा शरण्यस्याभिमुख्यमिहाभिप्रेतं। तत्र समा
नार्थानामकारुणिकानां च सन्निधौ विपन्नैराक्रोष्टव्यमिति भावः। यद्वा संसारतंत्रवाहितया पुण्यपापफलप्रदातुस्तव तत्र एव भावः त्वदये क्रंदामि
भोगानुवृत्तिहेतुभूतपुण्यफलाज्जीतिरधिकमाक्रोशाकरणं अथ च भक्तियोगमनुष्ठाय तत्फलमलभ्वा निवयुक्तं दंडयतवाग्रे आक्रोशानेनाप्य
पराधामीति। एवं पूर्वश्लोकेन सपरिकरोपायांतराभाव उक्तः अत्र तु तन्निदानमपायवाहुल्यमनुसंहितं शरण्ये तु उक्तं मुकुंदेत्यनेन स्थापितम

स्तो॰भा॰ नंतेकार्येषु तेषां प्रवर्तंते नाथ शैब्यस्य योरामयथाययाते। भगवच्छास्त्रे च प्रपन्नस्यातकोयद्वत्प्रपन्नः कपोतवत्‌ रक्षारक्षकयोरेतत्संब
२९ न्धरूपेण मे भयोरिति स्वतंत्रस्याकर्मवश्यस्यैश्वरस्य गतपरित्यागेपि कोदोषइत्यत्राह। नत्वेनुरूपइति। नेस्थितेमनसिसकृदेवप्रपन्नायस
र्वधर्मोपि त्याज्य इवादिनो नानुरूपः नचतद्युक्तं रामोद्विर्नाभिभाषते॥ अनृतं नोक्तपूर्वं मे नच वक्ष्ये कदाचनेत्यादिस्ववचनविरोधप्रसंगात्
ततश्च तस्य नाम महद्यशइतिश्रुतिसिद्धं वैपरीत्यं स्यात्। अतो मयासह जडःखभावैर्जनेन सर्वमपि दुःखं सोढुंशक्यं त्वया तु नित्यनिरव
द्येन दोषप्रसंगो न सोढव्य इत्यनिष्टनिवृत्तिर्लाभस्तेमत्तोप्यतिरिच्यते। ममच त्वाम्यवद्यप्रसंगोन इष्टमः तस्मान्मद्रूपेण न द्वयोरनिष्टपरि
हारस्त्वयैव कार्य इति भावः नहि हृत्याजमात्रेण स्वार्थं रक्षिष्यतीतिविश्वास दार्ढ्यं भंजनपरशेषभूतस्य स्वलाभकथनं स्वार्थ्यप्रार्थनं चायुक्त
३२ मितिशंकाच प्रधानभूत परत्वाभोक्तृत्वा परावद्यप्रसंगपरिहारप्राधान्येनचनिरस्ता॥२५॥ अस्त्वेवं प्रतिबुद्धस्य त्वमद्यवलंबनं तथापि मदनु
गृहीतेन त्वया सर्वेषां पापानां क्रमात्प्रदेशानि प्रायश्चित्तानि क्रियतां पुरुषार्थभोगाश्च भुज्यंतामेवं भावश्चेवप्रसिद्धःशरीरारोगमर्थोश्च

॥निरासकस्यापिनतावदुत्सहेमहेश हातुं तवपादपंकजं। रुषानिरस्तोपि शिशुः स्तनंधयो नजातु मातुश्चरणौ जिहासति॥२६॥

भोगांश्चैवानुसंततिकान्ददाति आर्थिनां निसृष्टं अपवर्गप्रदोहरिरिति। अतोनुक्रमेण योगानिपुणानित्यादिक्रमेणमुक्तिं प्राप्स्यतीति भगवतो
भिप्रायमाशंक्य पूर्वोक्तमनन्योपायत्वं अनन्यप्रयोजनत्वं चानंतरश्लोकद्वयेनप्रपंचयन्‌ स्वस्य भगवत्पुरुषार्थत्वोवित्वं वारूपत्वं विज्ञा
पयति। सर्वदुःखस्य स्वतः प्रतिकूलतया दुःसहत्वेन हेयत्वमुक्तं। अनंतयोः श्लोकयोस्तु परमपुरुषार्थप्रतिकूलतया सुखांतरस्या
पिहेयत्वमुच्यत इतिविशेषः निरासकस्यापीतिनिरंकुशस्वातंत्र्यात्‌ स्वावद्यं सोढुमपि तु दैरुपच्छंदनैर्मां प्रतार्य मदभिमतमपदाय्यान्तर्मे
प्रेरयितुमिच्छत इति भावः अपिशब्देन दयापरवशात्वं दीनस्य मम निरासेकथं क्षम इति व्यज्यते तावच्छब्दोवधारणार्थः। नोत्सहेनशक्नोमीत्य
र्थः महेशस भाविनस्वपद भ्रंशानां अहल्यानां त्वदन्येषां हि स्वाश्रितेषु प्यत्वपोपेक्षा स्यात्‌ यथाइन्द्रादीनां ययातिप्रभृतिषु भवतस्तु निरु
पाधिकस्वामित्वस्वातंत्र्यवतो निरवधिकदयाम्बुधेर्मामीदृशी मदवस्थां प्रापयतो मन्निरासे हेतुर्नास्ति मम च त्वामेकमेव सर्वेश्वरम २९

र्थः अयं चाचार्यसंयोजनादिसामग्रीप्रवाहानुगुण्येन त्वयैव संकलितकालइत्याकूतं। एकवचनानुक्तमादिशाद्देद्यापात्रस्यानिःसमाभ्यधि
कत्वस्त्यक्ते। समस्तजावेप्यधिकनिःशेषमात्रं वाविवक्षितं पात्रं विषयः वाग्मनसापरिच्छेद्यानंतापराधिनं स्वात्मानमिदमिति। सानिनयंनिर्दि
शति। एतत्परित्यागे सति कस्मिन्विषयेत्वद्दयादिगुणजातं चरितार्थं स्यात् नहिमत्तोधिककृपाविषयोस्ति अपिकश्चन्मुमुक्षुः स्यादिति।
त्वत्कृपाजगज्जीवयति। अतस्त्वत्सपत्नेरन्पत्नमेकर्तव्यमस्मिआक्रंदनमप्येतदार्तिमात्रं कृतत्वमनुस्वीकृतभरस्समोकृपिष्यामीतिस्वेनैवोक्तं
कर्तव्यमवशिष्यत इति भावः॥२४॥ अथस्यान्परतंत्रस्यज्ञो प्रभृतस्यस्वतंत्रस्वामभीष्टविनियोगः सोहमन्यथाविदुनिवारस्यकिंचतारिडः
खानिचक्रेभ्योहितंवुद्ध्याकरोतिहिशास्त्रस्माराग्निकर्मणिस्वपुत्रायपितायथापरीक्षांचजगन्नाथः करोतुदृढचेतसा। यस्यानुग्रहमिच्छामितस्य
वित्तंहराम्यहं। बांधवानांवियोगेनसद्यो भवति दुःखितः तेन दुःखेनसंतप्तोयदिमांनपरित्यजेत्। तंप्रसादंकरिष्यामियः सुरैरपिदुर्लभं इति स्म
र्यते। अतःस्वकर्मविपाकःकृतव्यः किंक्लिष्टेनेत्यत्राह। अभूतपूर्वमिति। इतःपूर्वंसंजातेभ्योविलक्षणमित्यर्थः ममअद्योजंतुरनीशोयमात्मनःसु

॥अभूतपूर्वं मम भावि किं वा सर्वं सहे मे सहजं हि दुःखं। किंतु त्वदग्रे शरणागतानां पराभवो नाथ न तेनुरूपः॥२५॥

खदुःखयोः ईश्वरप्रेरितोगच्छेत्स्वर्गंवाश्वभ्रमेववाइत्युक्तस्वभावस्यगर्भजन्मजरामरणनरकादिदुःखचक्रवर्तिनःभाविनविष्यन्कंशङ्कः। हे
पार्थःवाकारः स्वानुप्रगतस्योद्भवपक्षान्वाहरेहार्थेस्तेनसह्यत्वाभिप्रायं प्रतर्धयाह। सर्वं सह इति कर्मपरतंत्रतयायथासर्वमनु
भूतजातीयंसर्वंदुःखमनुभविष्यामि मे सहसंहि दुःखं अनर्थपर्यंतपुरुषार्थसक्तस्य मम कर्मप्रवाहैरात्मस्वरूपानुबंधिवदपरिहार्य
मित्यर्थः तथाप्यस्मदसह्यमापतिष्यतीत्यभिप्रायेणाह। किंत्विति। त्वदग्रे अपारकारुण्यस्य सर्वत्र संनिहितस्य सर्वस्वामिनः सर्वशक्तस्य
तवसन्निधौ शरणागतानामितिबहुवचनमन्येष्वपिप्रपन्नेस्वयमेवन्यायइतिद्योतनार्थं मत्सारिभवस्त्वदेकांतिनां सर्वेषां चित्तक्षोभहे
तुरिति चाभिप्रेतं पराभवः कर्मभिःकामक्रोधादिभिरिंद्रियैर्विषयैश्च घोरैस्त्वद्विमुखीकरणंनाथेतिसंबुद्ध्याभगवतोभरस्वीकारयोग्य
त्वं स्वस्यसनाथत्वेन निर्भरत्वंचव्यनक्ति। उक्तंहियुधिष्ठिरकार्यार्थेवचनेनमंदप्रतिसाध्विनाथेनाथवंतोपिभवंतिलोकेतेनात्मकर्माणिसमार

स्तो॰भा॰
३२

ह्वयेन निदर्शयन् आश्रयणसौकर्यादपि हातुमशक्यत्वमवस्थापयति। तत्र प्रथमेन लघुतरकायिकव्यापारविशेषप्रभाव उच्यते २७। त्वदंघ्रिमु
द्दिश्येति। त्वदंघ्रिः सर्वलोकशरण्यस्य तव पादपंकजं न तु साक्षान्मोक्षप्रदानानधिकृतस्य हिरण्यगर्भादेरिति भावः तदुक्तं मोक्षधर्मे ब्रह्माणं शि
तिकंठं च याश्चान्या देवताः स्मृताः प्रतिबुद्धा न सेवन्ते यस्मात्परिमितं फलमिति। अत्र भगवत्स्वरूपस्य स्वत्वेन निष्पन्नसमाश्रयणीयत्वं प्रथमं भा
वयितुमशक्यतया तद्विग्रहस्यैव प्रथमाश्रयत्वं तत्राप्यनतिक्रमणीयं हि चरणग्रहणं इति न्यायात् सर्वानुस्मरणयोगादभिसंधिदर्शनाच्चांघ्रिरु
द्देश्यत्वमुच्यते। उद्दिश्य उपायतया कैंकर्येण स्वलया चाभिसंधायेत्यर्थः एवमनन्यदेवताकत्वमनन्यप्रयोजनत्वं चोक्तं भवति ईदृशस्याधिकारि
णोऽञ्जलिबंधरूपैककरेप्यसादने दर्शपूर्णमासादिवत् तिथिनक्षत्रपक्षमासर्त्वयनादिकालनियमो नास्तीत्याह। कदापीति विधेयहस्तस्यशा
स्त्रीयव्यापारान्तररहितदशायां सर्वदेत्यर्थः एतेन कालविशेषवीक्षणविलंबाभावात् यदेच्छा तदैव सहसा कर्तुं शक्यतयापि सौकर्यमुवि
तमुक्तः कालनियमाभावः कस्यकेनात्वाद्यवस्थानियमाभावस्य देशनियमाभावस्य चोपलक्षणं। एवं वर्णाश्रमवेषवेदांगयुक्तत्वादिनिय
माभावेन सामान्यधर्मतया सत्यवचनादिवत् सर्वाधिकारत्वमाह। केनचिदिति। आस्त्रीबालपीडितमाब्रह्मश्वपाकं चशुकरत्वेन स्त्रीयत्वं चा

॥त्वदंघ्रिमुद्दिश्य कदापि केनचित् यथा तथा वापि सकृत्कृतोंजलिः। तदैव मुष्णात्यशुभान्यशेषतः शुभानि पुष्णाति न जातु हीयते २८॥

अविवक्षितं कर्मान्तरवदुत्कृष्टप्रकारविशेषव्यवस्थाप्यत्र नास्तीत्याह। यथा तथा वापीति। अत्र विकल्पसमुच्चयाविषयाव्ययद्वयस्यै
वमभिप्रायः परावरतत्त्वहितपुरुषार्थेषु विशदबुद्धिर्भवतु वा मा वा। मस्तिष्कसंपुटादिषु यथेष्टप्रकारो भवतु वा विधेयहस्तरहितस्य
वाचा मनसा वा स्यात्। अस्तु वांजलिरचनायां किंचिदचातुर्यं सर्वथा सफल एवायमिति न पुनरेकेन पाणिना यस्तु प्रणमेत्पुरुषोत्तमं। त
स्य तस्य शिरश्छेदः इति धर्मविदो विदुः एकहस्तप्रणामश्चैकं चैव प्रदक्षिणमिति शास्त्रं प्रत्युक्तमेव एकहस्तप्रणामनिषेधश्च प्रतिषिध्य
ते। तेऽयुतावञ्जलिः पुमानिति च नैघण्टुकाः शक्त्यभावे तु सर्वत्र यथाशक्तिकरणमनुज्ञातं सकृत्कृतस्य फलाविनाभावेन प्रजातिशयप्र। वा
तिपादने तात्पर्यं सकृत्स्मृतोपि गोविंदो नृणां जन्मशतैश्चितं पापराशिं दहत्याशु तूलराशिमिवानलः सकृदुच्चरितं येन हरिरित्यक्षरद्व
यं। बद्धः परिकरस्तेन मोक्षाय गमनं प्रति ऋचो यजूंसि सामानि यो धीते सकृदंजसा। सकृदष्टाक्षरं जप्त्वा फलं तस्य समश्नुते विधारस्यु ३२
तन्नित्यं सायं प्रातर्दिने दिने प्रदक्षिणद्वयं कुर्यात् सर्वमेधफलं लभेत्। उत्सवे वसिष्ठाने च तथा कुर्वन् प्रदक्षिणं। पदे पदे ऽश्वमेधस्य फलं

गच्छतो न हि त्वत्परित्यागे कारणमस्तीति भावः। मातुरिति। वसमानपदस्यानेन संबन्धः। तेन माता पिता भ्राता इत्यादिश्रुतिप्रसिद्धस्वभावसूचनं। हातुमित्यत्रोपायतया फलतया चेति योजना। तदुभयं तव पादपङ्कजमित्युभाभ्यामुच्यते सर्वभूतसुहृदः संसारनिवृत्त्युपायभूतस्य भगवतो देवस्य नव सामान्यदेवतं निरवधिकभोग्यत्वात् त्याज्यमिति भावः। उक्तमर्थं सर्वलोकसंमतार्थान्तरनिदर्शनेन स्थापयति। रुषेति। अपि शब्द इह स्वतो निरासानर्हत्वं स्तनदंशनादिजनितक्रोधलेशवशात् कदाचित्तत्संभवं द्योतयति। शिशुस्तनं धयेतिपदाभ्यां स्वरूपतोऽस्वयमवधेयत्वाज्जनस्य तदेककरत्वं नदेकाधीनत्वं चोच्यते। जातु क्रोधदशायां प्रसाददशायां चेत्यर्थः। मातुरिति सर्वदोषप्रसहनानुगुणवात्सल्यं व्यज्यते। चरणाविति। नन्वसौ निरासः यत्र निरासायत्तिनिवृत्ताव् अपि इति काका शासं हातुमिच्छापि न संभवति किमुत हानमित्यभिप्रायेण सनूप्रयोगः ॥२६॥ ननु नासौ निरासः। यत्र भोगप्रदानं मा भूत् केवलभोगपरता इदानीमद्दत्तं भोगान्तरं पश्चाद्भोक्ष्यमिति भगवतोऽपि जापतिप्रभृतिभोगे भोतिशयित भोगप्रदानं मा भूत् केवलभोगपरता इदानीमहत्त्वाभोगान्तरं भुंक्ष्व प्रश्चाद्भोक्ष्यमपि दास्यामीति भगवतोऽपि प्रायमुत्वे स्यपि लवादूमः प्राप्यतया हातुं मशक्यत्वं विरलोति। तवामृतेति। तव रसो वै सः सर्वगंधः सर्वरस इत्यादिषु सर्वप्रकारातिशयभोग्यतया प्रसिद्धस्य सर्वस्य स्वामिनः अमृतस्यंदिनि भोक्तृप्रदे भोग्यतया च श्रुतिस्मृतिसिद्धे निवेशितात्मा रक्षणोन्मुखेन दद्यामिव द्वियोगं त

॥ तवामृतस्यंदिनि पादपंकजे निवेशितात्मा कथमन्यदिच्छति। स्थितेऽरविंदे मकरंदनिर्भरे मधुव्रतो नेक्षुरकं हि वीक्षते ॥२७॥

मित्यादिना तथैव हृदावस्थाप्रापितबुद्धिरित्यर्थः। तस्मादितः परं पुरुषार्थो तं रे मनो निवेशयतुमशक्यमिति भावः। अत्र सामान्यनिर्देशस्तत्त्व मित्यादिना तथैवहृदावस्थाप्रापितबुद्धिरित्यर्थः ... त्वत्पादपद्मे मनो निवेश्य यस्त्वमेवात्र परिचोदनीय इत्यभिप्रायेण कथं स्वादविषयभूतानां मादृशानां सर्वेषां साधारणोऽयं स्वभाव इति ज्ञापनार्थः। त्वत्पादपद्मे मनो निवेश्य ... तदर्थं प्रकृत्त्विरप्यत्र निरस्ता भवति उक्तमर्थं निदर्शनेन शब्दः अमृतमन्यमस्थिरमनर्थमिश्रमनर्थपर्यन्तमेव स्वयं कथमिच्छतीति इच्छानिवृत्तिवचनात् तदर्थं प्रवृत्तिरप्यत्र निरस्ता भवति उक्तमर्थं निदर्शनेन दृढयति। स्थितेऽरविंदे भोक्तृनाम क्लेशेन भोग्यतमतयोपस्थितवृत्तीत्यभिप्रेतं अरविंदशब्दः सुरभित्वसुलभस्पर्शत्वादिव्यञ्जकः प्रथमविकसितावस्थामभिप्रेत्याह। मकरंदनिर्भर इति। मधुव्रतशब्देन तदेकजीवनत्वं तथापि सारतमग्राहित्वं च व्यज्यते। स्वाभिमतविपरीते रूपकं दर्शनोपदेशात् व्याधिभिर्दुर्निरवारत्वं स्तवचयिन्नं तिर्यक् दृष्टान्ततमुक्तः। इक्षुरकं कंटकावृतमस्थिरात्यल्परसं भ्रमरस्पर्शमात्रेण विम्लानतामापद्यमानं देवार्चनाद्य हं निर्गंधं किमपि क्षुद्रपुष्पं तन्न वीक्षते। अत्रासन्नमपि मकरंदरहितत्वाद्वाया नाद्रियते तदुपसदनं दूरतो निरस्तमिति भावः ॥२७॥ अथ गुरुतरो पायस्साध्यं पुरुषार्थं लघुतरेणोपायेन कथं लिप्ससे इत्यत्राह तत्रोपि लघुतरस्यानिवर्त्य धर्मको ऽपि निष्ठस्याजस्रादेः प्रभावं त्वदंघ्रिमित्यादिश्लोक

स्तो॰ भा॰ ३२ स्वल्पलघुतरक्रियामात्रस्य साक्षान्मोक्षसाधनत्वकथने कर्मान्तराणामपि तथा प्रसंगः तदपगमस्तु सर्वप्रमाणानुगुणतया व्याविद्धिरूढ वस्तु
योमुर्द्धेमुनेः प्रागनुष्ठितगुरुतरविध्यासात्त्विककर्मप्रपत्तिवैयर्थ्यं स्यात् । ननु ध्यायन् कृते यजन् यज्ञैस्त्रेतायां द्वापरेऽर्चयन् यदाप्नोति तदाप्नोति कलौ संकीर्त्य केशवं । कलेर्दोषनिधे राजन् अस्ति ह्येको महान् गुणः कीर्तनादेव कृष्णस्य मुक्तबंधः परं व्रजेदितिकालविशेषव्यवस्थया संकीर्तनमात्र
स्यैव साक्षान्मोक्षसाधनत्वमुच्यते । सत्यं तथापि तस्मिन् काले धर्मान्तरमनपेक्ष्य संकीर्त्तनमात्रस्यैवाव्यवहितमोक्षोपायत्वनिष्पादकत्वे तात्पर्यं ग्रा
ह्यं । अन्यथा चरमयुगे प्रपत्तिरनपेक्षिता स्यात् । तद्युगजनिर्भक्तिवत्प्रपत्तिवच्च प्रयोजनान्तरपराणां यथार्हं तत्तदभिमतसाधनं स्यात् । अन
नौ न्यप्रयोजनानां तु उक्तप्रकारेणापवर्गपर्यवसायीति ॥२८॥ अथाजामिलादीनामन्येषामपि विषये ते महाराज राम व्यसनकर्षिताः अपि रुग्णाः परि
प्र॰ म्लानाः संप्राप्ताङ्कुरकोरकाइत्युक्तकौशलजनपादपन्यायेनानुरागलेशमात्रेणापि शरणवित्तरञ्जनेन शमकाले परमपुरुषार्थसिद्धिः स्यादि
त्याह । उदीर्णेति उदीर्णः नित्यमात्मानमसत्कलंकयन्तुमनुपरमेनजाज्वल्यमानः इत्यर्थः संसारः कर्मिणः पुरुषस्य पूर्वपूर्वदेहप्रहाणे नवनव

33

॥उदीर्णसंसारदवाशुशुक्षणिं क्षणेन निर्वाप्य परां च निर्वृतिं । प्रयच्छति त्वच्चरणारुणाम्बुजद्वयानुरागामृतसिन्धुशीकरः ॥२९॥

देहान्तरदेहेरेकीकृत्याविच्छिन्नसंसरणरूपो व्यवस्था प्रवाहः दवाग्नित्वनिरूपनेन तापत्रयप्रचुरतया दुःसहत्वमन्यैरनुपशमनीयत्वं च व्यज्यते
आर्त्तिपोषकत्वं तापप्रज्वालनाम्नुविवक्षिते न सर्वानिष्टोपशमनमभिप्रेत्याह । क्षणेन निर्वाप्येति । न केवलमनिष्टप्रशमनमात्रमित्याह परां च नि
र्वृतिं प्रयच्छतीति निर्वृतिः सुखं यत्र सम्भवत्यनिष्टे तेमुक्तानुभवसाम्यं मुक्तिदशायां परिपूर्णानुभवरूपत्वं चाभिप्रेत्य परामिति विशेषितं त्व
च्छब्देन एवस्वैवानं दयाति रसहृद्वा यं लक्ष्यानंदी भवतीत्याप्नातमाकारद्वयमभिप्रेत्य सत्त्रितं तद्धेतुव्यपदेशात् च तस्मिन्नस्य तद्योगं शास्तीति चर
त णस्यारुणं वृजरूपणेन विग्रहस्यापलतया परभागशोभा व्यज्यते । अन्योन्यसन्निकर्षजनितशोभयाप्यनुरागातिशयहेतुत्वमभिप्रेत्य द्वयोरुपादानं अ
नुरागः नाथयोषिसहस्त्रेषु याप्रीतिरविवेकानामित्यादिनिदर्शिता विषयस्वभावनिबंधनानिरतिशयाप्रीतिरमृतसिंधुत्वरूपेण संजीवनत्वस्वयं
प्रयोजनत्वमरूपत्वं च व्यज्यते । भगवद्विशेषणत्वाद्भगवतिनिरुपाधिकप्रेमगुणाविर्भावेन स्वयंप्रयोजनासक्तिनेष्टोऽपि परमभक्तिदशां प्राप्नोति

दशागुणां लभेत्। यानि कानि च पापानि जन्मांतरकृतानि च तानि तानि विनश्यंति प्रदक्षिणपदे पदे इत्यादि स्तुत्यस्य सकृत्कृतस्मरणस्य
कीर्त्तनादिप्रभावस्य प्रदर्शनमिदं सर्वेषामेव धर्माणामुत्तमो वैष्णवो विधिः इत्युक्ते भगवान् विष्णुर्नेकानामात्मशरीरत्वेन इति सर्वाधिकारत्वेन
कथितेभ्यः संमार्जनोपलेपनमालाकरणादिप्रसादनांतरेभ्यः समधिकं वक्तुमिव व्यायासनिरपेक्षं विवक्षितस्य सुकरस्य स्वरूपमाह। अंजलिरिति
अंजलिः परमामुद्रेति स्मृच्यते श्रीमद्रामायणे च कृतापराधस्य हि तेनानाम्त्वरणामर्हं कृतं। अंतरेणांजलिं बध्वा लक्ष्मणस्य प्रसादनादिति। नाराय
णस्वरूपानात्मत्रानुसंधेयः क्षिप्रं देवः प्रसीदतीत्युक्तमाह। नद्देवेति।। अवधारणेन शरीरांतरकालांतरभावे फलसाधनेभ्यः कर्मयोग्या
वृत्तिः यद्यप्यनादिवासनावशात् सांसारिकप्रवृत्तिरूपनियतसंगः पुरुषस्यानिष्टः स्यात् तथाप्यनेकाध्वपरिहरणन्यायेन तानि चोरयती
त्यपि प्रायेणमुक्त्वा तीत्युक्तं। अशुभानि निरस्त्वभवति भवानियथार्हं मपवर्गे तदुपायविरोधीनीत्यर्थः अशेषतः कात्स्न्येन पर्णलेनकृत्स्नं चांडायनादिवत्
प्रतिनियताशुभमात्रनिवर्त्तकत्वं व्युदस्यते। न केवलमनिष्टनिवर्त्तकत्वमात्रं तस्मिन्प्रसन्ने किमिहास्त्यलभ्यमिति न्यायेनात्र तानुभावप्रम
तिप्रमोक्षैकपर्यंतसर्वापेक्षितसाधकत्वं चास्तीत्याह। शुभानि पुष्णातीति कर्त्तव्यैकस्मिन्नुपकृतमपर्यासं मन्यमानस्य भगवतः प्रसादः तदनु
बधिनमर्पितं तदुपकारायभवतीत्यभिप्रायेणाह। न जातु हीयते इति।। यज्ञो न तेन क्षरतीत्यादिवत् न केनापि हानिरिति भावः यद्वा स्वर्गादिवत्सा
धनस्य परमफलस्य कदाचिदपि विनाशो नास्तीत्यभिप्रायः अथवा फलभूतांजलिरूपेण स्वयं संतन्यत इति विवक्षितं दृश्यते हि नित्यांजलिपुटाहृ
ष्टा इत्युक्तायेन मुक्ता भवंतीह नरा भरतसत्तम। तेषां लक्षणमेतद्धि यत्वेतद्वीपनिवासिनामंजलिरूपेण स्वयं संतन्यत इति विवक्षितं दृश्यते
हि नित्यांजलिपुटा हृष्टा इत्युक्तायेनमुक्ता भवंतीह नरा भरतसत्तम। तेषां लक्षणमेतद्धि शेषमिति। ननु यथाधिकारं न्यासोपासनरूपो मो
क्षोपायो शास्त्रेषु निगतो तत्कथमंजलिमात्रस्य तत्साधनत्वोक्तिरित्यत्र यद्यसावाकिंचन्यादिलाभात् प्रपत्त्यधिकारिणः पुरुषस्य स्वरूपकरणार्थ
स्वव्यापारान्तरनिवर्त्तिव्यंजकमुद्रात्मना ऽवतिष्ठते तदा तदुपलक्षितायाः प्रपत्तेः अनुक्तसकलफलसाधनत्वरूपप्रभावप्रतिपादनेतात्पर्यान्न
विरोधः यदा तु प्रदक्षिणप्रणामादिवदयमपि भक्त्यंगकर्मत्वविशेषः तदा नेहाभिक्रमनाशोऽस्तीत्यादिन्यायात्कल्पफलनिर्वहनसत्त्वोन्मेषसम्यक्
ज्ञानमत्वादिपरंपरया मोक्षसाधनत्वमिति निष्कर्षः कोयं ग्रंथपथः। अतिवादपक्षस्तत्र संभवं त्यागतो न युज्यते। अधिकारिविशेषमाश्रित्यांजलि

स्तो॰भा॰ २४

अपद्दिश्यं ददामि ते चतुरिति तद्पेक्षितं साक्षात्कारं दासस्यामी विभ्रगवतोक्ति ईरस्य सकालांतरे पितस्त्संभवमाशाक्यशीघ्रं स्वोचितं तत्संसर्गविशे-
षमपेक्षते कदा पुनरिति। पुनः शब्दः आशंकाद्योतकः साक्षात्कारमात्राद्विशेषद्योतको वा। शंखचक्रगदापद्मैरंकितं पादपंकजं शारद्वंद्वप्रतीका-
शानखराजिविराजितं। सुरासुरैर्वंद्यमानमृषिभिर्ध्यातं सदा। मूर्द्धानं मामकं देव तावकं मंडयिष्यति। संचिंतयेद्भगवतश्चरणारविंदं वज्रांकु-
शध्वजसरोरुहलांछनाढ्यं इत्यादिप्रसिद्धमाकारमनुसंधत्ते। शंखरथांगेत्यादिना एष ब्रह्मलोकः सम्राडिति होवाच। राजाधिराजः सर्वेषामि-
ति श्रुतिस्मृतिप्रसिद्धसाम्राज्यचिह्नत्वाभिप्रायेण लांछनशब्दः तथा चोक्तं नारदीये भृंगारासनवाजिकुंजररथश्रीवत्सयूपेषुभिर्मालाकुं-
डलचामरांकुशयवैर्मीनध्वजैस्तोरणैः मत्स्यस्वस्तिकवेदिकाव्यजनकैः शंखातपत्रांबुजैः पादे पाणितले तथा नृपतिमायांति स्त्रियो रा-
ज्ञितामिति। त्रिविक्रमेति। संबुद्ध्यानिर्गोन्नतविभागानामदरेणासर्वेषां शिरसि कृतपादन्यासत्वस्य सतदलाभेन निर्वेदश्च सूच्यते। त्वच्चरणांबु-
जद्वयमप्राप्य केशवो राजमिंद्रियैरजितैर्नैर्भिरित्यादिप्रजितैंद्रियैर्दुर्द्दमनतया प्रसिद्धस्य नवलक्ष्मीभूमिनीलाकमलशंखादिरेखालंकृ-

34

॥ कदा पुनः शंखरथांगकल्पकध्वजारविंदांकुशवज्रलांछनं। त्रिविक्रम त्वच्चरणांबुजद्वयं मदीयमूर्द्धानमलंकरिष्यति॥ ३१॥

ताभरणस्थानीयं चरणयुगलं मदीयमूर्द्धानमसंततनिरीक्षणपादस्पर्शनमर्हं सदुष्टतमतया कालीयवद्दमनीयमचिरकालेन दमनीयमिति त्वत्स्व-
रूपविरहेण दूषितमुत्तमांगमलंकरिष्यति पुष्पतांसत्वस्थानां प्रेक्षणीयं करिष्यतीति भावः एतेन कलिदोषनिवर्हिरर्थिता भवति। उक्तं हि महा-
भारते। यावन्न पादपद्माभ्यां पस्पर्शो च वसुंधरां। तावत्सर्वीपरिष्वंगे समर्थो नाभवत्कलिरिति। संसाराग्निदग्धोहं त्वत्पादस्पर्शेन परीक्षिद्व-
यथाहं संजीविष्यामीति च भावः यावन्न चरणौ भ्रातुः पार्थिवस्य जनान्वितौ। शिरसा धारयिष्यामि न मे शांतिर्भविष्यतीति भरतवाक्यं तस्तताम्रकमलो-
लातचरणौ सुप्रतिष्ठितौ सुजातमृदुरक्ताभिरंगुलीभिरलंकृतौ। प्रयातेन मया सत्ताग्रहत्तीतौ ह्यभिवंदिताविति॥ मार्कंडेयवचनं चदर्श-
नीयं। यद्वा मुक्तिदशायां गृहीताप्राकृतशरीरस्य स्वस परमपदपर्यंकनिलयभगवत्पादपद्मलप्रवेशोत्वरातिशय इह प्रकाश्यते॥ ३१॥ २४

पूर्व

तदेवमिह तत्त्वज्ञानादि सर्वकं मोक्षार्थं तया प्रवृत्तस्य प्रवृत्तिशास्त्रस्याधिकारिणां निंदितमित्यादि सप्तभिः सामर्थ्यभागः समर्थितः अथ विज्ञा
सेत्यादिसप्तदशभिरुत्तरखंडार्थप्रदर्शकैः श्लोकैः प्राप्यवैलक्षण्यप्रपञ्चनपूर्वकमर्थित्वभागः स्पष्टीक्रियते। तत्र प्रथमेन स्वविषयभक्तिप्रभावप्रति-
त पादनशीलेन भगवता यथामनोरथं सर्वं करिष्यामीत्युक्ते सति तदुररीभक्तिः स्वस्य तत्पादारविंदसंदर्शनकालक्षेपार्हत्वमनक्ति विज्ञा
सेति। परावरशब्दाभ्यां हिरण्यगर्भादयो मनुष्यादयश्च गृह्यंते। तेषामालयाः पृथिव्यादयः सत्यांता लोकाः ते विन्यासेन विक्रांता येन तद्विन्यास
विक्रांतपरावरालयं यस्योरुषु त्रिषु विक्रमणेष्वधिक्षिपंति भुवनानि विश्वा क्रांत्वा धरित्रीं गगनं तलं द्यां दिवमित्यादिप्रमाणप्रसिद्धमिदं विक्रम
स्यानायासलीलारूपत्वं वा जनाय विन्यासशब्दः अत्र सर्वत्र सुलभत्वं च व्यज्यते। एवंभूतस्य भगवतः स्वत्वमनिष्टनिवर्तकत्वं चाह। नमस्य
दार्तिक्षपणेकृतक्षणमिति नमस्यतां प्रह्वीभूतानां तदेवाशेषार्तिविनाशने कृतक्षणं दत्तावसरं निवृत्तव्यापारांतरं वा क्षणो व्यापारवैकल्ये।

॥ विन्यासविक्रांतपरावरालयं नमस्यदार्तिक्षपणेकृतक्षणं। धनं मदीयं तव पादपंकजं कदा नु साक्षात्करवाणि चक्षुषा ॥२०॥

कालभेदात्प्रकालयोरिति नैघंटुकाः धनं मदीयं अनन्योपायस्य मम अभिमतसाधनं पुरुषार्थं च तव पादपंकजं स्वरूपरूपगुणविभूतिभिर्नि
रतिशयभोग्यस्यापि तव आश्रितवत्सलस्य ते मुमुक्षुध्येयं मुक्तभोग्यं च पादारविंदं कदेत्याशिना न चक्षुषा प्रत्यक्षतिकथ्यनेन स्वाध्यायश्च चक्षुरु
त एकमस्य योगो द्वितीयमभिवीक्षणाय। अभ्युपगमननयनो स्पृष्ट्वानमांसचक्षुरभिवीक्षते तेन मांसचक्षुषा द्रष्टुं ब्रह्मभूतं शक्यते प्र
त्यक्षोऽस्मिन्कस्यचिद्दिस्यादिषु मा दृष्ट्वे दुर्दर्शी तया प्रसिद्धं। त्वामद्यैवानेनैव चक्षुषा साक्षात्कर्तुमिच्छामीत्यभिप्रायः। एतेन नतासामा
विर्भूतोरिरितिन्यायेन धनंजयादि पुद्धिमचक्षुः प्रदानन्यायेन च दिव्यचक्षुर्णा यथामनोरथं सहसैव दर्शनं भवतीति प्रकाश्यते
अत्रमुक्तदशाविवक्षा मा एव द्विरेन चक्षुषा मनसेति वत्तत्वाविकज्ञानरूपेण चक्षुषेति योज्यं ॥२०॥ ॥ ॥

स्तो॰ भा॰ २५ रमेश्वरः। विन्यस्य वामकं बाहुं चासने वामपार्श्वके। दक्षिणं जानुके न्यस्तं जंघयत् उरगान्तं पद्विरिति। एवमेवं ध्यानं भाष्यकारैर्निरूपितं प्रोक्तं।
बलपौष्करे तु। देवो वैकुंठनाथस्तदनु नन्तासनसंस्थितः सेव्यः श्रीभूमिनीलाभिः शार्ङ्गो वेत्रचा खिजैः। शंखचक्रधरो नित्यं जानुन्यस्तैक
हस्तवान्। अभयप्रदहस्तश्च नीलजीमूतसन्निभः। ध्यातव्यो नित्यलोकस्थो भुक्तिमुक्तिफलप्रद इति। अत्राभयप्रदहस्तत्वादिवैषम्य
मवस्थाभेदादुपपद्यते। यत्तु केश्चिदुक्तं। ननु च - किमस्य कौ वा हु का ऊरू वा कुराजन्य इति पुरुषसूक्तवाक्यान्माऽदशस्तां गुणौ जयो
दशपाद्याः द्वारु दौ बाहू आत्मैव पंचविंशक इति नैत्तरीयोक्त्यापाणिमां अग्नेयुः सं वहती त्यादिरहस्याम्नायोक्त्या च परस्य द्विभुजत्वं सिध्य
तीति। तदयुक्तं। एतेषां वाक्यानां प्रकरणादिभिरन्यपरत्वे परस्य चतुर्भुजत्वप्रतिषेधादर्शनात्। यथोक्तं श्रीसात्वते। नारायणाख्यानेगगने दे
वोनन्तः सनातनः। श्रीतेजः शान्तसंवित्स्वरूपस्तु भक्तानुग्रहकाम्यया। अमोपमेनवपुषा ह्यमूर्तो मूर्ततां गतः। विश्वमाप्यायय त्कास्म
35 मूर्तेंदुरश्मिना तु स्वयायवरदाभयदेनैव शंखचक्रांकितेन च। त्रैलोक्यशक्तिदहेन युक्तः पाणिद्वयेन स इति। तदिदं तनुमलचपागविशेषवि

।चक्राङ्कितं ज्याकिणकर्कशैः शुभैश्चतुर्भिराजानुविलंबिभिर्भुजैः। प्रियावतंसोत्पलकर्णभूषणश्लथालकाबंधविमर्दशंसिभिः ३३

धिपरं यच्च श्रीपुष्करे द्विभुजं पुरुषाकारं युक्तमादित्यसन्निभैः भुजैरामरणोपेतैः शंखचक्रासिसंज्ञितैरिति। सौमंतरे च। निरस्तद्वि
भुजा सौम्या शंखचक्रकरांकिता। महापुरुषरूपा च सुप्रसन्ना विलक्षणेति भारद्वाजे च द्विबाहुश्चक्रधृत्पाणिर्दक्षिणः शंखभृत्परः उ
पविष्टस्तु सौम्यार्थे स्थितो विश्वसिद्धय इति। संकर्षणो वपुर्यश्चोत्तमस्य देवस्य विशुद्धस्फटिकत्विषः समशरदस्यत सौवर्णैकचक्रस्य संस्थि
तिः वरदाभयहस्तो वा वपहृत्साध्य कर्मणो इति। श्रुतान्यन्यानि चैवंविधानि वाक्यानि तत्तद्रूपसमात्रपराणि यत्तु नरानंदाख्यसंहितायां
मुक्तं। स्थूलमष्टभुजं प्रोक्तं सूक्ष्मं चैव चतुर्भुजं परं तु द्विभुजं प्रोक्तं तस्मादेतत्त्रयं यजेदिति। एतदपि पररूपमधिकृत्य वचनं श्रीषुसंहितासु चतु
र्भुजत्वप्रतिपादनादिभिरभिराममूर्तीनामभिमतोरुदेहस्य वैकृत्यैकध्यानपरतया सुसंगतताश्रस्रुते च नृसिंहकल्पादेकरूपे सेव द्विभुज चतुर्भु
जत्ववर्णभेदाद्यवतारवैषम्यं परस्मिं श्रुतिनोदितविभागस्त्र प्रतिपन्न इति सर्वं सुस्थं अत्र श्लोके आकिणत्यादिना स्वभक्तरक्षणार्थं महावीरत्व

उक्तप्रकारसंदर्शनसंश्लेषसमनंतरमाविर्भवद्विविधकैंकर्योद्देश्यं भगवंतं समस्तकल्याणगुणदिव्यविग्रहादिविशिष्टतयाप्राप्यं चतुर्दशभिर्विश
दमनुसंधत्ते । तत्र प्रथमश्लोकस्य पूर्वार्द्धेन पीताम्बरपरभागविचित्रितामलसीपुष्पसंकाशः पीतवासा जनार्दनः अभ्राजत सश्याममेघे हेम्नीवोप
चितो मणिरिति । महाभारतोक्तदिव्यरूपस्य समुदायशोभामनुभवति । विराजमानोज्ज्वलपीतवाससमिति पीताम्बरस्य श्यामवर्णविग्रहयोगा
त्विराजमानत्वमुज्ज्वलत्वं भास्वरत्वं स्मितशब्दो व्यक्तिकाशार्थः अतसीसूनं अतसीप्रसूनं श्यामलरमणीयतया विग्रहस्य तत्समत्वं अमलछविं उज्ज्व
लकांतिं ध्यायता दोषप्रतिभटद्युतिमिति च । अथ यस्तेषु प्रथममजनिष्ट चकस्य नाभेरिति प्रागुक्तपारम्यसूचकं पितामहोत्पत्तिस्थानं निर्दिशति ।
निमग्ननाभिरिति । निम्ननाभिमित्यर्थः उदरस्याशेषभुवनगर्भत्वेपि कृशत्वेनानुलग्नमभिप्रेत्याह तनुमध्यमिति तदाह । श्रीवत्सांकमि
श्राः आरूढः श्वेतानालङ्करमामनतिमतस्थानं तदरदकर्णवृत्तकार्पेमस्य माहात्म्यस्वतइत्ययेषु । नूनमेषामृद्धिः स्यान्महिमकरीन हीनरे
षामिति उन्नतं अतिकृशत्वादिदोषरहितं सर्वाधिकत्वादिव्यंजकदिव्यविग्रहमित्यर्थः विशाले त्यादि अतिविशालभुजांतरशोभामानवक्ष

॥ विराजमानोज्ज्वलपीतवाससं स्मितातसीसूनसमामलच्छविं । निमग्ननाभिं तनुमध्यमुन्नतं विशालवक्षःस्थलशोभिलक्षणं ॥ २२ ॥

तितत्त्वनिरूपकलक्ष्मीनिवासश्रीवत्सलक्ष्मलक्षणं । अत्र द्वितीयान्तानां सर्वेषां भगवन्तमिति वक्ष्यमाणेनान्वयः ॥ २२ ॥ भुजमध्यशोभा
नुसंहितायमथवीरसंगारविचित्रितां भुजशोभामनुसंधत्ते च काशनमिति । अवतारदशायां विरोधिनिराकरणार्थमापारभुजके अंकिते
रंकिततत्त्वपरविग्रहभुजे अर्पितदृश्यतानुसंधानेन निर्दिशति । ज्याकिणकर्कशैरिति भूभैरौदार्यसौंदर्यादिशालिभिः पररूपेपि चतुर्भुजत्वप्रमा
णसिद्धमिति प्रकाशयितुमाह । चतुर्भिरिति । यथोक्तं विष्वक्सेनसंहितायां वैकुंठे तु परे लोके श्रीसहायो जनार्दनः । उभाभ्यां भूमिनीलाभ्यां
भिसेवितः परमेश्वरः महायोगी जगद्धाता दिव्यसिंहासनोपरि दिव्यसंस्तरणोपेते शेषाहिफणमंडिते पंचोपनिषदाम्नातदिव्यमंगलविग्र
हः अप्राकृततनुर्देवो नित्याकृतिधरो युवा नित्यानीलो जगद्धाता नित्यैर्मुक्तैश्च सेवितः बद्धांजलिपुटैर्हृष्टैर्नमनैर्निरुपद्रवैः । चतुर्भुजः श्याम
लांगः श्रीभूमिनीलया सह । विमलैर्भूषणैर्नित्यैर्भूषितो नित्यविग्रहः पंचायुधैः सेव्यमानः शंखचक्रधरो हरिः सहस्रस्थूणसंयुक्ते मंडपे पु

तया ऽवलोकिता देवा हरिब्रह्मादयोपि याः

स्तो॰भा॰
२६

ऽसत्त्वतामसाहंकारस्य सम्यक्ज्ञानबुद्धित्वसात्त्विकाहंकाराभिमानत्वेन प्रसिद्धा सत्त्वरूपगंधिविशेषैस्तैस्तैर्नतीतुलसीतयायद्वानसतीतुल
सतीतुलसीयस्यासा तथेति वनमालाविशिष्यते स्फुरदुज्ज्वलमिति पद्माभ्यामाभरणादेर्विग्रहस्य चान्योन्ययोगाद्दीप्यमानत्वं व्याप्यते अत्र
तु गर्वस्याभरणैर्युक्तं स्वानुरूपैरनूपमैश्चिन्मयैः स्वप्रकाशैश्च अन्योन्यरुचिरंजितैरित्यादिकद्वृष्टव्यं चिन्मयैरस्पृष्टसंसारलेशैर्दिव्यनाम
केरित्यर्थः॥२६॥ ईदृशकिरीटादिभिः सर्वेश्वरत्वेन व्यंजितस्य भगवतः साम्राज्यसलक्ष्मीकत्वेतिलक्ष्मिः श्लोकैः सहेतुकमनुसंधत्ते श्रियमु
न्निद्रपद्मा श्रीविष्णुवक्षःस्थले स्थितां का चाभा त्वामृते देवि सर्वयज्ञमयं वपुः अध्यास्ते देवदेवस्य योगिचिंत्यं गदाभृत इत्यादि सत्क्रमाह चक्र
थीयस्या भवनं भुजांतरमिति। एवं नारायणः श्रीमान् क्षीरार्णवनिकेतन इत्यादिप्रसिद्धमाह तव प्रियं धामयज्जन्मभूरिति ब्रह्मादीनां सर्वेषां त
त्करत्वाधीनवैभवत्वमाह। जगत्समस्तं यदपांगसंश्रयं यथाभिनियथोच्यते त्वया देवि परित्यक्तं सकलं भुवनत्रयं विनष्टप्रायमभवत्त्वयेदानीं
समेधितं त्वया वलोकिता सद्यः शीलाद्यैरखिलैर्गुणैः धनेश्वर्यैश्च युज्यन्ते पुरुषा निर्गुणा अपि। सश्लाघ्यः सगुणी धन्यः स कुलीनः स बुद्धि

।।चक्रथी यस्या भवनं भुजांतरं तव प्रियं धाम यदीयजन्मभूः। जगत्समस्तं यदपांगसंश्रयं यदर्थमंभोधिरमंथ्यबंधि च॥२७॥

मान् स शूरः स च विक्रान्तो यं त्वं देवि निरीक्षसे इत्यादि॥ महाभारते श्रीवासवसंवादे। स्वयमेव देव्या स्ववैभवं प्रदर्शितं। पुण्येषु त्रिषु लोकेषु
सर्वे स्थावरजंगमाः समात्मभावमिच्छंतो यतंते परमात्मना सा हं वै पंकजे जाता सूर्यरश्मिप्रबोधिते। भूत्यर्थं सर्वभूतानां पद्माश्रीः पद्ममा
लिनी अहं लक्ष्मीरहं भूमिः श्रीश्चाहं बलसूदन अहं श्रद्धा च मेधा च संपाभिः विजितिः स्मृतिः अहं धृतिरहं सिद्धिरहं त्वद्भूतिरेव च। अहं स्वा
हा स्वधा चैव संनतिर्नियतिः कृतिः राज्ञां विजयमानानां सेनाग्रेषु ध्वजेषु च निवासे धर्मशीलानां विषयेषु पुरेषु च जितकाशिनि शूरे च सं
ग्रामेष्वनिवर्तिनी निवसामि मनुष्येषु सदैव बलिसूदन। धर्मनित्ये महाबुद्धौ ब्रह्मण्ये सत्यवादिनि। प्रश्रिते दानशीले च सदैव निवसाम्य
हं। यत्राहं तत्र मत्कांतो मद्विशिष्टो मदर्पणः सततं देवो यदेष्टव्याः वासं चेच्छंति चाष्टधा। आशा श्रद्धा धृतिः शांतिर्विभूतिः सन्नतिः क्षमा। अष्ट
मां विद्धि मां तासां पुरोगां पाकशासनेति। श्रीविष्णुस्मृतेरंते ब्रह्मपुराणे च सहस्रनामस्तोत्रे भगवच्छास्त्रे च हिरण्यगर्भकाश्यपप्रश्यामकर्णधनदा २६

36

एवं पीताम्बरप्रभृतारोहनक्रमेण भुजशोभानुभवानंतरं दिव्यकंठशोभां मुखशोभां चानुसंधत्ते । उदयेति । उदयदुन्नतः अंसद्वयं पीनांसौ विलंबितांसं कंठनालं कावलिमांसं बंधुरा सुंदरा कंबुवद्भिभिरामा त्रिरेखा तत्कृता कंधरा यस्य स तथोक्तः रेखात्रयांकिता ग्रीवा कंबुग्रीवेति कथ्यते । कंठनालकसमभिव्याहारः परभागकांतिव्यंजनार्थः पापहरतिविलसत्संस्मृतं साक्षात्मनामयतत्पुंडरीकनयनं विष्णोर्वदामहे सुखमित्यादिप्रसिद्धं पावनमनोहरं मुखशोभामनुभवति मुखश्रियेति मुखकांत्येत्यर्थः अनुकृतेत्यादिना यस्य मुखश्रिया अनुकृतं पूर्णनिर्मलामृतांशुबिंबाम्बुरुहोज्वलश्रीश्चयेन स एवमुदीरितिः । अंबुरुहश्रिया उज्वलत्वं नूतनविकासशोभाकांतिसौकुमार्यादिभिः अमृतांशुबिम्बाम्बुरुहयोर्द्वंद्वस्तयोरुज्वलश्रीरिति तत्पुरुषः ।२४। उक्तप्रकारां मुखशोभां प्रत्येकावयवभावनया पुनरपि निर्दिशते प्रबुद्धेति । प्रबुद्धविकाशितं मुग्धं नूतनं शोभं प्रवातथा च नेर्धंद्धुक्ताः मुग्धं सौम्येन नवे मूढ इति । अंबुजवल्लोचनयोश्चारुत्वमाश्रित्य दर्शनप्रीतिविकसितत्वेन तदनुग्रहयोमानसौम्यतया कांत्यतिशयात्सविभ्रमभ्रूजतेन नापि स्वभक्तसंप्राप्तिजनितोद्भासातिशयं सूच्यते । उज्वलाधरं प्रवालादिभ्योऽधिकं प्रका

उदयपीनांसविलंबिकंठनालकावलीवंधुरकंबुकंधरं । मुखश्रिया न्यकृतपूर्णनिर्मलामृतांशुबिम्बाम्बुरुहोज्वलश्रियं । प्रबुद्धमुग्धांबुजचारुलोचनं सविभ्रमभ्रूलतमुज्वलाधरं । शुचिस्मितं कोमलगंडमुन्नसं ललाटपर्यंतविलंबितालकं । स्फुरत्किरीटांगदहारकंठिकामणीन्द्रकांचीगुणनूपुरादिभिः । रथांगशंखासिगदाधनुर्धरैर्लसत्तुलस्यावनमालयोज्वलं ॥२६॥

शमानाधरं विद्रुमवौक्तिकनायेन अधरशोभया विशेषितस्मि
तशोभामाह । शुचिस्मितमिति । अवदातस्मितमित्यर्थः अथवा स्वयं निवृत्यो न हंतीति वह्निरुद्वामि संधिं परिहर्तुमिह शुचित्वोक्तिः एवं चोक्तपोक्ष्करे च । सर्वकर्मनलात्तीनां धापयिनां क्लेशशांतये स्वतंत्रेः द्वयोर्योगेन कादंबरयोगगणेन विविक्तकोमलगंडं सुकुमारकपोलं उन्नसं उन्नतनासं अलकानां पश्चाद्भूमसंलंबित्वं प्राहृत्क्यं अलतु पुरस्ताल्ललाटैकभागलंबित्वमाह ललाटपर्यंतविलंबितालकमिति २५ ईश्वरत्वेन शंकनीययोर्ब्रह्मरुद्रयोरादिमं रूपं तापसवेषलक्षणमेव स्यात्त्वं भगवतस्तु किरीटादियोगात्सर्वेश्वरत्वव्यापकमित्यभिप्रायेणाह स्फुरत्किरीटेति कंठिकाकंठभूषणं मणीन्द्रः कौस्तुभः सच जीवतत्त्वाभिमानी आदिशब्देन अपरिमितानि दिव्याभरणांतराणि संगृह्यंते । रथांगादयः पंचम

स्तो॰भा॰
२७

स्त्रं फणादिनाम्नातमवगन्तव्यानीति ॥ अनंतशेषेति निगंधर्वाप्सरः सिद्धाः सकिंनरमहोरगाः नांतं गुणानां गच्छंति तेनानंतोयमुच्यते इति सुप्रसि
द्धानंतनाम्नि विश्वंभरधारणनिपुणे महायोगिनि प्रकृष्टविज्ञानबलैकधामनि प्रकृष्टयोर्विज्ञानबलयोरेकाश्रये अस्य संकर्षणात्व
मूर्त्त्याभिमानविशेषयोगात्तदनुगुणज्ञानबलविशिष्टे शेषे ते ॥ पंचविधः ज्योतिःसिद्धांतपञ्चरात्रेकत्वेन ज्ञानबलप्रकर्षोस्य प्रसिद्धः सर्वाधारभू
तस्य वपुर्धारणेन बलप्रकर्षश्चाप्युक्तः तेनैव यं नागवर्येण विधृता शिरसा मही बिभर्ति मालां लोकानां सदेवासुरमानुषीमित्यादिभि
श्च यस्य फणामणिव्रातमयूखमंडलैः प्रकाशमानोदरदिव्यधामयस्य स एवमाश्चर्याकारतया अद्भुतराजेनोक्तः दिव्यधामशब्दोत्र वैकुंठमाख्य
मप्राकृतं नित्यं भगवद्धिमानं वदंति ॥ ४० ॥ उक्तप्रकारावपर्यंकभोगिन इति विशेषानुगुणसमाख्यांतरेणापि विशिनष्टि ॥ निवासेति ॥ निवासो
दिव्यायतनं शय्या तं योगनिद्रावस्थायां आसनं पर्यंकवीच्यादिधाम्नातं दिव्यसिंहासनं पादुका अधिरोहार्थपादस्थापादुके हेमभूषिते एते
हि सर्वलोकस्य योगक्षेमं विधास्यतः इत्यवतारदशायां प्रसिद्धे वने अंशुकं पीताम्बरादि उपधानमुत्तमांगधारकं पादधारकं च वारणशब्द

निवासशय्यासनपादुकांशुकोपधानवर्षातपवारणादिभिः शरीरभेदैस्तव शेषतां गतैर्यथोचितं शेष इतीरितो जनैः ॥ ४० ॥ दासः सखा वाहनमा
सनं ध्वजो यस्ते वितानं व्यजनं त्रयीमयः ॥ उपस्थितं तेन पुरो गरुत्मता त्वदंघ्रिसंमर्दकिणांकशोभिना ॥ ४१ ॥ स्पष्टार्थत्वात् ॥ वर्षे च वारणमातप

वारणं चेति योज्यं ॥ आदिशब्देन पात्रपीठादिसंग्रहः शरीरभेदैरित्यनेनापरिमितधामवत्तीतिन्यायोभिप्रेतः तत्तत्कैंकर्योचितरूपदिव्यमंगलविग्रह
विशिष्टस्य शेषतां स्वोपकारप्राधान्याभावादरेण परोपकाराहतां शेषः परार्थत्वादिनिति शास्त्रप्रसिद्धं तं वेदार्थसंग्रहे विहृतं परतातिशयाधानेच्छयोपादे
यत्वमेव यस्य स्वरूपं स शेष इति यथोचितं ॥ उक्तप्रकारविनियोगानुगुणमित्यर्थः जनैरित्येतत्सामरपरीक्षकसर्वलोकप्रसिद्धत्वप्रापनार्थं ॥ ४० ॥ एवम
नंतवन्नन्दवत्सरोचितसेवार्थनानास्वरूपभेदैः कैंकर्यकर्त्त्वाणेन गरुत्मता सेवितत्वमाह ॥ दास इति ॥ पूर्वश्लोके शेषत्वमुक्तं ॥ अत्र तु दासशब्देन तदे
व विशिष्यते ॥ शेषत्वे इष्टचेतनं प्रत्यचेतनस्यापि भवति दासत्वं तु चेतनं प्रत्येव चेतनस्यैव स्यात् ॥ तथैव लोकव्यवहारात् ॥ अत्र प्रथमदास इत्युक्तिः
सखित्वप्रवस्थायामपि स्वाभाविकस्य दासत्वस्यानपगमद्योतनार्थं उच्यते हि लोकनाथस्य रामस्य सखा दासोस्मि वैनतेय गरुत्मतस्तस्य सखि २७

36

द्विसंहितासु ब्रह्मरुद्रेन्द्रादीनां तदधीनवैचक्षणत्वं विस्तरेण द्रष्टव्यं। यदर्थं यस्याः सर्थमिति यावत् परस्परविश्लेषप्रसंगरहितयोरेव तत्स्मीत
द्वन्द्वयोर्विश्लेषणाभिनयेन पुनः प्राप्तिरुच्यते स्वसंकल्पनियतावस्तन्तत्र लीलापर्यनुयोगमर्हतीति अमथि विस्वावतारे मंथनं तत्रं श्रीशमावतारेवंध
नं। यथोक्तं। स्फुरत्कांतिमति विकासिकमले स्थितामीर्दर्शी पयसः तस्मादुत्थिता धूतपंकजेत्यारम्भमात्साम्बरधरा स्नाता भूषणा भूषिता तस्या
तां सर्वदेवानां पश्यतां वक्षःस्थलं हरेरिति। एष सेतुर्मया बद्धः सागरे मकरालये तव हेतोर्विशालाक्षि नलसेतुः सुदुष्करः इति च अत्र जगत्स
मस्तमिति पदेनानुरूपत्वं पदांतरैरभिमतत्वं च ख्यापितं ॥२७॥ उक्तमेवाभिहितानुरूपत्वमनंतरश्लोकेः प्रपंचयति। स्वैः स्वैः स्वरूपैरिति। स्वस्वावि
र्भूतशरीरकत्वेनेत्यर्थः सदानुभूततयायोचितयुगपत्सर्वपत्न्यं देहेन सदा स्वतईहरोन सहजप्रत्यहेण सदा साक्षात्कृतयेत्यर्थः एतदभिप्राये
ण तदविताभूतवैभवरूपसहेतुत्वोक्तिः यद्वा स्वरूपादिसर्वाकारेणज्ञाता ननेत्यादिप्रक्रियया सर्वदा दोषगूढत्वे नानुभवोपि विवक्षितः अ
पूर्ववद् दृष्टपूर्वावत्र यद्वा इतः पूर्वमनालोचितवतइवेत्यर्थः। विस्मयमद्भुतरसहेतुभूत भावमनवधिकं प्रीतिविशेषमित्यर्थः। प्रदधानये

॥स्वैः स्वैः स्वरूपैः सहानुभूततयाप्यपूर्ववद्विस्मयमादधानया। गुणेन रूपेण विलासचेष्टितैः सदा तवैवोचितया तव श्रिया ॥२८॥
॥तया सहासीनमनन्तभोगिनि प्रकृष्टविज्ञानबलैकधामनि। फणामणिव्रातमयूखमण्डलप्रकाशमानोदरदिव्यधामनि ॥२९॥

स्वत्रासस्यभिप्रेतं। एतेन स्वभावसिद्धमतत्वं प्रपंचितं। गुणेनेत्यादिना सर्वप्रकारेण अनुरूपत्वमुच्यते। गुणशब्द इह ज्ञानकारुण्यादिविषयः रूपे
णाकृतत्वेन अखिलजगन्मातृत्वाभिव्यंजकेन दिव्यविग्रहेण विलासैर्भगवदभिमतैर्लीलाविशेषैः चेष्टितैराश्रितरक्षणावतारादिः त
वैवोचितयेत्यनेन विशेषः श्रीः रणपायिनीत्यादिप्रसिद्धं निर्दत्यत्य व्यवस्थितपतिपरार्थं प्रतिष्ठापितं तृतीयान्तानां तयेत्युत्तरश्लोकस्थपदेना
न्वयः ॥२८॥ वैकुंठे तु परे लोके श्रिया सार्द्धं जगत्पतिः आस्ते विष्णुरचिंत्यात्मेति पुराणप्रसिद्धमाह तयासहेति भूम्यादिपत्न्यंतरलोपि श्रियः प्र
धान्यादिहनरुक्तिस्तदपेक्षयापि भगवतः प्राधान्यमुक्तं नायसहशब्दः। आसीनमित्यनेन सहस्रस्थूणे विमले हृदयशेयत्र देवानामधिदेव आ
भि स्ते इति श्रुत उपवेशनरकारश्रुतिः स्मर्यते। उक्तं चैव मैत्रेके: सर्वात्मसाधारणनाथगोष्ठीकरे पिंडत्र्यक्रमहावकार्य। आस्थानमानंदमयं सहस्र।

स्तो॰भा॰ तेपि ते नित्यसूरिषु प्रधानतमास्त्वयुक्ताः। अथ तद्वदसंख्यातनित्यसूरिसेवाप्रकारमात्मनः प्राप्यत्वेनाभिसंधायाह हताखिलेति अविद्या
२८ स्मितरागद्वेषाभिनिवेशाः क्लेशाः तएवमलत्वेनोच्यंते तदविनाभूतगुणात्मकप्रकृतिसंबंधो वा सप्रतिबुद्धाः सर्वे क्लेशाक्रांताः प्रतिबुद्धा
स्तु कतिपयक्लेशरहिताः उपायतो निवर्तितनिखिलक्लेशाः मुक्ताः नित्यास्त्वनादिनिर्धूतनिखिलक्लेशा इत्यभिप्रायेण स्वभावत इत्युक्तं श्रू
यते हि तद्विष्णोः परमं पदं सदा पश्यंति सूरय इति। नह्येतन्मुक्तपरं वा हविषयं सदादर्शनं कर्तॄणां बहूनामभिधानात् नित्यसर्वज्ञत्वादेव क्लेश
देशनावकाशः एतेषां तद्विप्रासो विपन्यवो जागृवांसः समिंधत इत्युक्तमनुभवप्रकारमभिप्रेत्याह। त्वदानुकूल्यैकरसैरिति। तच्छेषत्वानुरूपपार
तंत्र्यानुगुणकैंकर्यैकरुचिभिरित्यर्थः सदानुकूल्ये निपातेष्वप्ययमेवार्थः तवोचितैरनादिसर्वज्ञत्वाप्राकृतविग्रहत्वादिभिस्त्वदनुरूपैरित्यर्थः
38 एतद्विशेषणत्रयमेतेषां भगवद्दायत्वं इदं चानंतगरुडादीनामपि समानं परिचारसाधनानि छत्रचामरादिसेवोपकरणानि सचिवैरासन्न
सेवायां तत्तद्विमतिविशेषनिर्वहणे च नियुक्तैः सूरिभिः यथोचितं तत्तदधिकारनियोगसमये व्याप्तिआय स्वस्वाभाविकदासत्वसचावगुणमि

हताखिलक्लेशमलैः स्वभावतः त्वदानुकूल्यैकरसैस्तवोचितैः गृहीततत्तत्परिचारसाधनैर्निषेव्यमाणं सचिवैर्यथोचितं ॥४३॥ अपूर्वनानारस
भावनिर्भरप्रबुद्धया मुग्धविदग्धलीलया। क्षणाणुवत्क्षिप्तपरादिकालया प्रहर्षयंतं महिषीं महाभुजं ॥४४॥ अर्थः ॥४३॥ ईदृशस्य भगवतः सर्वेषु
व्यापारेषु लक्ष्मीसाहचर्यमभिप्रेत्याह। अपूर्वेति। उक्तं च श्रीवत्सांकमिश्रैः क्रीडेयं खलु नान्यथास्य रसदा स्यादेकरस्यात्तयेति। अपूर्वशब्देन
रसभावपरंपराया उत्तरोत्तरस्याखिलक्षणत्वमननुभूतजातीयत्वं वाश्चर्यत्वं वा विवक्षितं रसभावा गांधर्ववेदप्रदर्शिता वीरशृंगारादयस्त
त्साहाद्यश्च तैर्निर्भरप्रबुद्धया प्रभूतसत्तया मौग्ध्यस्तम्भवैवाप्रदत्व वैदग्ध्यत्वमभिप्रेत्याह मुग्धविदग्धलीलयेति। लीलाया नित्यनिरतिशा
यत्वमनक्ति क्षणाणुवत्क्षिप्तपरादिकालयेति क्षणं पर्वतस्थानीयं कृत्वा तस्याणुः लवस्तमेकदेश इति कल्पितोयं दृष्टांतः तद्वत्परादिकालः
क्षिप्त इत्यतिशयोक्तिः। चतुर्मुखस्यायुः परो नाम कालः आदिशब्देनासंख्यातचतुर्मुखातिक्रांतिकालग्रंजनस्मर्यते हि गंगायाः सिकताधाराय
था वर्षति वासवे शक्या गणयितुं लोके नव्यतीताः पितामहा इति। महिषीं प्रधानपत्नीं प्रियमित्यर्थः उक्तं च प्रधानमत्वं श्रीवैकुंठगद्ये शेषशेषा २७

त्वं कदाचिद् भिन्नयप्रयुक्तं यदा समानचित्तवृत्तित्वं सखित्वमिति दर्शितं भिन्नाद्युक्तं चित्तवृत्तिसाम्यमिह विवक्षितं वाहनत्वादिकं तु गमना
वस्थासु यथार्हं भाव्यं । त्रयीमयः सर्ववेदमयविग्रहो वेदैः स्तुत्य इत्यर्थः । स्तूयते हि । सुपर्णोसि गरुत्मान्त्रिवृत्ते शिरो गायत्रं चक्षुः स्तोम आत्मा इत्यादि
धातस्य गायत्री च जगती चत्रैष्टुभं तनुवत्तां उष्णिक् ककुप् अनुष्टुप् पंक्तिश्च धुर्यौ स्वृतिर्वोधिरभवत् स एतद्वह्रो रथमास्थाय एतन्म
ध्यानमनुसंचरन्तीति । पुरस्स्थितं पुरस्तात् प्रभुखेन सेवितमित्यर्थः । त्वदंघ्रिसंमर्दकिणांकशोभिनेति तेन त्वं सर्वो रूढ्या किणन्यायेन कर्मवश्य
त्वाभिनयदशायां भाव्यं ॥ ४१ ॥ अथ भगवतः स्वस्वैभवानुरूपं स्वसंकल्पकल्पितनित्याधिकारसेनापतिसेनाप्रकारभक्तिदर्शनः श्रीशभुक्तो
ज्झितशेषभोजिना इति तन्मे श्रीकृष्णमाह । त्वदीयभुक्तोज्झितशेषभोजिनेति त्वदीयभुक्तं त्वद्भुक्तमित्यर्थः । यद्भोक्तव्यतया भोजनपात्रे निहि
तं किंचिद्भुक्तं स्यात् । तद्भुक्तोज्झितमित्युच्यते । तदेवात्र भुक्तशिष्टतया शेषशब्दार्थः यद्वा भुक्तोज्झितैकदेशविषयोयं शेषशब्दः अशेषांतरस्या
न्यार्थतया विभजनीयत्वोक्तेः त्वया निसृष्टात्मभरेण स्वच्छंदवृत्तिमाल्यया समर्पिता ऽत्मभरेणेत्यर्थः असुरनिराकरणादिषु सेनानिर्वहणादि
भावः । सेनापतित्वेन कल्पिते त्वस्मिन्विसृष्टे तेन तत्तन्नियोगपूर्वकमन्वेप्रवर्तते जगद्रक्षणादिभारोस्मिन् समर्पित इति केषांचिद्याख्यानं तु भ

॥ त्वदीयभुक्तोज्झितशेषभोजिना त्वया निसृष्टात्मभरेण यद्यथा । प्रियेण सेनापतिना निवेदितं तथानुजानन्तमुदारवीक्षणैः ॥ ४२ ॥

गवद्धीनेन स्वभावातिशयप्रशंसनार्थं एकस्मिन्नेव हि सर्वशरीरी लोकरक्षा स्वामिनि संकल्परूपमस्त्यमिति प्रागेव स्थापितं । अत एव श्रीमति विष्व
क्सेनेन सत्त्वसमस्तात्मस्वयमिति श्रीवैकुंठगद्योक्तिरपि भक्तानां स्वामिसेवापि प्रशमने परिजननियोगादौ चयोजनीया विष्वक्सेनमंत्रे तु
विष्वक् इति पदं मुक्तवत्त्वान्तं सृष्टिमात्रपरं विशेष्यमलपरमात्मपर्यंतवानेतदेवेनित्यानां सानभोगयोरीश्वरे लयमिथ्याऽनंतसाम्येवियहाधि
कारयोर्वैषम्यं भगवद्रूसिद्धप्रियेनेत्येतदनंतगरुडादिष्वपि समानं अत्र तु विष्णुपत्न्याधिकारिणि वाक्यानंतिलंघनार्थं विशेषतस्तद्रूढः निवेदितमि
तिपावेयहित्स्य इति प्रतिनिर्देशो आहर्तव्यः न्यवेदिनमिति वा पाठः समीचीनः यद्वत्तं सर्वं प्रत्युक्तं हि तद्वत्तमनन्तरं प्रयोक्तव्यमेवेत्याङ्गः से
नापतिनिवेदितस्य भगवदभिमतत्वमाह । तथानुजानन्तमुदारवीक्षणैरिति । भगवति तत्परिजनेषु च सर्वेष्वेवंनिवेदनप्रेरणादिव्यापाराः स्व
छंदलीलाप्रवृत्ताः तद्यथा तत्प्रेतिस्वरूपप्रकारयोरविसंवादार्थं वीक्षणानामुदारत्वमैश्वर्यव्यंजकतया सौंदर्यादिगुणातिशयात्तत्तद्दाता भि

[illegible]

एवंप्राप्यं भगवंतं यथावस्थितमनुसंधाय तज्जनितहर्षप्रकर्षेण परमपुरुषार्थकाष्ठाभूतं निरुपाधिकैंकर्यं प्रार्थयति । भवंतमिति प्राप्यप्रा
पकत्वानुगुणप्राप्तसर्वाकारपरिपूर्णमित्यर्थः कर्माधीनसेव्यांतरव्यावृत्तिसूचनार्थ एवकारः एतेन गीतितोयुह्रियोगेन प्राप्नोति परमं पदं
रुद्रस्यानुचरो भूत्वा तेनैव सह मोदत इत्यादिषूक्तं रुद्रानुचराणां च व्यावृत्तिर्भवति । यद्वा मुक्तस्य सेव्यभगवत्परिजनसेवापि तच्छेषिपर्य
तत्वबुद्धिपूर्विकेत्यपि प्रायः । अनुचरन् तत्तदवस्थोचितवृत्त्या सेवमान इत्यर्थः । अत्र । अस्मांतरकेवाव्यारतर्थं निरंतरमित्युक्तं । अत्राव्यवधिरा
हित्यमपि नित्यवर्तमानव्यपदेशः । एतमानंदमयमात्मानमुपसंक्रम्य इमान् लोकान् कामान्नी कामरूप्यनुसंचरन्निति श्रुतिस्थानेन सूच्यते
अत्र कुरुष्व मामनुचरं भवांस्तु सह वैदेह्या गिरिसानुषु रंस्यते । अहं सर्वं करिष्यामि जाग्रतः स्वपतश्च ते इत्यनुभूतिसंभूतप्रीतिकारितदास
तं देहि मे कृपया देव न जाने गतिमन्यथा । सर्वावस्थोचिताशेषशेषतैकरतिस्तव । भवेयं पुंडरीकाक्ष त्वमेवैवं कुरुष्व मामित्यादिकमनुसंधेयं

भवंतमेवानुचरंनिरंतरंप्रशांतनिःशेषमनोरथांतरः ॥ कदाहमैकांतिकनित्यकिंकरः प्रहर्षयिष्यामि सनाथजीवितं ॥ ४६ ॥

एवंविधकैंकर्यसिध्यर्थं प्रयोजनांतरेच्छा त्वयैव प्रशमनीयेत्यभिप्रायेणाह । प्रशांतनिःशेषमनोरथांतर इति । ऐकांतिक एकस्मिन्नेव निय
तः यद्यपि ब्रह्मरुद्राद्यो लोके कश्चिदपुनरावर्तिरुच्यते । ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसंचरे परस्यांते कृतात्मानः प्रविशंति परं पदमित्युक्त
न्यायात् क्रमेण मुक्तिपर्यंतत्वं तत्राभिप्रेतं ॥ अतो नित्यशब्देन देवतांतरकिंकरत्वव्यवच्छेदः । तदेनत्कालमनंतं दुर्जेहिरित्यादिवादि
नं पुंडरीकं प्रति भगवतोक्तं ॥ आगच्छ वत्स भद्रं ते पुंडरीक महामते । मद्रूपधारी नित्यात्मा मम पार्षद इति । प्रहर्षयिष्यामीत्यह
सकृतस्य मे त्वत्प्रहर्ष एव प्रधानं प्रयोजनमिति भावः ॥ एवं स्वाधीनस्वार्थकर्तृत्वादिभोक्तृत्वभ्रमरहितकैंकर्यप्रार्थना कृता भव
ति । इतः पूर्वं त्वदुपेक्षया त्वत्सनाथोपि नाथहीन इवाहमासं ईहशब्देनं त्वत्संकल्पादेव हि मे निवर्तिष्यतीत्यभिप्रायेणाह । सनाथजी
वित इति ॥ ४६ ॥ ननु मुमुक्षुत्वं मयात्यंतप्रापितोसि इदं च मद्गुणास्वादगर्भस्य मुक्तावस्थासमानावस्थायामनकादिभिरविकं चित्कालम २९

समाश्रितसर्वपरिजनं भगवन्तं तत्तदवस्थोचितपरिचर्यामाज्ञापयन्तीति। प्रहर्षयन्तमिति वर्त्तमाननिर्देशः सदातनत्वाभिप्रायः। एवं प्रकृष्टायाः
प्रियायाः वक्षस्थलस्थायै देही भर्त्तारं परिषस्वजे इत्युक्तप्रकारेण सर्वस्वभूतपरिष्वंगप्रदानानुगुणं प्रियस्य भुजवैभवमाह। महाभुजमिति। उ
क्तंच वत्तारे तद्भुजमहत्त्वे बाहुच्छायामवष्टब्धो यस्य लोको महात्मन इति॥४४॥ अथ प्रथमप्रस्तुतं यौवनविशेषितं सर्वचित्तापकर्षकसमुदा
यशोभामाश्रयणीयत्वभोग्यत्वोपेक्षत्वगुणविशेषाणां च संकलय्यानुभवति अचिंत्येति। अचिंत्यं परमयोगिभिरप्यपरिच्छेद्यं कुतर्कैरसंभावि
तमिति प्रतिक्षेप्तुमशक्यं च दिव्यमप्राकृतम् अद्भुतं नित्यानुभूतत्वेप्यदृष्टपूर्ववदाश्चर्यं यौवनं नित्यं कौमारवार्द्धकावस्थापरिच्छेदरहितं यौवनं लो
केवाल्यानंतरयौवनोपलक्षणीयः कश्चिद्रमणीयसंस्थानविशेषः स एव स्वभावः स्वासाधारणधर्मो यस्य स इत्यमृतोदधिर्विशेष्यते सच लावण्यमयः
लावण्यप्रचुरः लावण्यं समुदायशोभा तदेतत्प्रकृष्यति। अपि चैते जएवाज्ञिर्वक्तुमभिमुहूर्तं। चक्षुरानंदजननं लावण्यमिति कथ्यत इति।
निरतिशयभोग्यमहत्त्वराकारमभिप्रेत्यामृतोदधित्वोपचारः। अप्राकृतामृतद्रव्यात्मकत्वं वा विवक्षितं पूर्वकर्मोः श्रियः श्रिय इति परत्वस्थापना

॥अचिंत्यदिव्याद्भुतनित्ययौवनस्वभावलावण्यमयामृतोदधिं। श्रियः श्रियं भक्तजनैकजीवितं समर्थमापत्सखमर्थिकल्पकं॥४५॥

योक्ता। अत्र कैंकर्यादेरपि निरतिशयभोग्यरूपं सपत्नीकमिति ज्ञापयितुमाह। श्रियःश्रियमिति भक्तजनैकजीवितं भक्तजनानां प्रधानजीवि
तं मच्चित्ताः मद्गतप्राणा इत्यादिकमिह भाव्यं। यद्वा भक्तजना एव जीवितं यस्य स तथोक्तः। तथाविधप्रीत्यतिशयादेव हि स्वयमेवा
ह। ज्ञानी त्वात्मैव मे मतमिति। मम प्राणा हि पाण्डवा इति च समर्थं जगत्स्रष्ट्रादिवाश्रितानां साम्यभोगप्रदाने न च हि रोधिनिरसने च
प्रतिबंधकैः प्रतिहंतुमशक्यं इति भावः। तथा च गीयते। परित्राणाय साधूनामित्या। दि आपत्सखमाश्रितानामापदि स्वीयसखवन्नापाये
न समानार्थतया व्यवस्थितमित्यर्थः। अर्थिकल्पकमित्यत्र स्वार्थे कः। अर्थिनां कल्पद्रुमवत्सर्वापेक्षितप्रदमिति यावत्। तथा चस्तू
त्रितं फलमत उपपत्तेरिति यद्वा अर्थिनः कल्पद्रुमा जाता यस्मात्सोर्थिकल्पः। तदाह उदाराः सर्व एवैते इति अथवा स्वयमर्थिनः क
ल्पयतीत्यर्थः। क्षेत्रज्ञानां तत्तत्पुरुषार्थाधिकारदशापि परमपुरुषकल्पिता॥४५॥ ॥ ॥

स्तो.भा.
४७

यद्येवं स्वेनापि इमिं हनीयस्त्वमिदानीमप्यपराधास्मि तर्हि कथं नेशीघ्रमत्रामिं दासामीत्यत्र अनर्हस्यापि ममात्मीयं तदयनीयतया त्वयास्मद्धेतः
पादनमात्मसात्करणं च कृपया स्वयमेव कुर्वित्याह। अपराधेति। नमिंदितमिति। पूर्वोक्तमत्रापराधसहस्रभाजनमित्यनूदितं तत्र स्वरूप्मा
हिगुणैकभाजनेन त्वयाकृतं तत्पमिति सूचनार्थं निमज्जत इति प्रागुक्तं पतितमित्यादिना पुनरीहीलं ज्ञानिनां पुण्यफलांशोपि रागानुवृत्तिर्हि तु
तयात्मपतनयावहद्भ्स्याभिप्रायेण भीमशब्दः एवं संसारस्यातिघोरत्वो तथापि स्वशास्त्रपरत्रासोऽखिलेवाहमत्वं प्रतिक्षण्यते। अगतिमित्यने
नप्रागुक्ताननुगतित्वं स्मूलारूंधतीतिन्यायेन स्थिरी क्रियते शरणागतिमितिवक्ष्वे प्रयुक्त शरणागतेष्वानुवादस्तेन च शरणं च प्रपन्ना
नातवास्मीतियाचनाप्रसादं पितृहंतृणामपि कुर्वेतिसाधवइतिसामान्यप्राप्तत्वयि केमुत्यसिद्धमिति व्यज्यते। शरणेतु क्तं हरिशब्दे

४०

॥ अपराधसहस्रभाजनं पतितं भीमभवार्णवोदरे। अगतिं शरणागतं हरे कृपया केवलमात्मसात्कुरु॥४८॥

नस्यापितं समर्थः कारुणिको हि शरण्यः तत्रानिरंतरसाधारणं भगवत्सामर्थ्यं ब्रह्माणमिंद्रं रुद्रं च यमं वरुणमेव च। प्रसह्य हरते यस्मात्तस्मा
द्धरिरितीर्यत इति पुराणोक्तं। तथा कारुणिकत्वं चाश्रितानामनिष्टानि हरतीति विवरुयाव्यंजितं। स्मर्यते हि हरिर्हरति पापानि देवश्च पतितह
रेति॥ उक्तं च परमसंहितायां। यस्माद्व्याप्तं जगत्तेन तस्माद्विष्णुरिति स्मृतः। हरे देवदुःखानां हरिरित्यभिधीयत इति ज्ञातं मया विशिष्टेन पुराणी ए॥
तं महात्मनां महतामापदि संज्ञातोऽसर्वव्यो भगवान्हरिरिः परमापदमापन्नो मनसाचिंतयेद्धरिमित्यादिकमप्येतदपिशापं कृपया लब्धा
वसरेत्यभिप्रेतं केवलमितः परं मद्व्यापार निरपेक्षमितिभावः एतेन साधनांतरनिष्पादकं स्वरक्षणव्यवस्थिद्यते। आत्मसात्कुरु दासभूतं मा
उपायोपेयांतरवैमुख्यकरणेन स्वैकैकपरं संकुरुष्वेत्याशयः धिमद्विमितिपूर्वोक्तस्वात्मतिरस्कारानुवृत्त्यासमप्रवादस्वयोदनेनायात्रमामिसत्तु ४७
दि:॥४८॥

नुभूयतामिति भगवदभिप्रायमाशंक्य स्वकार्पण्यमसौ स्वेष्टिलं वा स्मृतयात्वरातिशयश्रं जनाम वद्दुर्लभप्रार्थिनं स्वात्मानं निंदति धिगशुचिमि
ति। धिग्दृशं प्रयोगाद्वितीयानन्वात्मनिंदात्मद्रजा चेति स्वनिंदापि निषिद्धा सतां। ननु सर्वत्र यथाऽऽस्वत्वाजनेयादेः स्वप्रशंसा कचिद्गुणः तथात्मनिं
दायेतस्य स्वदैन्यख्यापनस्य नदइति। अशुचिं त्वत्कैंकर्यविरुद्धप्रकृतिसंसृष्टं तदनुबंधिक्लेशकर्मादिदूषितं भावशुद्धिरहितत्वेपि तद्भावायं
तेनित्यशुद्धाः सूरयः शांतदोषा मुक्ताश्च तत्कैंकर्ययोग्याः नत्वकोहमिति भावः नन्वाचार्यवंतमात्मानं किमर्थं निंदसीत्यत्राह। अविनीतमिति।
यद्याचार्यनियोगे मम अवस्थानं स्यात् तदा कृत्स्नबंधुवक्रमेण मुक्तिः स्यात्। ममत्वाचार्येण तापि विनयं नाघात् सात्त्विकविडंबनार्थैव संहतेति
भावः। अयोग्यस्य दुर्लभाभिलाषः परद्रोहेष्वपि ध्यानमपनसानिष्टचिंतनं। वितथाभिनिवेशा अश्रमानसत्रिविधं स्मृतमिति स्मरणाद्दयचा
रः स्यात्॥ अतः पुरोऽशास्त्रार्थिनः श्रुत इवमेदंतु पातः स्यादिति॥ उक्तं यत्सहितोऽहमित्याह। निर्दयमिति। निर्दयमिति केषांचित्पाठे तु परम
भागवतभोग्ये परमात्मनि तेषु विषये संजनयं तमिति भावः। अत्र मदपराधेन मदद्वर्धनामपि प्रस्ताव्यायो भवेदिति ज्ञात्वापि प्रवृत्तत्वात्रैष्ठुर्दया

धिगशुचिमविनीतं निर्दयं मामलज्जं परमपुरुष योऽहं योगिवर्याग्रणीभिः। विधिशिवसनकाद्यैर्ध्यातुमत्यंतदूरं तव परिजनभावं कामये कामवृत्तः॥५७

रहितोऽहमिति आत्मात्तं पुनरुक्तं मां अहंकारादियुक्तमित्यभिप्रायः। घटक्षणाः सार्वभौमपरिग्रहाभिलाषवद्दनुचितविषयो मम मनोरथ इति मद्धिः प
रिहास्पृतामनुसंधायाह। अलज्जमिति। सूरिसेव्यस्य भगवतः स्वसंधार्हत्वं तुगतं चयनक्ति परमपुरुषेति स्वस्य निहीनमत्वं प्रकटितमिदा।
नीमपि दोषानुवृत्तिं साभिप्रेत्याह। योऽहमिति। योगिपुंगवयोगिवर्याः। भगवद्भक्ताः तथा च गीयते। योगिनामपि सर्वेषामित्यादिना प्रयोगा।
ण्याः प्रथमपरिगणनीयाः विधिशिवसनकाद्यैरितुं मयश्रावनानां च सर्वेषां संग्रहः ध्यातुमत्यंतदूरमित्यनेन किं पुनः प्राप्तुमिति व्यज्यते।
तवपरिजनभावं स्वानुरूपानंतगरुडाद्यपरिमितपरिजनवत्तया निरपेक्षस्य तव प्रति किंकरत्वं यद्वा परिजनक्रियासेवामित्यर्थः कामये न वयं संग
मात्रं किंतु विलंबासहमतीव्रतमश्रवणाद्गस्मीत्याशयः कामतो वृत्तयस्य स कामवृत्तः। लोकशास्त्रानादरेणापरीक्षितयथेष्टकारी तादृशः लो
कयात्रामयं लज्जादान्विते धर्मशीलता पंचयच्छनविदेयं तेन कार्यांतेन संगतिमिति सर्वपरित्याज्योऽहं कथं त्वत्प्रासमर्हे इति भावः॥५७॥

अस्त्वेवं दुर्लभः ततः किं कर्त्तव्यमित्यत्र अममैवं त्वा मोपेक्षितव्यावरितव्यं किंपुनः त्वद्गतोऽप्येसमितस्मादावयोरिष्टं प्रसंगनिष्टप्रसंगपरिहारार्थं
त्वन्मूलत्वं प्रपत्तिसिद्धं रक्षकत्वरूपसंबंधं निवारकरहितनिरंकुशस्वातंत्र्यान्निःफलीकर्तुं नार्हसीत्यभिप्रायेणाह । तदहमिति । ततश्च त्वा-
र्थेऽसमसत्वात्वादित्यर्थः । अहं मुमुक्षुः सन् किंचनः त्वदृते न नाथवान् सर्वे शास्त्रे परमकारुणिकात् तत्वज्ञोऽन्ये व्यावरणवान्न स्वामीत्यर्थः मदृ-
ते त्वमित्यादि अपरिच्छेद्यापराधफलभूतानंतदुःखाकरान्मत्तोऽन्येन त्वं दयाविषयवान्न भवसि मत्तरी त्वागोमाद्दशाः सर्वे परित्याज्याः सुरे-
व स्वनितिविषया नानाद्या गुणास्तैर्हीयेत इति भावः सर्वस्मात्त्वं सारिवर्गो त्वत्कार्येऽस्मिन्नर्थे स्वदोषिक्षमारोपमहत इत्युक्तं विधिनिर्मि-
तं । अनतिक्रमणीयादृष्टनिर्मितं अज्ञातसुकृतविशेषरूपव्याजावलंबिमात्त्वत्कृपयैवावसरे क्लिप्तमिति यावत् एतमन्वयं दयाव-
त्वदयनीयत्वरूपसंबंधं एतदन्वयमिति केचित्पठंति । तत्रापि स एवार्थः एतयोरावयोरन्योन्यसंबंधमिति वा भगवन्निति तेन नमोरूपद-
त्वमुक्तप्राप्त्यानुगुणमुभयविंगमीत्वमुद्बाहजते । पालय सफलीकुरुष्वेति भावः मा स्म जीहपः यद्यप्यहमपरिनियोज्य इक्षमेव

तदहं त्वदृते न नाथवान् मदृते त्वं दयनीयवान्न च । विधिनिर्मितमेतमन्वयं भगवन्पालय मा स्म जीहपः ॥५१॥ वपुरादिषु योऽपि कोऽपि वा ।
गुणतोऽसानि यथा तथाविधः । तदहं क्षमयुस्त्वात्मा शेषो हि परमात्मन इत्याद्युक्तस्वरूपस्तव पादपद्मयोरहमद्यैव मया समर्पितः ॥५२॥

शादिमं संबंधं हातुमिच्छसि तथापि त्वया न तथा वर्जनीयोऽहमिति भावः ॥५१॥ अस्त्वेवं त्वदुक्तं सर्वं सत्यं समुचितं च तथाऽज्ञानानंस्मयस्त्वात्मा
शेषो हि परमात्मन इत्याद्युक्तस्वरूपज्ञानमंतरेण स्वरूपानुरूपपुरुषार्थापेक्षा सर्वैकतदुपायः कथं ते निष्पन्नः त्वया च सह संबंधपरित्यागि-
नाममापि रक्षरक्षकत्वसंबंधपरित्यागे को दोषः । त्वमोहं मे इति आवयोरनादिविवाद इदानीमपि न शांत इत्यत्र स्वामिन्नित्यादिभिः अ-
गपि सहि मत्तद्वारा तदनुज्ञा कुरु यदि किं वा नु जानं तोऽस्मि त्वोऽपि तेऽवतथाहीतिच्छांदोगाधीतानुज्ञा कुरु स्वदर्शितशेषतासुपगमे नोत्तरमाह
वपुरादिष्विति आदिशब्दः इंद्रियादिसंग्रहार्थः । यथोक्तमात्मसिद्धौ देहेंद्रियमनःप्राणधीभ्योऽन्योऽनन्यसाधनः नित्यो व्यापी प्रतिक्षेत्रमात्माभि-
न्नः स्वतः सुखीति योऽपि कोऽपि वा अहं वपुरादिषु यः कश्चित्प्रमाणसिद्धः सोऽहम् अर्थस्य सारभूते त्वच्छेषत्वे मम निर्बंधः सामान्येन वस्त्वानुगुण

नधर्मनिष्ठोस्मीत्यारभ्य अकिंचिन इत्यंतेनोक्तं प्रपंचयति । अविवेकेति । अविवेकरूपैर्घनैरंधानि प्रकाशरहितानि दिङ्मुखानि यस्मात्
तथोक्तं बहुधा तापत्रयरूपेण शारीरमानसादिनानाभेदैरूपसंततदुःखवर्षिणि अविच्छेदेन प्रतिकूलवर्गं सर्वत्र विदधति भ
गवन् हेयप्रतिभटकल्याणैकतान त्वमेव तन्मोचयितुमर्हसीति भावः प्रकाशगतिविरोधितया भवस्य दुर्दिनत्वरूपणं पथः कर्मयो
गादिनिवृत्तिधर्मरूपमुक्तिमार्गात् स्खलितं प्रच्युतमित्यर्थः मोक्षसाधनमूलं शरणं प्रपद्ये इति वादिनमिति भावः । अवलोकय अनुगृही
त्वेत्यर्थः । अश्रुतसंप्राप्तं न तज्ज्ञेयं कथंचनेत्यादि न त्वामाश्रित्य मुक्तो न भवतीत्यभिप्रायः मूढोयमस्वमतिरत्र विचेष्टितो युक्तिः मूढमा
नोस्य विषयेनं मयि प्रसंगि इत्यरूपात् कृष्ण मयि प्रणते खिलेश त्वां तोतुमज्ञ नु बोहि देव नेशा इति कृष्ण वृद्ध क्तं मोहं तदेवदेवेशोत्पा
दिकानीयवाक्यं चानुसंधेयम् ॥ ४९ ॥ अथ संसारेणामानं न त्वदधिकृदयनीयजामातृनैवमेत्वरायुक्ताकिंतु दवलोकनेनेत्यत्र त्वया
पि न ध्वंसं प्रभूत सर्वेम्भिमान्ययुक्तं मुखान्तरेण शरणप्राप्यनिष्टप्रसंगं त्वं वयन् दृष्टयति । नमृषेति । स्ववाक्यसत्यत्वाभिसंधिद्योतनाय

अविवेकघनांधदिङ्मुखे बहुधा संततदुःखवर्षिणि । भगवन् भवदुर्दिने पथः स्खलितं मामवलोकयाच्युत ॥ ४९ ॥ न मृषा परमार्थमे
व मे शृणु विज्ञापनमेकमग्रतः । यदि मे न दयिष्यसे ततो दयनीयस्तव नाथ दुर्लभः ॥ ५० ॥

व्यतिरेकतोन्वयतश्च निर्देशः । परमार्थमेव
विज्ञापनं शृण्विति तत्र नेदं स्वरक्षणप्रोत्साहनमात्रेण प्रयुक्तमित्यवधारणाभिप्रायः विज्ञापनं सर्वज्ञेपि स्वामिनि ज्ञापयितव्यकार्यार्थवाक्य
मित्यर्थः शृण्विति चानादरपरिहारपरं एकं रक्ष्यरक्षकयोर्द्वयोरपि लाभार्थतया प्रधानभूतं अग्रत इदमेकमेव विज्ञापनं वक्ष्यमाणं सर्वमेतत्
परिकरबंध इति भावः । अग्रतः नहि बहुदूरस्थः पुरुषान्तरमुखेन विज्ञाप्यस इति भावः मे कर्मयोगादिषु कृतलेशरहितस्यापराधसहस्रभाज
नतया सार्वदिकदुःखभागिनः । अत्राधिगर्थदयेत्पाकर्मणि षष्ठीतत्कदयाविषयान्वेषिण इति भावः । तवदयनीय इत्यन्वयः दुर्लभ इत्यनेना
न्वये तु भवबंधसामान्ये षष्ठी नेतव्या मम च शरण्यान्तरदुर्लभमित्यभिप्रायेण नाथेति संबुद्धिः उक्तं हि पूर्वं चिराय मे कृत्यमिवाद्यतिलक्ष इति परि

ननु मया समर्पितइत्यत्र स्वशेषत्वानुसंधानपूर्वकं स्वाधीनकर्तृत्वबुद्ध्या समर्पयामि चेत् यो न्यथासंतमात्मानमन्यथाप्रतिपद्यते किं तेन न कृ
तं पापं चोरेणात्मापहारिणेत्युक्तआत्मापहारादिदोषः परिहृतो न स्यादित्यत्र श्लोकाभिप्रेतं विवृणोति ममनाथेति। अत्र जीवपरमात्मनोर्याथा
त्म्यज्ञानविषयः प्रमाणगणः पदद्वयेन प्रतिसंधेयः यदस्तीति स्वानुबंधितया प्रमाणसिद्धगुणविग्रहादिसर्वसंग्रहः ममेति व्यतिरेको नथाहे
हाम न्त्रमादिः परिहृतइत्यस्करत्रयस्यापि तृतीयाक्षरविवक्षितं विविक्तात्मस्वरूपमाह योस्म्यहमिति। सकलं तत्रात्मात्मीयं तत्सर्वं हिश
ब्देन प्रमाणप्रसिद्धिर्द्योत्यते। तवसर्वकारणतया सर्वरक्षकतया च प्रथमाक्षरप्रकृत्युक्तस्य एवकारेणानन्यार्हत्वं प्रका
श्यते। माधवश्रियःपते एतेन निरुपाधिकसर्वशेषित्वसूचनेन चतुर्थी विवक्षितमाह। नियतस्वमिति नित्यशेषभूतमित्यर्थः। इतिप्रबुद्ध
धीरेवं तत्त्वप्रसादसंधुक्षते। शास्त्रैर्विकसितबुद्धिरिति भावः। शंकितदोषपरिहारेणाभिप्रायेणाह। अथवेति किंनु समर्पयामि ते सर्वस्वामिनः स
र्वेश्वरस्य तव सर्वमिदं शेषित्वममेदानीं स्वातंत्र्यस्वामित्वाभिमानपूर्वकंकर्तव्यं न किंचिदस्ति। अतः पूर्वश्लोककृतं समर्पणं तच्छेषत्वप्रतिप

॥ ममनाथयदस्ति योस्म्यहं सकलं तद्धि तवैव माधव॥ नियतःस्वमिति प्रबुद्धधीरथवा किंनु समर्पयामि ते॥५२॥

त्तिमात्ररूपं न तु मदीयस्य त्वच्छेषतापादनरूपमिति भावः। अत्र पूर्वकृतस्वरूपसमर्पणानुशयेन न देवप्रतिक्षिप्तं इति प्रकृ
त्वप्रतिबुद्धानामात्मसमर्पणमभिप्रेत्योक्तः अस्य यामुनाचार्यस्य प्रागेव प्रतिबुद्धत्वात्। अस्मद्गुरुकैवगमनिका न स्वत्वद्येव मया स
मर्पितइत्युक्तेरनंतरमस्य तत्त्वबोधः एवं भरसमर्पणरूपप्रपत्तिपरः पूर्वश्लोकः। अयं तु तत्त्वविदां तस्यैवाकर्तृत्वस्थापनार्थ इति
पक्षोपि नियतःस्वमिति प्रबुद्धधीरवबोधितवानमायथेत्यादिभिर्न संगच्छते। भरन्यासविधायकशास्त्रेष्वविरुध्येत संबंधज्ञानमात्र
मेवप्रपत्तिरिति वादश्चात्र निरस्तः। लोकविरुद्धश्च प्रपन्नेपि संबंधबुद्धिर्दोसेहि हरपतेश्मिवेगसमावेन प्रपन्नेपि नदासधीरन्यथा
त्वादासइतिप्रपन्नइति चेत्यादिभिरपि विरुद्धेत अतो मुमुक्षूणां भरसमर्पणरूपप्रपत्तौ संबंधज्ञानमधिकारकोटिस्थितानुष्ठानका
लेपिफलसंगकर्तृत्वादित्यागे वतिष्ठतीति मंतव्यं महतामपि केषांचिदितिवाराः पृथक्विधाः नत्तदर्थप्रशंसादितत्परत्वादवाक्षेपिताः॥५२॥ ५२

सारसंग्रहणमुच्यते ॥ यावानर्थ उदपाने सर्वतः संप्लुतोदके । अणुभ्यश्च महद्भ्यश्च शास्त्रेभ्यो मतिमान्नरः सर्वतः सारमादद्यात्पुष्पेभ्य इव षट्
पद इत्यादिभिः । अत्र देहात्मभ्रमाद्यनुवृत्तिर्भवतु वा न वा योहमस्मि स सन् यजे इति न्यायमाश्रयामीति भावः तथापि ज्ञातृत्वकर्तृत्वभोक्तृत्वादि
विवेकमंतरेण कथमुपायानुष्ठानं फलितं वा स्यादित्यत आह । गुणतो मानियद्यातथाविध इति अणुत्वविभुत्व अणुपरिमाणत्वाजड
त्वनित्यत्वज्ञानत्वादिविवेकोत्र नातीवापेक्षितः अपेक्षितत्वेप्यात्मस्वरूपप्रकारयोरत्यंतपरिज्ञाने मम शक्तिर्नास्ति स्वतः सर्वज्ञस्त्वमेव
योसौ तत्प्रकारस्त्वेतिमन्यसे तथाहमिति सामान्यतः प्रतिबुद्धोहमिति भावः नत एतावतापि शक्तशास्त्रार्थविरोधाभावादितियावत् ।
स्वयमहंत्वदनुसंहितयथावस्थिताकारः शरणवरणानुगुणार्थित्वसामर्थ्यावानहमित्यर्थः । आत्मस्वरूपनिरूपनदशायामहंशब्दप्रयो
गादहमर्थ एवात्मेति स्थापितं भवति । तच पादपद्मयोः समर्पितः । यस्मास्मिन नमं रेणमीति इति न्यायात्वच्छेषत्वेन्यस्त इत्यर्थः मयात्वदत्त
करणकलेवरबुद्धिश्रद्धाकार्पण्यादिशालिनास्मयेते हि विविधा देहसंपत्तिरीश्वरायनिवेदितुं पूर्वमेव कृता ब्रह्मन्न हस्वपादाद्दिसंयुते
ति । इतः परं त्वया सह न मे विवादो भविष्यतीत्यभिप्रेत्याह । अर्थार्थेवेति ॥ अत्र यदिरूणिकमेवममस्वरूपं तथापि तस्मिन्नेव रूणेनि
हितइति । केषांचिद्याख्यानं तत्वनिवादमात्रं ॥ एवं मुमुक्षूणामात्मात्मीयं सर्वं भगवच्छेषत्वेनानुसंधेयमितिनिवृत्तिधर्मसारोनिःकृष्टः
उक्तं चैतदुपरिचरवसव्याख्याने आत्माराज्यं धनं मित्रं कलत्रं वाहनानि च ॥ एतद्भगवते सर्वमितितत्प्रोक्षितं सदेति भरतस्याहर
ण्यं चाहं चरामस्याधर्मचक्रुमिहार्हसीतिश्रीविष्णुतत्वे च । स्वत्वमात्मनि संजातं स्वामित्वं ब्रह्मणि स्थितं । उभयोरेषः संबंधो न परोभिमतो मम ।
स्याज्जीवनेच्छायदि ते स्वसत्तायां स्पृहायदि आत्मदास्यं हरेः स्वाम्यं स्वभावं च सदा स्मरेति सर्वसंज्ञायनिर्मुक्तो नारदस्य पुंडरीकसंवादे
आह ॥ दासोहंवासुदेवस्य देवदेवस्य सर्गिणः । शंखचक्रगदापाणेस्त्रैलोक्यस्यैकचक्षुष इति ॥ ईश्वरसंहितायां महादेवस्याह । दास
भूताः स्वतः सर्वे ह्यात्मानः परमात्मनः ततोहमपि ते दास इति मत्वा नमाम्यहमिति । ५२ ॥

न केवलं त्वद्भक्तिरेव मे प्रार्थनीया त्वत्त इत्यर्थे तत्फलत्वेन चतुर्थीयेषु भक्तिमत्सन्निधिरपि मे स्यादित्यभिप्रायेणाह। तवदासेति। उक्तं हि स
त्संगनिकषं च यवनं तत्कृष्णसंवादे संभाषणाद्दर्शनं स्पर्शः कीर्तनं स्मरणं तथा। पावनानि किलैतानि साधूनामिति शुश्रुमः सेव्याश्रयोऽपि भि
संनः पुण्यतीर्थफलोपमाः स्मृतोपासनयोगोऽपि न तेषां निःफलो भवेत्॥ साधूनां दर्शनं पुण्यं तीर्थभूता हि साधवः कालेन फलदं तीर्थं सद्यः
साधुसमागमः इति एवं सद्भिरेव सहासीनः सद्भिः कुर्वीत संगमं सद्भिर्विवादं मैत्रीं च नासद्भिः किंचिदाचरेत्॥ अहन्यहनि धर्मस्य योनिः साधुस
मागमः मोहजालस्य योनिर्हि मूढैरेव समागमः यद्दिसंतन्न सेवेत योयद्यस्तत्तदाप्नुयात् यदि वा स्तेनमेवासौ यथा रागवशं नयेत्। तथास
तेषां वशमनुपैति सत्सन्निकर्षे परिवर्जितव्यं विद्याधिकाश्चापि निषेवणीयाः सद्वर्त्मतां गच्छति सन्निकर्षात् नीचः खगो मेरुमिवाश्रय
न्वै इत्यादिवचनानि द्रष्टव्यानि तवदासस्य सुखैकसंगिनां त्वत्कैंकर्यजन्मप्रीतिमात्रसक्तानामित्यर्थः एतेन पंचेंद्रियप्रीतिनिवर्तकस्य हृ
न्नादिप्रसिद्धवैषयिकसुखवैमुख्यमुच्यते। ईदृशानां स्वेनाभिमतत्वं कुर्वतो भगवतोक्तं मद्भक्तजनवात्सल्यं पूजायां चानुमोदनं स्वयम

॥ तवदासस्य सुखैकसंगिनां भवनेष्वस्त्वपि कीटजन्म मे। इतरावसथेषु मा स्म भूदपि मे जन्म चतुर्मुखात्मना ॥५५॥

भ्यर्चनं चैव मदर्थे दम्भवर्जनं। मत्कथाश्रवणे भक्तिः स्वरनेत्राङ्गविक्रिया। ममानुस्मरणं नित्यं। यच्च मां नोपजीवति भक्तिरष्टविधा ह्येषा यस्मिन्
म्लेच्छेऽपि वर्तते स विप्रेन्द्रो मुनिः श्रीमान् स यतिः स च पण्डितः तस्मै देयं ततो ग्राह्यं स च पूज्यो यथा ह्यहमिति। मोक्षधर्मे च। ब्रह्मादिभिर्यत्सुपूजि
तं सर्वदेवस्य चरणोदकं प्रतिष्ठन्न इत्युक्तानन्तरमुच्यते याः क्रियाः संप्रयुक्ताः स्युरेकान्तगतबुद्धिभिः ताः सर्वाः शिरसा देवः प्रतिगृह्णाति वै।
स्वयमिति। अहो ह्येकान्तिनः सर्वान् प्रीणाति भगवान् हरिः। विधिप्रयुक्तां पूजां च गृह्णाति शिरसा स्वयमिति। ईदृशभागवताभिमानगो
चरत्वाय स्थानान्तरगमनानर्होऽनन्यगतित्वविवक्षया कीटजन्मेत्युक्तं शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायत इत्युक्तमुत्कृष्टजन्म तिष्ठतु
पशुर्मनुष्यः पक्षी वा ये च वैष्णवसंश्रिताः इत्यादिषूक्तमपकृष्टजन्मापि त्वदिष्टविनियोगसिद्धत्वाच्छेषत्वकाष्ठावेदिनो ममाऽलं भागवताभि
मानविषयभूतदेशवासित्वं त्वत्कैंकर्यं च ममापेक्षितमिति तात्पर्यमपिशब्दस्तत्र गाढाभिसंधिं द्योतयति। यथोक्तं। मम मद्भक्तभक्तेषु प्रीति ५२

परमात्मनि पोरक्तो विरक्तोपरमात्मनीति कृपयैतदिति पाठे तु एतदिति वाक्यभेदः एतदनन्यभोग्यतामिति समस्तं वा भक्तिविशेषणं स्वातिरिक्तभोग्यतारहिताम्
इत्यर्थः भक्तिमपि प्रयच्छमे अत्र हि

अद्येवं मच्छेषत्वप्रतिबोधस्ते संजातस्तेन तत्त्वाधिकारउपायनिष्पन्नो मुक्तो भविष्यति अद्य पुनरा देहपातात्किमपेक्षितमित्यत्र प्रार्थितवाञ्जनं
नीवदेकभोग्यतानुगुणां भक्तिं देहीत्याह । अवबोधितवानिति । त्वमेवेश्वन मित्रमाज्ञामिनं कृतवानिति कृतज्ञताप्रकाशनमिदं इमां हृदय
माणप्रथितां अहष्टपूर्वतया अद्भुतत्वेन स्वादुतयानुभूयमानां निरपेक्षां कर्तृत्वादिप्रोद्भितां चेति भावः मयि नित्यां भवदीयतां त्वच्छरीरभूतेम
यिकालपरिच्छेदरहितां त्वच्छेषतामित्यर्थः स्वयं कृपाविशिष्टस्त्वमेवेति यावत् कृपयैवमिति पाठः समीचीनः यथाशब्दप्रतिनिर्देश्या
स्यापेक्षितत्वात् अनन्यभोग्यतां भगवद्व्यतिरिक्तं भोग्यं यस्य सोन्यभोग्यः तद्व्यतिरिक्तोनन्यभोग्यस्तस्य भावः तां परमभक्तिगोचरत्वं तत्त्वदात
त्वं च तद्वयुक्तमित्यभिप्रायेण संबोधयति । भगवन्निति । भक्तिमपि त्वयि रूपां प्रीतिं च तदिदमुच्यते यो धीरविवेकानां विषयेष्वनपायिनी

अवबोधितवानिमां यथा मयि नित्यां भवदीयतां स्वयं । कृपयैवमनन्यभोग्यतां भगवन्भक्तिमपि प्रयच्छ मे ५४ ॥

हृष्लोकद्वयं साध्यं । ननु परमैकान्तिनां भगवति याञ्चा निषिध्यते । निराशीः कर्मसंयुक्तं सात्त्विकं चाप्यकल्मषमिति चोक्तं सत्यं प्रार्थितं न
याच्यो भगवानिति हि । तत्र तात्पर्यं तदभिप्रायेणाप्युच्यते । अन्नं पानं धनं वस्त्रमायुरैश्वर्यमास्पदं । आपद्यपि न याचेत ब्रह्मजः पुरुषोत्तमं ना
प्रसन्नो दद्यामेतद्याचितोपि दिने दिने । अनयाचितोपि सर्वं प्रसन्नो विदधात्यहमिति तत्परायाचितोपि सदा भक्तैर्नो हितं कारयेत हरिः वाञ्छम
नोपनतं तु माता किं न निवारयेदिति वत्सहितां तरे च तस्मात् भक्तिज्ञानाभ्यां फलमन्यत्कदाचन । न याचेत् पुरुषो विष्णुं याचनान्नश्यति ध्रुवमिति
अत्र भक्तिज्ञानवचनं तत्समानं भागवतकैंकर्यादेरप्युपलक्षणं । अवशापेक्षितविषये तु भगवन्तमेव याचेत् तेनापि नियम्यते ५४ ॥

श्लो. ४४ शोकमपनेष्यति राघवः नमः सर्वस्य लोकस्य समुद्यन्निव भास्करः इति। यस्य रामं न पश्येत्तु यं च रामो न पश्यति। निंदितः स भवेल्लोके स्वात्माप्येनं
विगर्हतीति चोक्तं। अनुत्तमभुक्तिः ब्रह्मादीनां तु मुक्तिः सा च मुक्तिश्च यैस्तृणीकृते अनाहृते ते तृणीकृतानुत्तमभुक्तिमुक्तिभिः। अनुत्तमत्वा
दस्य मुक्तानामन्वयेऽपि न मुक्तं तत्र यद्वक्ष्ये द्यु मुक्तितारतम्यस्य प्रागेव निरस्तत्वात् सगवत मनुगवतीतरन्न तृणीकारः स्वयं नेकिं प्रजया
करिष्यामो येषां नोऽयमात्मेत्यादि पुराणे चोक्तं। पत्युः प्रजानामैश्वर्यं पशूनां वा न कामये अहं कथं वो भया संकर्षणाय युतानटइति निदर्श
नविबस्पृष्या चोच्यते तृणं नारी विरक्तस्य तृणं शूरस्य जीवितं। तृणं ब्रह्मविदो विश्वं निःस्पृहस्य तृणं जगत् इति। महात्मानस्तु मां पार्थ समहा
त्मा सुदुर्लभ इति भगवदुक्तं च सूचयन्नाह। महात्मभिरिति। उज्जीवकत्वे पुरुषार्थत्वे च भूयस्त्वापेक्षया वक्तुः चनं मां त्वत्कं मा हात्सर्वराज
सता मम स हृष्टिगोचरतया इष्टितमिदानीं त्वद्वेक्षणेन प्राप्तिं बुद्धमिति भावः। अवलोकितां अवलोकनीयतां निष्कृत्य तद्भुवनेषु जन्मतत्करान्द

॥सकृत्वदाकारविलोकनाशया तृणीकृतानुत्तमभुक्तिमुक्तिभिः महात्मभिर्मामवलोक्यतां नय क्षणेऽपि ते यद्विरहोऽतिदुःसहः ५६॥

विषयत्वमात्रमपि पुरुषार्थमिति वाभिप्रेत प्रख्यातो हि भागवतावलोकनप्रभावः यस्यानुभवात्पर्यंतानुद्दिष्टत्वे प्रतिष्ठितात हृष्टिगोचराः सर्वेमु
च्यंते सर्वकिल्बिषैरिति। नयएतावदुपकर्तृत्वमेव शेषं प्रापयेति भावः यथात्वया तद्विश्लेषो दुःसहस्तथा मया तदवलोकनविरहोऽतिदुःस
हइत्यभिप्रायेनाये णाह। क्षणेऽपि यद्विरहोऽतिदुःसहे तिन्तदिद्भामनंतितेतिरीयाः सर्धं चक्षागसेद धेब्रह्मणेशः रमनेनस्मिनुजीर्णे शयानेने।
नं जहात्महस्तु सर्वे क्षिति स्वयमप्याह। ज्ञानी त्वात्मैव मे मतमिति॥ आकुल्मम हर्षयः पराङ्मुखानां गोविंदे विषयासक्तचेतसां तेषां तत्परमं
ब्रह्म दूराद्दूरतरे स्थितं। यन्मयत्वेन गोविंदे येन राम्यस्त चेतसः विषयत्यागिनस्तेषां विज्ञेयं च तदंतिके इति तथा नारायणेति। यस्मा सेवर्त्तते
नाम मंगलं नारायणस्तमभ्यात्ते वत्सं गोरिवत्स जेति वसंति वैष्णवा यत्र तत्र निहितो हरिरिति च अत्र विरहशब्देन सर्वव्यापिनः सर्वज्ञस्य भक्तानां
स्वविषयहार्यनुभवविच्छेदो विवक्षितः। ननु तद्विरहक्लेशः सर्वशक्तेर्हेयप्रत्यनीकस्य न तद्योगात्तत्तस्तादृशावस्थावतोऽस्य विश्लेषो नोत्पादयते ४४

रस्य धिषवेत् तस्मान्मद्भक्ता नमस्काश्च पूजनीया विशेषत इति ह्रास समुच्चये च । तस्माद्विष्णुप्रसादाय वैष्णवान् परितोषयेत् प्रसादसुमुखो वि
ष्णुस्तेनैव स्यान्न संशय इति सात्त्विकस्मृतौ च सिद्धिर्भवति वा नेति संशयो च्युत सेविनां न संशयोत्र तद्भक्तपरिचर्यात्मनां । केवलं भगवत्पादसे
वया विमलं मनः न जायते तथा नित्यं तद्भक्तचरणार्चनाद्धिति । श्रीयोधकरे च । दुर्लभं भागवद्योगभाविनो भुवि मानवाः । तद्दर्शनात्तदा जायते तत्पु
लभ शाश्वतं पदमिति । एवमाराधनानां सर्वेषां विष्णोराराधनं परं तस्मात्परतरं प्रोक्तं तदीयाराधनं नृप । तस्य यज्ञवराहस्य विष्णोरमिततेजसः
प्रणामं ये पि कुर्वन्ति तेषामपि नमो नम इत्यादि द्रष्टव्यं । इतरावसथेषु । अभागवतनिवासेषु चतुर्मुखात्मनापि जन्म मा स्म भूत् किं पुनर्मनुष्या
द्यात्मनेति तात्पर्यं तन्नाभिप्रेते चतुर्मुखात्मनापि जन्म मदभिसंधिविरुद्धमित्यपि प्रायेण पुनरपि मे इत्युक्तं । एतेनाभागवतानाम भागवतसं
सर्गः परिहार्य इत्युक्तं भवति । तथा चोक्तं च । आसनं निनेदं विदनिदं विशायान भुद्दिसेन्न सह भुंजीत न च सथमा विशेस्यादिति स्मर्यते च शैवान्
पाषण्डपतितान् स्पृष्ट्वा लोकायतिकनास्तिकान् विकर्मस्थान् द्विजान् शूद्रान् सचासाज्जनमा विशेत् । असतां दर्शनात् स्पर्शात् संप्रश्नोत्तम्भाष
हासनात् । धर्माचाराः प्रणश्यन्ति यथा सैकतमम्भसीति च सात्त्विकस्मृतौ च । मूढैः पापरतैः क्रूरैः सद्गमपराङ्मुखैः संबंधं नाचरेद्भक्तो नश्यते
तेषु संगमान्न वैष्णवे पुराणे । पुंसां जन्ममरणमोदाव्रतानां थैव मोघाशिनामखिलशो चव हिष्कृतानां । तोयप्रदानपितृपिंडनिराकृतानां
संभाषणादपि नरा नरकं प्रयान्ति । अमनेवरं कृततवहज्वालापंजरान्तर्व्यवस्थितिः । न शौरिचिंताविमुखजनसंवासवैशसमिति । तथा
अद्य प्रभृति हे लोकाः यूयं वयं वयं । अर्थकामपरा यूयं नारायणपरा वयं नास्ति संगतिरस्माकं युष्माकं च परस्परं । वयं तु किंकरा विष्णोर्यूयं
मिंद्रियकिंकरा इति पितृभिः श्रेवमुक्तं भजनिष्ठ स नो वंशे जातो वाऽग्रविपद्यतां । आजन्ममरणं यस्य वासुदेवो न दैवतमिति । अश्वेयः प्रा
कृतः प्रोक्तो वैद्यो वैष्णव उच्यते । अविद्येन न केनापि वैद्यः किंचित्समाचरेदिति । ५५ । एवमभागवतसंसर्गपरिहारेण भागवतैः सन्नि
कर्षं तत्र तत्र तु ते किं साधुमिति न प्राह सकृदिति । सदा तद्दर्शनसापेक्षिते स्वेपि सकृद्विलोकनोक्तिस्तस्य गुरुषार्यभूयस्त्वं व्यंजनार्थो तथा
चायोध्यावासिनां वाक्यं । अलमद्य हि भुक्तेन परमार्थैरलं च नः । तथा पश्याम निर्यान्तं रामं राज्ये प्रतिष्ठितं । कदाद्यामो हि महाबाहुं रघुवीरं महा
वलं । गजेन महता यांतं रामं छत्रावृताननमिति मे पश्याम महाबाहुं स्थिरसत्त्वं दृढव्रतं । कदा द्रक्ष्याम हे रामं जगतः शोकनाशनं । दृष्ट एव हि नः

एतत्सर्वमुक्तं तावन्नेदं त्वं किमवलंब्य प्रार्थयस इति पुनर्भगवताहर्वोक्तस्थिरीकरणाय पृष्टमाह। दुरंतस्येति। प्रायश्चित्तानवसराति घोर
विपाकस्येत्यर्थः। अनादेः पूर्वकोटिरहितप्रवाहस्यापरिहरणीयस्य सर्वशक्तेस्तवैव संकल्पमंतरेण दुष्परिहरस्य महतः महापातकोपपात
करूपस्य असंख्यातस्य वा अनाचारदोषाद्दग्धहमुपहत इत्याह विहीनाचार इति। अत्यंतनिकृष्टाचार इत्यर्थः। अत्र संध्याहीनोऽशुचिर्नि
त्यमनर्हः सर्वकर्मसु यदन्यत्कुरुते कर्म न तस्य फलभाग्भवेत्। आचारहीनं न पुनंति वेदा इत्यादि द्रष्टव्यं। अहं मदन्यः कः ईदृश इति भा
वः। नृपशुः नरजातीयतया चतुःपाद्यावर्तैः पशुः सम्यक्ज्ञानयोग्यजन्मतामेऽपि ज्ञानेन हीनः पशुभिः समान इत्युक्तः। अशुभस्यास
दत्वदपचारत्वदीयापचारादीनां सर्वेषामेकाश्रयः। अहमशुभस्यास्पदं त्वगुणानामाकरोऽसि हानिति प्रसिद्ध इति हृदयं। अपिशब्दे
न विरोधद्योतनं एवंविधस्त्वदोषपरिहारेऽपैकगुणविशेषव त्वया संबोधयति। दयासिंधो बंधो इति। बंधो माता पिता त्वादिना निरुपाधि

दुरंतस्यानादेरपरिहरणीयस्य महतो विहीनाचारोऽहं नृपशुरशुभस्यास्पदमपि। दयासिंधो बंधो निरवधिकवात्सल्यजलधे स्तव स्मारं
स्मारं गुणगणमितीच्छामि गतभीः॥ ५८॥

सर्वेगुविधबंधुत्वेन प्रसिद्धः निरवधिकवात्सल्यजलधे रिपूणामपि वत्सल इत्यर्थः। अत्र दयावात्सल्यसिंधुत्वरूपेणैनातितुंगा
नामपि स्वापराधानां तत्र निमज्जनं सूच्यते। तव स्वाभाविकासंख्यातगुणवत्तया शास्त्रप्रसिद्धस्य गुणगणं ज्ञानशक्तिकारुण्यादिकं
स्मारं स्मारं स्मृत्वा स्मृत्वा निर्बाधतया विस्मर्तुमशक्यतया वा निरंतरमनुसंधायेति भावः। तेनैव गतभीः विरोधिभूयस्त्वदर्शनजन्य
भयरहित इच्छामि विज्ञासविज्ञानेत्यादिभिरवबोधितवानित्यादिभिः श्लोकप्रकारेण निरंतरेच्छावान् भवामीत्यर्थः॥ ५८॥ यद्येवमिच्छ
सि तदा ते सर्वमिष्टं संपत्स्यते शास्त्रजन्यपरोक्षज्ञानमात्रेणेष्टतया वा गतेऽपि प्रत्यक्चासनावशाद्यत्रकृचनानुवृत्तावसत्कल्पा हृदय
प्रार्थनामात्रेणेयद्दिमुक्तिं दास्यामि तदा तवाऽनिष्टमेवमयाकृतं स्यादित्यत्राह। अनिच्छन्निति। अतः आरभ्य सप्तभिः श्लोकैः शिक्षणीयते

वतात्पर्यं यत्कर्तृकवियोगस्तेनिराकर्तुमिष्टत्वमङ्गितिवापिवक्षितं त्र्यवबोधितत्वान्नित्यादिष्वेको कन्ययेरास्वयं प्रयोजनोत्तरकृत्येकाम्यनिषि
द्धत्वं मेदप्रसंगोनिरस्तः ॥५६॥ एवमिष्टं सर्वदास्यामिच्छनिष्टं त्विहकिं तेनिवर्त्तनीयमित्यत्राह ॥ नदेहमिति भागवतकटारुजयस्फविविशेषात्
सयदिसर्वविरोधिवर्गसंग्रहेणनिर्दिश्यतन्निवृत्तिमभ्यर्थ्यते ॥ अशेषाभिलषितमितेतत्तत्देहादिषु सर्वेष्वन्वेति ॥ अन्येषांसुखार्थत्वात्प्रधान
भूतेसुखमात्रेवा आत्मानंस्वस्वरूपमित्यर्थः पुत्रमित्रगृहक्षेत्रादिकं दूरतोनिरस्त मित्यभिप्रायेनाह ॥ नान्यत्किमपीतितत्शेषत्वविभवात्व
हिर्भूतं त्वच्छेषत्वफलभूतकैंकर्यस्य समृद्ध्यनुपयुक्तमित्यर्थः ॥ नहिविम्बप्रतेरद्योतभूतं किंचित्करावित्संभवतीनाधशाट्येन सर्वशेषित्वमिह
विवक्षितं कणमपि सहइत्येतत्रदेहमित्यादौ सर्वत्र योज्यं आत्माभिमानार्हतयादुस्त्यजपरिग्रहस्यदेहादेः ॥ ब्रह्मादिस्थानरांत सर्वापेक्षितसप
भूतस्यास्यवासुखस्यतच्छोकुरात्मार्थं पृथिवीराजेदितिस्वेतरसकलत्यपरित्यागेनापिपरिग्राह्यस्यात्मनस्तदनुवंधैश्वर्यादेरपिप्रत्येकमस

नदेहंनप्राणान्नचसुखमशेषाभिलषितं चात्मानंनान्यत्किमपितवशेषत्वविभवात्वहिर्भूतंनाथकणमपिसहेयातुशतधाविनाशंतत्सत्यंमधु
मथनविज्ञापनमिदं ॥५७॥

हत्वद्योतनायनत्र: प्रयोगावर्शि अत्र यस्त्वयासहस्वर्गोनिरयोयस्त्वयाविना ॥ नदेवलोकाक्रमणं नामरत्वमहं वृणे ॥ ऐश्वर्यंवापिलोका
नाकामयेनत्वयाविनानचसीतात्वयाहीनानचाहमपिराघव ॥ मुहूर्त्तमपिजीवावोजलान्मत्स्याविवोद्धृतौ नहिमेजीवितेनार्थोनैवार्थेन
चभूषणैः वसंतारारकसीमध्येविनारामंमहारथमित्यारधमित्यादिसत्कप्रकारोनुसंधेयः ॥ एवमसह्यत्वाद्देवतेषामसंतनिवर्त्तिः का
र्येत्यभिप्रायेणाह ॥ यातुशतधाविनाशमितिनिरवयवस्यनित्यस्यात्मनःशतधाविनाशासंयोगात्तत्कैंकर्यविरुद्धावस्थानिवर्त्तनमेवात्रवि
वक्षितं ॥ ननुसर्वेषसंभवितार्थत्वादकृत्यमेतद्वाक्यमित्यत्राह ॥ तत्सत्यमितिनहित्वदन्यईदृशप्रवलतरविरोधिनिवर्त्तनक्षमइतिसू
चयति ॥ मधुमथनेतिइदंशृणु विज्ञापनमेकमित्युक्तं तद्दिदमपिदयनीयत्वानुवंधविज्ञापनमित्याह ॥ विज्ञापनमिदमितितद्दिदंसत्यं वि
ज्ञापनमितिसामानाधिकरण्यंवाविज्ञापितमितिकेचित्सगतिमुमुक्षूणांभगवत्कैंकर्यानुपयुक्तः परिग्रहस्त्याज्यइत्युक्तंभवति ॥५७॥ ॥

स्तो॰भा॰ ४६ एवं स्वचेतः शिक्षणेनाप्यसमाधानात्तो विशेषतस्स्वव्यक्तं विधान् हेतुत्वेनाह पितेति पिता त्वं उत्पादकस्त्वं हितप्रवर्तकश्च माता त्वं सा हि पुत्रार्थं भूयांसिक
र्मल्लरमाणापि प्रियवर्तनशीला च तादृशस्त्वं सर्वाधिक इति दयितनयास्निरनिस्तारकतया प्राप्तावसरे पुत्रकतया च दयितनयस्त्वं प्रियश्चासौ
सुहृच्चेति प्रियसुहृत् निरतिशयानंदस्वरूपत्वं निरवहितैषितं चात्र विवक्षितं उक्तसर्वप्रकारविशिष्टस्त्वदन्यो नास्तीति व्यंजनार्थ एवकारः सर्व
त्रयोऽन्यः निवासः शरणं सुहृदिति सुबालोपनिषदि चाधीतं त्वं मित्रं हितकामो भुसवयासर्वरहस्यो गुह्य मित्रमित्युच्यते त्वमपि तादृशः गुहध
नं जयगोपालादिषु तथा त्वमसि उच्यते च मित्रो मोऽपि कं कर्तुं तेन मैत्री प्रवर्तते अहो भाग्यमहो भाग्यं नंदगोपव्रजौकसां यन्मित्रं परमानंदं पू
र्णं ब्रह्म सनातनमिति । गुरुरपि सर्वेषां यथाधिकारं मन्मना भव मद्भक्तः मामेकं शरणं व्रजेत्यादिभिस्तत्तद्धितपुरुषार्थोपदेष्टा ततः एवं सर्वाज्ञा
ननिवर्तकश्च तथोच्यते । गुशब्दस्त्वंधकारः स्यात् रुशब्दस्तन्निरोधकः । अंधकारनिरोधित्वात् गुरुरित्यभिधीयत इति । गतिश्चासि उपायः प्राप्य।
श्चासि श्रूयते हि । अमृतस्यैष सेतुरिति यमेवैष वृणुते तेनैव लभ्य इति च जगतामित्यनेन पितामहमस्य जगतो माता धाता पितामहः भूतानां यो व्ययः पिता।

पिता त्वं माता त्वं दयिततनयस्त्वं प्रियसुहृत्त्वमेव त्वं मित्रं गुरुरसि गतिश्चासि जगतां । त्वदीयस्त्वद्भृत्यस्तव परिजनस्त्वद्गतिरहं प्रपन्नश्चैवं सत्यहमपि
तवैवास्मि हि भरः ॥ ६० ॥

चराचरगुरुर्हरिः समाप्तस्त्विजलोकानां गुरुर्नारायणो गुरुः । तमिमं सर्वसंपन्नमाचार्यं पितरं गुरुं । अर्चीमर्चितुमिच्छामः सर्वे शंसितुमर्हथ पिता
सि लोकस्य चराचरस्य त्वमस्य पूज्यश्च गुरुर्गरीयानित्यादिषु क्तं देवदानवादिसर्वसाधारणीमुच्यते । एतत्सर्वं सर्वशरणं वं धुशब्दाभ्यां संगृहीत।
नसप्रपंचनं । अथ त्वदीय इत्यादिना स्वगतान् हेतूनाह । त्वच्छेषत्वप्रतिबोधवानहमस्मीति भावः । त्वद्भृतः त्वयैव धारणीयः पोषणीयश्च तव परिज।
नः स्वतः सेवाधार्हः स्तुतिरूपसेवायां त्वया नियुक्तश्च त्वद्गतिः त्वदेकप्रयोजनः । अहमीदृशीमवस्थां त्वयैव प्रापित इति भावः । प्रपन्नस्त्वत्पादस्
त्वं शरणं प्रपन्न इति यथाहृदयकेम हृदयं वा भावितं भरन्यासः एतेन सोऽहं त्वां शरणमपारमप्रमेयं संप्राप्तः परमपदं यतो न किंचित् अहमा
त्मा न देहोऽस्मि विष्णुशेषोऽपरिग्रहः तमेव शरणं प्राप्तः तत्कैंकर्यं चिकीर्षये त्यादिष्विव स्वनिष्ठा विज्ञाप्यते भगवत्प्रपन्नस्य चैवं विशेष उच्यते देव
र्षिभूतानां नृणां पितृणां न किंकरो नायमृणी च राजन् सर्वात्मनाऽयः शरणं शरण्यं नारायणं लोकगुरुं प्रपन्न इति त्वत्कृतिरहं प्रपन्नश्चेत्युभा ४६

46

ननुसुखेनरक्षणीयत्वेचहेतुविशेषोवाच्यंते। यदीत्थंत्रयह्यपीतियोजंतथापिवातिनिर्दिशात्पुनःशाठ्येनापिक्रियायत्वेपिसंग्राह्यत्वविशेषद्योत
नार्थः अनिच्छन्नित्यादिनासांकेत्यंपारिहास्यंवास्तोभंहेलनमेववा। वैकुंठनामग्रहणमशेषाघविनाशनंहरिर्हरतिपापानिदुष्टचित्तैरपिस्मृतः।
अनिच्छयापिसंस्पृष्टोदहत्येवहिपावकः अवशेनापियन्नाम्निकीर्तितेसर्वपातकैः पुमान्विमुच्यतेसद्यःसिंहत्रस्तैर्मृगैरिव। एतावतालमघनिर्हरणा
यपुंसांसंकीर्तनंभगवतोगुणकर्मनाम्नां। आक्रोश्यपुत्रमघवान्यदजामिलोपिनारायणेतिम्रियमाणउपैतिम्रियमाणनुपैतिमुक्तिं। नारा
यणेतिमंत्रोस्तिवागस्तिवशवर्तिनी। तथापिनरकेघोरेपतंतीत्येतदद्भुतं। रोमापकृष्यदुःखेमोमुच्यतेनात्रसंशयः। अपिनारायणेत्येतद्व
द्दमात्रंजपिनइत्यादीनिप्रमाणानिसूच्यंते। रजस्तमःछन्नःस्वकर्मोपात्तप्रकृतिगुणभूतरजस्तमोभ्यामावृतज्ञानतयायथावस्थितस्वपर
प्रकाशरहितइतिभावः। छद्मस्तुतिवचनभंगीकुहनाप्रयुक्तस्तोत्ररूपकुटिलवाक्यप्रक्रियामित्यर्थः। इत्थंरूपंवचनमवलंब्यापिदयार्थविष

अनिच्छन्नप्येवंयदिपुनरपीच्छन्निवरजस्तमःछन्नःछद्मस्तुतिवचनभंगीमरचयं। तथापीत्थंरूपंवचनमवलंब्यापिकृपयात्वमेवंभूतंधरणि
धरमेशिक्ष्यमनः॥५७॥

यवाक्यस्यछद्मरूपंव्याजभंगीकृत्वापीतियावत्। एवंविधवचनमात्रेपिहियमभयनिवृत्तिःस्मर्यते। कमलनयनवासुदेवविष्णोधरणिधरा
च्युतशंखचक्रपाणेभवशरणमितीरयंतियेवैत्यजभटदूरतरेणतानपापानितिकृपयास्वसंकल्पितयत्किंचिद्व्याजमात्रापेक्षित्वेतिहृदयंत्वमेवरा
घवंशरणंगतइत्यत्रापरीक्षितवाक्यमूलंस्वपुनस्त्यजेयंकथंचनदोषोयद्यपितस्यस्यात् इतित्वयैवोक्तमितिभावः। यद्वात्वंसुहृदंसर्वभूतानांज्ञात्वामि
त्रयोगमित्यादिवाहीवकारेणनानेरपेक्षमाणमन्यज्ञात्वात्त्वंचयोज्यते। एवंभूतस्ततःसर्वज्ञंत्वामपिविप्रलभ्यमुमुक्षुनमित्यभिप्रायः धरणीधरेति
संबुद्धिःसर्वलोकहितैषिणासर्वसहयाक्षमयायुक्तत्वामितिसूचयति। अतएववसुधरोद्धरणनिदर्शनेनत्वाम्यसमुद्धरणहेतुमपिप्रकाशयते। उक्तंहिभग
वच्छास्त्रे। नमःसकलकल्याणदायिनेचक्रपाणयेविषयार्णवमग्नानांसमुद्धरणहेतवेइतिमेअन्यैःशिक्षयितुमशक्यस्येतिभावः। यथोच्यते। एकः
शास्तानद्वितीयोस्तिशास्ताविष्णुरशेषस्येतिशिक्षयअपराहितंसम्यक्शिक्षायुक्तंकुरुइत्यर्थः। शांतग्रांतेनगोविंदइत्यादिन्यायश्चात्रानुसंधेयः॥५७॥

सः विष्णुभक्तिपरस्तु बहुसत्जन्मानि मानवः एकांतभगवद्याजी विप्रो भागवतान्वये ततः सभजते १

स्तो॰भा॰ पुण्येन वैसवत्वं जन्मेते जन्मरेषि चास्तं तद्दुःखे मसिति। जगति ख्यातयशस्वांयदं शौधीतवेशानित्यायुक्तप्रकारेणानुकूलप्रतिकूलरूपसर्वे
४७ जनप्रसिद्धकीर्तीनां शुचीनां योर्थे शुचिस्मृहि शुचिर्नेन स्वरिशुचिः शुचिः स्वेषु सेश्वरतानादिशुद्धिः परमात्मतेत्यादिप्रसिद्धसर्वप्रकारशु-
द्धिमतां। एतेन प्रयोजनांतरसंगरूपशुद्धिराहित्यं चाभिप्रेतं युक्तानामात्मावलोकरूपमाणोयनत्वयासह नित्ययोगमाकांक्षमाणानां च विघ्नेषु रहि-
तानामिति वा गुणपुरुषतत्त्वस्थितिविदां त्रिगुणात्मकप्रकृतेः पुरुषस्य च तत्त्वस्थितिं याथात्म्यप्रतिष्ठां विजानतां यद्वा प्रकृतिपुरुषतत्त्वयोः स्व-
रूपस्वभावादिव्यवस्थितिवेदिनामित्यर्थः। निसर्गादेवेत्यादि जन्मप्रभृति नित्यस्मरणादिं हि नियतभक्तीनामित्यर्थः ईदृशाश्रितिरिक्तो हि निंदितः वि-
त्रनिर्मोजनिष्ठेत्यादिनाऽत्रयुक्तानामित्यादिपदत्रयेण स्वमर्त्वेशुरुशार्हकर्मयोगज्ञानयोगभक्तियोगान्वयं वा विवक्षति। पापेष्वात्मानुद्धिर्यस्य सपा-
47 पात्मा यद्वा पापमेव स्वरूपं स्वभावो यस्य सोहं पापात्मेति। स्वनिंदाप्रकर्षार्थ औपचारिकः प्रयोगः स्मर्यते। मानुष्यं प्राप्य लोकेस्मिन्मूको बधिरो
पिवा। नापक्रामति संसारात्स खलु ब्रह्महा भवेदिति। वाराहे च। लब्ध्वातु मानुषं देहं पंचभूतसमन्वितं। मामेव न प्रपद्यंते तेन लोकः स्वतरं नु किमिति
नारसिंहे च। स्तंभमविस्पुपलमप्रानुषत्वं सुकृतज्ञानेन हृत्थे क्षयार्थं हेतोः स्पयति क्रूरते नमो स्मार्गसदहति चंदनमात्ममनस्महेतोरिति। अधि-
कारानुरूपमुपायं त्वमेव प्रयच्छसीत्यभिप्रायेण संबोधयति। शरणदेति यद्वा मत्स्वभावाद सत्कल्पमपि महायोगिवंशजन्मानं त्वत्स्वभावात्त्वमे-
व प्रस्तुतविषयमक्षीणाजनतया स्वीकृत्योपायरूपाक्षिकुरुषेति भावः। तमस्यधोधो निमज्जामीत्यन्वयः तमः शब्देनेह सम्यक्प्रकाशविरुद्ध-
मज्ञानं विपरीतज्ञानं चाभिधत्ते। तमोगुणमयी प्रकृतिर्वा तमः समुद्रस्थानीयत्वमभिप्रेत्य मज्जनशब्दः तेन स्वपरप्रकाशराहित्यं च सूच्यते। मदं-
शपास्त्वदनुभवरसे निमज्जंति अहं तु तमसि निमज्जामीति निर्वेदविशेषश्च। महत्ता पुण्यपुंजेन क्रीतेयं कायनौस्त्वया प्राप्तुं दुःखोदधेः पारं त्वरया
चन्न भिद्यते इति संसारतरणहेतुतया त्वदुक्तेनैव शरीरेणैव संसारे निमज्जामीत्युक्तं भवति। अधोध इत्यनेन स्वेनानैष्टुस्त्वस्याशक्योद्धरणत्वम-
भिप्रेत्य निमज्जामीति वर्तमानव्यपदेशः पापदशानंता दशास्य तमसो निवृत्तिं द्योतयति। एतेन स्वयमुपायांतरानर्हस्य मे त्वत्सामर्थ्यं सर्वं सहेत्व-
यि भरन्यासस्त्वत्स्वसूक्तिनिबंधोपि त्वयैव यथावस्थितः कार्य इति विज्ञापितं भवति। इ। यदि सर्वशक्तिः परकारुणिकस्त्वमकिंचनस्य प्रपदिशिवा-
न्मुखरमुख्यसमम शिक्षणे रक्षणे च न प्रवर्तसे तदा महत्तरविपरीतगुणगणभराक्रांतोहं कथं संसारजलधिमुत्तीर्य त्वत्प्रसादपरिचर्याप्रा ४७

मां अनन्यप्रयोजनतया भगवंतमाश्रितानां नरकादिनिवृत्तिरुच्यते। अयमेव हि रहस्याम्नायेन हितः किंकरायमपि विषयासिक्तं ति यमो
वैवस्वतो राजा यस्तवैष स्वदृष्टिस्थितः तेन चेदविवादस्ते मा गंगां मा कुरून् गमः नपततीति नमोऽस्त्वाह। नमस्तु भागवताय मपि विषयं गच्छंति
किं तर्हि इहैव तेषां केषिद्उपश्लेशा भवंति विकरणस्य वंतीत्यारम्यतानुपश्लेशान् सहेरन्निति वैष्णवे पुराणे। स्वपुरुषमभिवीक्ष्य पाशहस्तं वद
तियमः किल तस्य कर्णमूले परिहर मधुसूदनप्रपन्नान् प्रभुरहमन्यनृणां न वैष्णवानामिति। वामनेच। हे वं शार्ङ्गधरं विष्णुं ये प्रपन्नाः परायणं न
तेषां यमसालोक्यं न च ते नरकौकसः इति। नारसिंहे। पुंडरीकाक्ष देवेशान नरसिंह त्रिविक्रम। त्वामहं शरणं प्राप्त इति यस्तं समुद्धरेति। तथान्य
त्रयस्मिन्कस्मिन्कुले जाता यत्र कुत्र निवासिनः वासुदेवरता नित्यं यमलोकं न यांति त इति। एवं सति त्वयि भरस्वीकारार्हमपि च भरन्या
सवाक्यप्रयोक्तरि स्थिते सतीत्याशयः। अहमपीत्यनेन सर्वोक्तसर्वदोषाकरो किंचिदप्यक्तिकत्वापि चरत्युच्यते। यद्वा यथा प्राचीनापूर्णप्रवृत्ति
निष्ठास्त्वया भरत्वेन स्वीकृताः तथाहमपीति भावः। तवप्रस्तुत प्रभूत भरस्वीकारे प्राप्तस्य समर्थे सचनत्वे तदहं शं भरं सोढुमहं वान्यो वान्यो वा
जनित्वाहं वंशे जगति महति ख्यातयशसां शुचीनां युक्तानां गुणपुरुषतत्त्वस्थितिविदां। निसर्गादेव त्वच्चरणकमलैकांतमनसामधोधः पापात्मा
शरणद निमज्जामि तमसि। ६०।
त्वदतिरिक्तः कश्चित्समर्थ इत्यवधारणार्थः हि शब्दे नमनीषिणो हि ये केचिद्भक्तयो मोक्षकांक्षिणः तेषां वेदविच्छिन्नानां योगक्षेमं वहाम्यहं हरि
रिति स्थिते मनस्वीत्यादि प्रमाणप्रसिद्धिर्द्योत्यते स्वांगीकारस्य सिद्धिवत्कारं वाच्यमक्तिभरः रक्षितत्वात्त्वया राजन्गर्भभूतास्तपोधनाइ
ति महर्षिवाक्यप्रकारेण महद्व्यापार निरपेक्षं रक्षणीय इत्यभिप्रायः। ६०। अहमपि तवैवास्मीति हि मरामि तु कैवेषे महायोगिकुलप्रसूतत्वमपि
हेतुरस्तीत्यभिप्रायेणाह। जनित्वेति। एतद्धि दुर्लभतरं लोके जन्म जदीदृशामित्युक्तदुर्लभतरं भागवतकुले जन्मापीति भावः। अहमित्यनेना
स्मिन्वंशे अहमेक एव विपरीतवृत्त इति व्यज्यते। वंशो महतीत्यभिमानित्वाद्यात्मगुणसम्पद्वृत्तविद्यादिभ्यपि श्रेष्ठमहाभागवतकुले। भूतलेऽस्मा
भमेतत्तद्धिकुलं विष्णुपरियहमितिवस्मर्यते। ईदृशवंशजन्मनः कृष्णस्तव्य मत्यं वाराहे प्रोक्तं। वर्णाश्रमाचारपरः सप्तजन्मसु यो द्विजः एकां
तसर्वमन्ताः स्यात्सविप्रः सप्तजन्मसु। ततस्तत्तुल्यमाहात्म्यात्स्वद्भक्तो भक्तिभृति। तथैव सप्तजन्मानि शिवभक्तिपरायणः महत्तानेन
जनितत्वेपि॥ यद्यपि गिवंश प्रस्तते नत्वया कथमत्यंता किंचनत्वंडरत्स्वमथेवं भरन्यासः क्रियत इत्यत्र प्राग्युक्तमकिंचनत्वमेवासमंज

वाराधनं त्रयं परद्रव्येषु जात्यंधाः परदारेषु षंढकाः परवादेषु ये मूकास्ते नीवस्थिता मम मेतादिमत्रभावं । वंचनपरः परद्रव्यापहारार्थं दंभरूपत्वास्त
दोषापकवेनत्वहितरानिवस्थतः सर्वेषां त्वामपि विप्रलब्धुकामः ईदृशानां सर्वेषु कृत्येषु वहिष्कारः स्मर्यते । पाखंडिनो विकर्मस्थान् वैडालव्रतिकाञ्छठान्
हैतुकान्बकवृत्तींश्च वाङ्मात्रेणापि नार्चयेत् । धर्मध्वजः सदालुब्धः छाद्मिको लोकदांभिकः वैडालव्रतिको ज्ञेयो हिंस्रः सर्वाभिसंधकः । अधोदृष्टिर्नै
ष्कृतिकः स्वार्थसाधनतत्परः । शठो मिथ्याविनीतश्च बकव्रतचरो द्विज इति । नृशंसः । आसन्नेषु व्याघ्रादिवत् क्रूरकर्मा । आनृशंस्यं परो धर्म इति
तदुक्तिविपरीतस्वभावः एवं प्रकारस्त्वया मम पापात्मेति । सर्वोक्तमुपपन्नमित्यभिप्रायेणाह । पापिष्ठ इति । यद्वा प्रदर्शनार्थं किं बहुक्ते । अनृतं च समुत्कर्षे
राजगामि च पैशुनं । गुरोश्चालीकनिर्बंधः समानं ब्रह्महत्यया । पिशुनो यश्च विप्राणां रंध्रान्वेषणतत्परः । तदन्मर्मातिकं शोकं सोऽक्षयं नरकं व्रजेत् । स्वय
मानात्तीक्ष्णेन नीचाः परयशोग्निना । अशक्तास्तत्पदं गंतुं ततो निंदां प्रकुर्वते । यो राज्ञः प्रतिगृह्णीयाल्लोभो वितथे प्रलप्सति । स च व्रजति मूढात्मा नर
कानेकविंशतिं । कृष्णाजिनं प्रतिग्राही रेतश्चैव विक्रयी । गजच्छायासु यो श्नाति न भूयः पुरुषो भवेत् । वादेन ब्राह्मणं जित्वा हृष्टो भवति यो द्वि
जः श्मशाने पादपः स स्यात् गृध्रकंकनिषेवितः । गुरुं हुंकृत्य त्वंकृत्य विप्रं निर्जित्य वादतः । अरण्ये निर्जले देशे संभवेद्ब्रह्मराक्षसः । यो मोहादथवा
लस्यादकृत्वा देवतार्चनं भुंक्ते स याति नरकान् शूकरेष्वपि जायते । पितरं मातरं वापि तथाद्दत्वा नयं सुतं स्तम्भे च तरुणीं भार्यां तं विद्याद्ब्रह्मघा
तकं । राक्षसाः कलिमाश्रित्य जायंते ब्रह्मयोनिषु ब्राह्मणानेव बाधंते विष्णुभक्तान्विशेषतः । मिथ्याचारो गुरुद्रोही वेदेश्वरविदूषकः तेन नेवकृ
पापात्मनः सद्योरंध्रा इति स्मृतिः । परद्रोहे ध्यभिध्यानं मनसानिष्टचिंतनं । वितथाभिनिवेशश्च मानसं त्रिविधं स्मृतं । पारुष्यमनृतं चैव पैशुन्यं चै
व सर्वशः असंबद्धप्रलापश्च वाङ्मयं स्याच्चतुर्विधं । अदत्तानामुपादानं हिंसा चैवाविधानतः परदारोपसेवा च शारीरं त्रिविधं स्मृतं । इत्यादिदृष्टा
न्यतिघोराण्यनंतानि मे पापानि सतीत्यभिप्रायः अहं पापाद्युक्तप्रकारेणात्वमरिवर्ग्यामिश्रन्निव भावयन् । अथवा उक्तानुक्तदोषसहस्रपूर्णतया
दयासर्वेषु भूतेषु क्षांतिरनसूया शौचमनायासो मंगल्यमकार्पण्यमस्पृहेत्याद्यप्रतिपादितविपरीताकार इति भावः कथं कथंचिदित्यापादनार्थः ईदृशोपि
शरणागतवत्सलं त्वामाश्रितः श्रवणत्वादित्यायान्वविनश्यतीति मूढो भिप्रायः यथाहि शरण्यः स्वयमाह । अपि चेत्सुदुराचार इत्यारभ्य न मे भ
क्तः प्रणश्यतीति । वैष्णवशास्त्रे च अपि पापेषु निरताः मद्भक्ताः पांडुनंदन । मुच्यंते पातकैः सर्वैः पद्मपत्रमिवांभसेति । श्रीपुंडरीकनारदसंवादे च

मुयामिति प्रागुक्तं कार्यं। अस्य पल्लवेऽस्त्रिस्वदेशाज्जीतसज्ञारएपंगुलो राज्यवसनीयत्वं द्रढयितुं च पापालेति संगृहीतमेव विमृश्यते। अमर्यादः इति प्र
सःकर्मणोर्थस्य श्रुतस्य भिजनस्य च। वेषवागर्हणित्रिसारूप्यमाचरन्विचरेद्देहेत्यादिषु क्रांगु तिस्मृतिमर्यादामतिक्रांतो हि। लुंटः उपायद्वारेण अ
हेयपुरुषार्थकार्यपणादियुक्तः। लुंटेद्दरिद्रेरूपणेन नृशंसेत्यनिकृष्टयोरितिनिरुक्ते नृशंसत्वस्य पृथक्कृतकत्वात्। शेषं यथोचितं शास्त्रं पंडितैः अ
र्थकापेल्पान्वप्लस्त्रीभिर्विस्वयमाखानं स्कृत्यसंस्कृत्यपरोयकरणी कृतः। चलमतिः वक्रं भ्रोवकूरः श्वसंपक्कश्रुतेष्वपि शास्त्रेष्वप्रतिष्ठितबु
द्धिः सहर्षोपुलुहद सर्वश्रुतेर्मर्तोधर्माणामविशारदः कृष्णानप्लुत्रसंदेशानंधः स्वमिवाञ्छतीत्यादि कृत्वा स्थिरमतित्वदोषः व्यवस्थितः प्रशां
तात्मा कुपितोप्यनयंकरः अव्यवस्थितचित्तस्य प्रसादेपि भयंकरत्वादप्रियादं। अमर्यादः लुब्धश्चलमतिस्तत्या प्रसवभूः कृतघ्नो दुर्मानी समप
रसशोवंचनपरः नृशंसः पापिष्टः कथमहमितीदुःखजनलधेरपारुद्गीर्णस्तत्रपरिचरेयं वरणेयोः अस्त्याप्रसवदःगुणे वृद्धोबा विष्करणमस्या
नद्भतः प्रकारं राजन्नस्य पृष्यमात्राणि परस्त्रिद्राणि पश्यसि आत्मनो मेरुमात्राणि पश्यन्नपि न पश्यसीत्यादिभिराह। तस्याः प्रथमप्रादुर्भावस्थानं
असत्यकायान्नजवेनमांड्यायः असत्यकायमांसादः। न च मांयो भक्षयतीत्यादिषु सत्यावान्नयिषाप्रदानादिषु परिहरणीयत्वमुच्यते। कृतघ्नः त्व
दन्येत्वयाचपरस्योपकारकेण। कृतमनंतमनुपकारमनु कृतमप्युपकारेष्वपि प्रहन्तइति भावः। स चासौ सर्वेभ्यः पापकृद्भ्यः समधिकः। स्मर्यते गोघ्ने चै
व सुरापे च चौरे भग्नव्रते तथा निष्कृतिर्विहिता सद्भिः कृतघ्ने नास्ति निष्कृतिः। सत्कृतमाय्यमित्राणि न भजंतीति ये। तान्मृतानपि क्रव्यादाः कृतघ्नान्नो
पभुंजते इति। एतस्य कल्मषनिर्वेदनार्थं प्रायश्चित्तसंभवेपि सर्वसर्गान्नहितापि स्मर्यते शरणागतबालस्त्रीहिंसकान्संवसेन्न तु। वीर्णव्रतान्प्रा
सितः कृतघ्नसहितानिमानिति। दुर्मानी निकृष्टमप्यात्मानमीश्वरोहमहंभोगीत्यादिप्रकारेणोत्कृष्टं मन्यमानः। तेनस्तुत्कृष्टजनावमाना द्वेषेण शि
पात्रादिवत्प्रवर्तते। यथाह मांडिल्यः मूर्खोऽप्युत्कृष्टतमन्या। अधर्मो धार्मिकाद्वेषधर्मयुक्तान्प्रबाधते सा भूर्नाऽऽलिंगमास्थिताइति। आह च वि
दुरः अतिमानोतिवादश्च तथा त्यागो नराधिप क्रोधश्चात्मविवित्सा च मित्रद्रोहश्च तानि षट्। तएवत्वायसस्तीक्ष्णाः कृंतंत्यायूंषि देहिनां एता
नि मानवान् घ्नंति न मृत्युर्भद्रमस्तु तइति स्मरपरवशः धर्मविरुद्धकामभोगाभ्यासी फलः अतएव वद्यस्वेतं त्रसास्तानं त्यासिमानोपि जडकृत्यं श्रोग
रस्ताद्दृशी नारी घृतकुंभसमः पुमान्। तस्मान्नारीषु संसर्गं दूरतः परिवर्जयेत्। रागाद्यपेतं दृढयं वागदुष्टा चानृतादिनाहिंसादिरहितः कार्यः केशा

स्तो॰ मा॰
४७

49

धीवसितिमोजनः मदृष्टेन काकेन दारितं तु स्तनान्तरं क्षितिमादिमासीत्वद्वचनात् । अतो बलिवदसाविद्जन्मा प्रवणः कश्चिद्वायसः मत्कृते काकमा
येनु ब्रह्मास्त्रं समुदीरितमिति वोक्तं प्रणत इति । त्रीन्लोकान्संपरिक्रम्य गत्वा भूमौ निपतितं दयार्द्रया वृत्या प्रणतत्वेन परिगृह्येत्यर्थः । रघुवर
पदं भस्त्वं तादृशो वायसस्य प्रणत इति दयानुयर्थस्यैव यस्य कृतस्य प्रतिभवमपराद्धुर्मुखसाधुजहो भूर्वेदक्किमपदमागस्तस्य तेस्ति हृन्मायाः य॰
द्दासकृतव्रणतइत्येतावन्मात्रेणेति । पदाप्रणतशब्दः प्रकृष्टप्रकीभावरूपप्रपत्तिपरः सततं निपतितं भूमौ शरणं शरणागतमितिवचना
त् । उक्तं चाभियुक्तैः काकं तं च विभीषणं शरणमित्युक्तिक्षमौ रक्षत इति वधार्हमपि काकुत्स्थः कृपया पर्यपालयदित्युक्तमाह । दया
लुरभूरिति । ननु दक्षिणाक्षिहिंसनेन दण्डयतः कथं दयालुत्वं राजभिर्धृतदण्डास्तितिमायात् । दण्डोपि दयामूलक इति चेत्तर्हि प्रणत इति हि
त्क्विनेघटते मैवं प्राणार्थिनः काकस्य प्राणरक्षणेन प्रपत्तिफलस्य पूर्णत्वात् । अमोघस्य ब्रह्मास्त्रस्य लक्ष्यणानुबंधिय किंचिन्निरसनीया
क्ष्मेत्येवरणापेक्षितत्वात् । तदर्थमेवाक्षिहरणेपि समदृष्टिणा गासचारितारकाभ्यापारकत्वनेन दृष्टिद्वयफलसिद्धेः दुःकृतेः काकस्याप
योपराधमयानुबद्धसर्थस्वत्वावयवखंडनस्यापि शिक्षारूपत्वात् तस्य काकजात्यनुबंधित्वात्तल्लक्ष्मिः सर्वत्र सर्वेषां प्रस्तुतस्मरान्त प्रख्या
पनार्थत्वाद्येति । एवं दयाक्षमयोरुदाहरणानन्तरमाह । पश्चेति । अत्र क्षम शब्देन सर्वलोकाक्षणार्थमवतीर्णत्वं क्षपि भूवाचकः । शब्दो न स्व नि
हैतिवाचक इति निरुक्तिश्च स्वत्र अते । प्रतिभवमपराद्धुरित्यनेन काकादप्याधिक्योक्तिः । जन्मत्रये सर्वदापराधशीलस्येत्यर्थः । अविज्ञाते तिवदप
राधक्षमाभिप्रायेणाह । मुग्धेति । मुग्धो ह्यपराधमनपराधं च विवेक्तुं न शक्नोति अयं तु विविक्तं पश्यन्नपि क्षमया पृथिवीसम इत्युक्तगुणविशे
षेणापश्यन्निव भवति मुग्धत्वोपचारः तस्मिन्नेव तनयमुपयया वित्ति पराशरवाक्याभिप्रेतमाह साधुजन्तोऽभूरिति । ननु तनयशब्देन जीवप
ष्वसो विवक्षितः । श्रुतिस्मृतिसूत्रैर्जीवनित्यत्वस्यापनात् प्रतिषेधात् । ब्रह्मविद्ब्रह्मैव भवतीत्यादिकं तु परमसाम्यापत्तिपरं निरंजनः परमसा
म्यमुपैतीति यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवति । एवं मुनेर्विजानतः आत्मा भवति गौतमेति इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागता इत्या
दिश्रुतिस्मृत्यनुसारात् स्वप्रितं च । भोगमात्रसाम्यलिंगाच्चेति । अतः सालोक्यसारूप्यादिशब्दवत्सायुज्यशब्दोपि युक्तसाम्यपरः सर्वं हि
भगवतायुक्तेन च भोग्यत्वेन युक्तं तेन सर्वज्ञं सर्वतः प्राप्य धीरा युक्तात्मानः सर्वमेवविशन्ति । सर्वं ह पश्यः पश्यति सर्वमाप्नोति सर्वशः इ ४७

नचैक्यापत्तिः परमात्मात्मनोर्योगः परमार्थ इतीष्यते मिथ्यैतदन्यद्द्रव्यं हि नैति तद्द्रव्यतां यत इति ८

अश्वमेधशतैरिष्ट्वा राजसूयशतेन च । न प्राप्नुवंति मुनयो नारायणपराङ्मुखाः । ये नृशंसा दुरात्मानः पापाचाररतास्तथा । तेपि यांति परं धाम नारायण
पदाश्रया इति । श्रीनारसिंहपुराणे च । भगवति हरावनन्यचेता भृशं मलिनोपि विराजते मनुष्यः । नहि शशकलुषच्छविः कदाचित्तिमिरपराभव
तामुपैति चंद्रः । श्रीसात्वते च । दुराचारः सर्वाशी कृतघ्नो नास्तिकः पुरा । समाश्रयेदादिदेवं श्रद्धया शरणं हि यः । निर्दोषं विद्धि तं जंतुं प्रभावात्परमा
त्मन इति । मेरुमंदरमात्रोपि राशिः पापस्य कर्मणः । केशवं वैद्यमासाद्य दुर्व्याधिरिव नश्यति । सत्स्मृतोपि गोविंदो नृणां जन्मशतैश्चितं । पापराशिं
दहत्याशु तूलराशिमिवानल इत्यादिवचनानि भाव्यानि । एवमभिप्रायानुपगमे शास्त्रविरोधः पूर्वापरविरोधश्च स्यात् । इत ऊर्मिषट्कवद्ध
त्वेनातिदुःसहतयोपलभ्यमानादित्यर्थः । अत एव दुःखशब्देन विषयसंस्पर्कमधुमायामांसारिकं सुखमपि संगृह्यते दुःखसजातीयत्वरूपेण
मानं सर्वं जनार्णवस्तारत्वाभिप्रायेणापारत्वोक्तिः । उत्तीर्णशब्द इह औपाधिकसमस्ताकारात्मना निवृत्तिपरः । अनिष्टनिवृत्तेरिष्टप्राप्तिपर्यंतत्वं त
वेत्यादिनोच्यते । परिशुद्धप्राप्यस्य तव चरणयोरीदृशोहं त्वत्कृपामंतरेण कथं परिचरेयमित्युक्तं भवति । अत्र परिचरणोक्त्या येन येन धाता ग
च्छति तेन तेन सह गच्छति । तद्यथा लक्ष्मणवत्त्वा वत्सवत्सो वा मातरं च यथा वा सत्वामनुगच्छे तथा प्रकारमेतमानंदमयमात्मानमुपसंक्रम्य इमा
ल्लोकान्कामान्नी कामरूप्यनुसंचरन्नेतत्साम गायन्नास्ते स तत्र पर्येतीत्यादिमुक्तविषयश्रुत्युक्ताः सर्वे व्यापाराः स्वाभिमतकैंकर्यरूपाः स्व
च्यंते । ईदृ एवंविधस्यापि त्वत्स्वरूपकिंचिद्व्याजमात्रेण सर्वेषामपराधानां क्षंतव्यत्वे प्राह । अभिप्रायमपि प्रदर्शयति । रघुवरेति । यद्वा स्वदोषाधी
नः शरण्येन स्वगुणानाविष्कृत्य प्रत्यासत्तिः स्वदोषाणामपि काकादिदोषन्यायात्स्फुटत्वे किमाश्चर्यमित्याह । अत्र रघुवरेति संबुद्ध्या शर
णागतरक्षणादिधर्मप्रवर्तनाय तदुचितवंशेवतीर्णस्त्वं तादृशो शरण्येषु मुख्यत्वं च व्यज्यते । आह विभीषणः राघवाय महात्मने सर्वलोकशर
ण्यायेति हृष्टवैतत् । स्वविषयवासिजंतुजातस्य समरलीलासहायीकृतानां वानराणां च जातिगुणवृत्तादिवैषम्यानादरेणाय किंचिदनुकू
लमात्रेण संरक्षणीयत्वं । ब्रह्मा स्वयंभूश्चतुराननो वा सदेवगंधर्वमनुष्यपन्नगाः । पिशाचान्दानवान्यक्षान्पृथिव्यां चापमानयसे मित्रे इ
त्यादिप्रसिद्धप्रभावस्त्वं न त्वशक्तः । क्षाम्यसीति भावः । नादृशः देवीविषयासत्यापचारकर्तुः काय समेतानेन पुत्रः किल सः शक्रस्य वायसः
पततां च धरां नरवरः शीघ्रं पतनस्यागतो समय इत्युक्तं ह्युते । अत्र भयतः काकुत्स्थकृतया समागत इति रामायणोक्तिः । न चाप्युपारमन्मांसात् । भद्रा

वाचिकी सेके प्रयोजनांतरार्थप्रपत्तिरनन्यप्रयोजनप्रपत्तिश्चेत्यनेप्रपत्तिर्मे किं श्वेतपरेत्वशानुकंप्य इत्यादिना लोकरक्षणार्थमवतीर्णस्य दक्षिण
सागरवेलायां महापरिषदि तुरपक्षप्रतिज्ञाकरणेत्वं सूच्यते। प्रतिज्ञां च अभयं सर्वभूतेभ्यो ददामीत्येतद्रूपां अत्र निस्त्रिद्धसर्वसाक्षात्कारस्य भ
गवतः स्मरत इत्युक्तिर्लोकिकवदनुसाराद्गौपचारिकी। अनुकंप्यस्त्वप्रतिज्ञाभंगपरिहारार्थत्वये वानुकंपाकर्त्तव्येतिभावः ननु यद्यर्थे प्रति
ज्ञातं तेषु त्रिजीवणादिषु प्रतिज्ञासफलाकिं त्वयेत्यत्राह। मदेकवर्जं किमिदं व्रतं तेइति प्रपन्नाय यथाचत इति सामान्यतस्त्वयाप्रतिज्ञातं विभीष
णोवासुग्रीवोयदिवारावणः स्वयमिति चोक्तं। नच त्वया तद्दानीमप्यतिरिक्ताय यंददामीति व्रतमुपात्तं। अतोहमपि त्वद्व्रतविषयभूत इति।
अमलते सर्वसाधारणत्वामित्वशरण्यत्वयोग्परामोद्दिनीनिभावते इति वै यद्यपि त्वया काविशेषप्रतिद्वेपानर्हत्वं वस्तु चयितुं पुनरपितवेत्यु
क्त। ननु काकस्य स्वपित्रापि परिक्तः सुरैश्च समर्षिभिस्त्रीन् लोकान् संपरिक्रम्य तमेवशरणंगतः सतं निपतितं भूमौ परिदूनं विवर्णं चेत्युक्तावस्था
विशेषोस्ति चेद्यस्य प्राचीननियतिर्मानुवर्णविमेद्दर्शिभिः शोचयश्च विद्यते। तत्र पुनस्त्वदुक्तामर्यादत्वाद्याकारस्योपायानुष्ठाने फलप्रार्थयंतुय
क्तिवाक्येन नहतयं शिरुहंनीयत्वं चेत्यत्र पितात्वं मातात्वं दयासिंधोवं धोरघुवरनुप्रपन्नइत्यादिभिः। शरण्यगतस्वरूपलोयेकगुणावि
शेषायेप्रतिपादिताः। अकिंचनोनन्यगतिरित्यादिभिः समस्तगुणाश्चयेप्रदर्शिता स्तेभ्यः सर्वेभ्यः समधिकं निरंकुशस्वातंत्र्येण सर्वेश्वरेणाप्य
तिलंघनीयमसाधारणंस्वांगीकारहेतुमाह। अकृत्रिमेति। क्रियया निर्वृत्तः कृत्रिमः तदन्योऽकृत्रिमः। भगवत्कटाक्षविशेषाधीनमहावंशसं
जातदेतस्मिन् जन्मनि प्रभूतयत्ननिरपेक्षइत्यर्थः अकृत्रिमत्वमिहप्रेमविशेषणं त्वद्धेतुप्राप्यप्रापकत्वोपेकसर्वाकारवैशिष्ट्यस्त्वय
तेः। अनुरागमहिमातिशयांतसीम्न इति प्रागुक्तमेव विधेयांतरार्थमनुवदंति। प्रेमप्रकर्षावधिमिति। अकृत्रिमत्वच्चरणारविंदप्रेमप्रक
र्षावधिमात्मवंतं। पितामहं नाथमुनिं विलोकय प्रसीदमद्वृत्तमचिंतयित्वा। लोके च राजादयः स्वभक्तानुबंधिनामपिरक्षणं कुर्वंतीति भावः
आत्मवंतं जितमानसमित्यर्थः तेनप्रयोजनांतरवैमुख्यं व्यंजितं। एतद्विषयप्रेमप्रकर्षहेतुस्तादृशापेक्षासपरिकरभक्तियोगसामर्थ्यं
पि विजं चाक्रमतयाप्रपत्तिनिष्ठत्वंसूच्यते। तं यद्वायथावस्थितभगवत्प्रेमजनितत्वानादिभिर्ध्यानमेतिपदद्वयाभिप्रायः। अयं च स्वभावो गीता
र्थसंग्रहेपि ज्ञानीतुपरमैकांती तदायत्तात्मसंजीवनः। तदश्लेषवियोगैकसुखदुःखस्तदेकधीः। भगवद्ध्यानयोगोक्ति वंदनस्तुतिकीर्तनैः लब्धात्मा तद्गतप्राणमनोबुद्धींद्रियक्रिय इत्युक्तः। आचार्योवेद
चरणारविंदशब्देन सर्वभूतस्य स्वतः प्राप्यत्वे ल्पस्यत्वं पावनतमत्वं निरतिशयं भोग्यतया परमप्रेमार्हत्वं च प्रकाश्यते ५

स्यादिश्रुतेः तृप्तश्चिरंप्राप्नोतिपरमित्यादिकमकर्तव्यपदेशात् अत्रपदवाक्यप्रमाणानभिज्ञैः सायुज्यमैक्यमितिपरिकल्पितं। एतासामेवदेवतानां।
सायुज्यंसार्ष्टितांसमानलोकतामाप्नोतीत्यत्रसगुणक्रमेणवानेकदेवतासायुज्येतत्तदैक्यापत्तेरघटितत्वात्। सायुज्यंप्रतिपन्नायेतीव्रभक्तास्तप
स्विनः किंकराः ममतेमितंभवंतिनिरुपद्रवाइतिपरमसंहितायामुक्तेशांडिल्यस्मृतौच यादृग्रूपस्तुभगवान्यत्रावतिष्ठते। शुक्रश्चपंचकालज्ञास्ता
दृशाः सहमोदंतेइतिसायुज्यशब्देनसर्वंतत्तन्मयोभवेदित्यादिफलः। संयोगविशेषोविवक्षितइति। एवंवदंततदर्थविरोधाभावान्नामर्षणीयाः।
आगःशब्दोपराधवाचीतस्यतेक्षमायाः किमपदमागः नकिंचिदस्तिसर्वदासर्वदर्शिनात्वयादृष्टमस्तिचेद्दूरतयापिद्रष्टुंप्रष्टुंचनशक्यमितिभावः।
दयाक्षमयोरविनाभावादन्यतरोक्तावितरदर्थगतं। ननुदेहपातावधिनिरंतरापराधस्यशिशुपालस्यकेनव्याजेनमुक्तिःप्राप्तेतिचेत् इहतावत्
त्यागेवभवच्छोकविशेषवासितः शापाक्रांतस्यप्रतिकूलजन्मत्रयान्तेमुक्तिर्भविष्यतीतिप्रतिविधाननियतिः परमनिदानं अतएवह्युपालचक्रेवधो
द्यतेभगवतिशिशुपालस्यप्रद्वेषसंस्कारभूयस्त्वेपिनिरंतरस्मृतिमनःप्रकाशितपारम्यभगवद्रूपंपश्यतोनुकूलावस्थाप्राप्तिःसूच्यते। अपगतदे
हानुबंधोभगवंतमद्राक्षीत्तावत्सभगवच्चक्रेणाप्रसाद्यपाप्मनस्ततःस्मरणदग्धाखिलाघसंचयोभगवंतंतमुपानीतः तस्मिन्नेवलयमुपयावि
ति ईदृ। एवंवत्सक्षमाविशेषदर्शनान्निर्भयोस्मितथापितद्धतविशेषानुसंधानान्निर्भरोस्मीत्यभिप्रायेणसकृदेवप्रपन्नायेतिश्लोकोक्तममापिस
धारणमित्यभिप्रायेणाह। नत्विति। सकृत्कृतः शास्त्रार्थइतिसकृत्त्वात्समस्तविद्यांतरनयादृष्टानुवृत्तिशंकायांतन्निरासार्थएवकारः सकृदेवेत्य
सहस्रैवसर्वेषांनिष्कृतिंकृतेतिकेचिद्व्याख्यातं। आवृत्तिमपवदेदेनुपसिद्धप्रकर्षः प्रयोजनभूयस्त्वंसकृत्कृतशास्त्रार्थमयिनिक्षिप्तकर्म
त्वेय। कृतकृत्योभविष्यतीत्यादिप्रमाणानुगुणंचविद्यते अतएवसकृदेवेत्यस्यास्मीतिमध्यवहितान्वयमत्रानुक्तः प्रचयापचयध्वंसप्रसहरहिता
स्वयंप्रपत्तिः। तत्क्षमिकालेनुफलतीत्यपिसूच्यते। अथनाथशब्देनलोकनाथः पुराभूत्वासर्वलोकशरण्याय इत्यादिकंव्याप्यते। शरण्यत्वंकै
कर्योद्देश्यत्वंचतवैवप्राप्तमितिभावः तवाहमस्मीतिचयाचमानस्तवदासभूतोहमितिवंविधानुसंधानस्वैककेशेषवृत्तिप्रपत्तिफलत्वेनप्रार्थ्य
यमानइत्यर्थः। अस्मीत्यस्यस्यामितिवाभिप्रेतं नदपितवाहंकिंकरःस्यामितिफलप्रार्थना। ननुप्रपन्नः सकृदेवनाथतवाहमस्मीतिचयाचमा
नः। तवानुकंप्यःस्मरतःप्रतिज्ञांमदेकवर्ज्यंकिमिदंव्रतंते। अत्रगोप्तृत्ववरणमात्मनिक्षेपश्चयथार्हंपृथक्निर्दिश्यतइतिकेचित्। मानसी।

बंधं जयामास। अपराधेत्यादिभिश्चतुर्भिः शरण्यगुणविशेषेण प्रपन्नैर्भूमर्दैर्विरोधिनिवृत्तिं प्रार्थयत्। वसुरादिषु मम नाथेति वामां शेषहंसेः पुरु
षार्थत्वाय स्वस्मिन्निरुपाधिकानन्यार्हशेषत्वाख्यवस्तायमाचष्टे: अथवा बोधितवानिमानित्यादिभिश्चतुर्भिरनन्यप्रयोजनस्य स्वस्य तत्त्वाभिष्टप्राप्तिमनिष्टनि
वृत्तिं च प्रार्थयामास। अनन्तरश्लोकेन स्वनिंदाख्यानेन स्वापेक्षितपुरुषार्थे सर्वातिशायित्वं स्वस्य चरितं च स्तवयन् शरणागतस्य प्रपन्नस्य गुणविशेषे
रेव प्रार्थितं सर्वं सिध्यतीति प्राग्युक्तमेव स्थूलानि च नमायेन स्थिरीचकार अनिष्टनिवृत्तिश्लोकेनानन्यप्रयोजनस्वस्मरणेषु तेन भगवानेहाभिक्रम
नाशोऽस्तीति मायायात्। स्वयमेव शेषं स्मरयतीति भावः। तत्र त्वमेवेत्यादिना मित्रत्वं पितात्वमित्यादिना विहृत्यत्वं परगतैः स्वगतैश्च हेतुभिः शरण्यस्वस्मा
मिमतस्वीकारेण स्वस्य निर्भरत्वं निरणैषीत्। जनित्वाहं मम यदि इति द्वाभ्यां स्वस्मोपायांतरेण परमपुरुषार्थप्राप्तिर्न संभवतीति पूर्वोक्तमेव पुनः
प्रतिपत्तिमभाषत। रघुवरेतिश्लोकेन शरणपदप्राक्तनानुष्ठानाभ्यासान् स्वस्मिन्नपि स्वापराधक्षमापणेनाह। ननु प्रपन्न इति श्लोकेन शरण्यप्रतिवि
शेषस्वभावादर्पितदेहं प्रार्थयामास। अथाकृत्रिमेत्यंतिमेन स्वपरगतेषु स्वरक्षणहेतुषु भगवत्कटाक्षविशेषजनितसदाचार्यसंबंध एव प्रधा
नतम इति निर्धार्य तदधीनभगवत्प्रसादेन निर्भरः अहृष्टश्चासीत् इति किल निगमांतनागधेयस्य कृतिपरिवाहसमीक्षया महत्त्वाप्रपन्ना।
अत्यंतपरमं पदं मुरारेरमोघमनोरथ एष यामुनेयः॥ १॥ कश्चित्ताकश्चितेविशापसद्भिः मंदस्मेदिदिभिरत्र सावधानैः वचनवक्ष्यैतिकृमाण
हष्ट्वाब्जकुमंतस्मि हेदमसङ्कं॥ २॥ उपनिषदुपधेयस्तोत्रतात्पर्यमेतत् ततः। यतिपतिरसधत्तेयामुनार्यः स्वयं नो अहः मितं तु नियुक्तः सा
ङ्गिराचार्यति घोरधिगतस्तत्करवलिंखा क्रियामन्वभूवं॥ ३॥ स्वकमिति हतत्रेयामुनस्तोत्रहृत्साम्सटगुणनिगमांताचार्यकं वेंकटेशः। अगणिज
गतिसद्भिर्व्यः समसासहस्रैकविकथकमृगेंद्रः सर्वतंत्रस्वतंत्रः॥ इति श्रीकवितार्किकसिंहस्य सर्वतंत्रस्वतंत्रस्य श्रीमद्वेंकटनाथस्य
वेदांताचार्यस्य कृतिषु स्तोत्रभाष्यं संपूर्णं॥ श्रीमान्वेंकटनाथार्यः कवितार्किककेसरी। वेदांताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥ १॥

54

नेकशिष्टिः

संपन्नो विष्णुभक्तो विमत्सरः ॥ मंत्रज्ञो मंत्रभक्तश्च सदा मंत्राश्रयः शुचिः गुर्वदनस्तवातरुभक्तिसमायुक्तः पुराणज्ञो विशेषतः एवं लक्षणसंपन्नो गुरु
रित्यभिधीयते इत्यादिशक्ता नामाचार्यगुणानां सर्वेषां सार इह संगृहीतः । नस्यैवं गुणवत्त्वेन वक्तिमायातमित्युत्राह । पितामहमिति । अत्र विद्यया जन्म
नाचेति भाव्यं । एतेन नास्मावरपुरुषः स्वीयं तेनास्माब्रह्मवित्कुले भवतीति सू – सर्थः सूच्यते । नाथमुनिश्रीरंगनाथ इति तन्नामधारिणं त्वदेक
मननशीलं चेति भावः । विलोकयेत्पुमनुग्रहः पश्चात्स्वादिन्यायेनानुबंधिपर्यन्तमनुग्राह्यत्वेन मत्वेत्यर्थः । आचार्यस्य प्रसादेन मम सर्वमभीप्सितं प्राप्नुया
मिति विश्वासो यस्यास्ति सः सुखी भवेदिति रूक्ष आचार्यप्रसादोपि भगवत्प्रसादहेतुरिति अभिप्रायेणाह । प्रसीदेति । अनाद्यनंतमत्स्वपराधजनितकालुष्यं
विहाय ममामैकांतिकात्यन्तिककैंकर्यसाम्राज्यधनं कुरुष्वेत्यभिप्रायः महत्तमश्चिन्तयितामदीयममर्यादत्वादिप्रतिकूलत्वं तं उपायोपेयभक्तनिव
52 वनायानुकूलत्वं स्वामासंयत्किंचित्ज्ञात्वाजीकृत्वेत्यर्थः समर्थने हि । पापिष्ठस्तु न च बंधुश्च पुंडरीकस्य पुण्यकृत आचार्यवत्तयामुक्तो नत्स्मात्सदाचार्यवान्भ
वेदिति । अत्र सर्वेकृतप्रपत्यादिकमपवादकोशेनि वेश्यप्रसादनांतरं मुच्यते इति वदन्त्येप्याचार्यसंबंधप्राधान्यपरः अन्यथा सर्वशास्त्राणां संप
दायस्य त्वदंघ्रिमुद्दिश्येत्यादिस्ववचनानां च विरोधः स्यात्स्वरूपप्रवृत्तेर्वैकल्यमाशंक्य पूर्वं प्रपत्तिनिष्ठमाचार्यं स्वरक्षणाय पुरस्करोतीति पूर्वे
पि मत्यपरिविवेकजा चेदविवेकं कुरुष्वेति तात्पर्यं ग्राह्यं अत्र कुलशब्देन प्रतिकूलत्वं तन्मात्रविवक्षायां न किंचिद्वोद्धं ६५ न दिह यामुनाचार्यः अथांन
रहस्यत्रयार्थगर्भस्तोत्रं चिकीर्षुराद्यैः पंचभिः श्लोकैः । कृतज्ञताप्रकाशनरूपं स्वकं प्रकृतोपयोगिकसंप्रज्ञानप्रदातृत्वप्रणामं । पश्चेन प्राप्यप्रापक
संग्रहपूर्वकं स्तोत्रारंभसमकल्पयत् । सप्तमेन स्तोत्रारंभादौ प्रभुत्वेन भगवतः परत्वं समगृहीत् । अष्टमनवमाभ्यां तत्समाधानमुखेन सौलभ्यं प्र
चीकशत्तावे रूसे इत्यादिभिर्दशभिर्नारायणशब्दवाच्यस्यैव सर्वस्मात्परत्वं सौलभ्यं प्रपंचप्रकारेण भव । एवं शरण्ये निरूपिते । नधर्मनिष्ठोस्मीत्य
नेन तद्विषयां साधिकारां सपरिकरां चानन्यप्रयोजनां शरणागतिं प्रत्यपादयत् । एतावता शब्दनार्थेन स्वरूपं स्वं डोपि अत्यभिलापिनः न निंदितमि
त्यादिभिः पंचभिरकिंचनोपायभूतां शरणागतिं शरण्ये क्लितामेव व्यहृणुतः त्वदंघ्रिमुद्दिश्येति वाभ्यां कृतनगौरवं पापनाशवनिमित्तशंकाफलं क
निवृत्तिमुदाजहार । विलासेत्यादिभिः सप्तदशभिः । वत्रर्थितपदद्वयं व्यहृणुत । अत्रैव सर्वदेशसर्वविधसर्वकालेषु चिन निरपराधसर्वविधकैंक
र्यस्य त्वयं प्रयोजनतयानमः शब्दतात्पर्यमप्यस्तवयत् । धिगशुचिमितिश्लोकेन स्वनिरासान्येन स्वापेक्षितपुरुषार्थसमर्थोतिशयितं स्वस्यत्वरां